# POETRY AND DRAMA

## SKT1 C01

I SEMESTER

Core Course

## M.A. SANSKRIT SAHITYA

2019 Admission

UNIVERSITY OF CALICUT,

School of Distance Education,

Calicut University P.O.,

Malappuram - 673 635, Kerala.

190251

# UNIVERSITY OF CALICUT

## SCHOOL OF DISTANCE EDUCATION,

## STUDY MATERIAL

## I SEMESTER

## Core Course

## M.A. SANSKRIT SAHITYA

# POETRY AND DRAMA

**Prepared by:**

*Dr. K. INDIRA,*
*Assistant Professor on contract in Sanskrit,*
*School of Distance Education, University of Calicut*

**Scrutinized by:**

*Dr. PUSHPADASAN KUNIYIL,*
*Associate Professor & Director,*
*Sree Sankaracharya University of Sanskrit,*
*Regional campus, Koyilandy.*

***DISCLAIMER***

"The author shall be solely responsible for the content and views expressed in this book"

# CONTENTS

**UNIT I: Poetry Naisadhiyacarita Canto II (first 65 verses)**

**UNIT II: Drama Ascaryacudamani of Saktibhadra**

# UNIT I: Poetry Naisadhiyacarita Canto II (first 65 verses)

**अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः।**

**वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः।। 1।।**

**अन्वयः**

अथ स द्विजः जगत्यधीश्वरात् पुरुषोत्तमात् ततः मुक्तिं अधिगत्य यो वचसां अपि गोचरो न, तं आनन्दं अविन्दत।

**व्याख्या**

हंसमुखेन भैमीवर्णनाऽर्थं द्वितीयं सर्गमारभते- अथ उ मोचनाऽनन्तरं, सः उ नपूर्वोक्तः, द्विजः उ पक्षी विप्रश्च, जगत्यधीश्वरात् उ भूपतेः, भुवनपतेश्च, पुरुषोत्तमात् उ पुरुषश्रेष्ठात्, विष्णोश्च, ततः उ नलात् प्रसिद्धाच्च, मुक्तिं उ मोचनं निर्वाणं च, अधिगत्य उ प्राप्य, यः उ आनन्दः, वचसां अपि उ वाक्यानां अपि, गोचरः उ ग्राह्यः, न, वक्तुमशक्य इति भावः। तं उ तादृशम्, आनन्दं उ सुखं, परमानन्दं च मोक्षजन्यमिति भावः। अविन्दत उ अलभत।

यथा विप्रो भवनपतेर्विष्णोमाक्षं प्राप्य अनिर्वचनीयमानन्दं प्राप्नोति तथैव स हंसोऽपि भूपतेः मोचनं प्राप्य वाचामविषयं सुखं प्राप्यवानिति भावः।

**अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरुहीकृताम्।**

**करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती।। 2।।**

**अन्वयः**

स खगः उत्फुल्लतनूरुहीकृतां तनुं नैकधा अधुनीत, करयन्त्रणदन्तुराऽन्तरे पक्षती चञ्चुपुटेन व्यलिखत्।।

**व्याख्या**

सः उ पूर्वोक्तः, खगः उ पक्षी, हंस इत्यर्थः। उत्फुल्लतनूरुहीकृतां उ सम्फुल्लपतत्त्रीकृतां, नलकरपीडनादिति भावः। तनुं उ शरीरं, नैकधा उ अनेकधा, अनेकप्रकारेणेत्यर्थः, अधुनीत उ कम्पितवान्, करयन्त्रणदन्तुराऽन्तरे उ नलहस्तपीडननिम्नोन्नतमध्यप्रदेशे, पक्षती उ पक्षमूले, चञ्चुपुटेन उ त्रोटिपुटेन, व्यलिखत् उ विलेखनेन ऋजूचकारेत्यर्थः।

**अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा।**

**स्खलनक्षण एव शिश्रिये द्रूतकण्डूयितमौलिरालयम्।। 3।।**

**अन्वयः**

अयं स्खलनक्षण एव एकतमेन अङ्घ्रिणा पक्षतेः अधिमध्योर्ध्वगजङ्घं द्रुतकण्डूयितमौलिः (सन्) आलयं शिश्रिये।।

**व्याख्या**

अयं उ हंसः, स्खलनक्षण एव उ मोचनसमय एव, एकतमेन उ एकेन, अङ्घ्रिणा उ चरणेन, पक्षतेः उ पक्षमूलस्य, अधिमध्योर्ध्वगजङ्घं उ मध्योर्ध्वगामिप्रसतं (यथा तथा), द्रुतकण्डूयितमौलिः उ शीघ्रघर्षितमस्तकः सन्, आलयं उ निजावासं, नीडमित्यर्थः, शिश्रिये उ श्रितवान्।

**स गरुद्वनदुर्गदुर्ग्रहान् कटु कीटान् दशतः सतः क्वचित्।**

**नुनुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः।। 4।।**

**अन्वयः**

पण्डितः स गरुद्वनदुर्गदुर्ग्रहान् कटु दशतः क्वचित् सतः कीटान् पटुचञ्चूपुटकोटिकुट्टनैः तनुकण्डु नुनुदे।

**व्याख्या**

पण्डितः उ निपुणः, कीटाद्यपनयनप्रवीण इति भावः। सः उ हंसः, गरुद्वनदुर्गदुर्ग्रहान् उ पक्षसमूहदुर्गमर्सैतानदुर्ग्राह्यान्, कटु उ तीक्ष्णं, दशतः उ तुदतः दन्तैरिति शेषः। क्वचित् उ कुत्रचित्, सतः वर्तमानान्, कीटान् उ क्षुद्रजन्तून्, पटुचञ्चूपुटकोटिकुट्टनैः उ समर्थत्रोट्यग्रघट्टनैः, तनुकण्डु उ अल्पखर्जु यथा तथा, ननुदे उ निवारितवान्।।

**अयमेत्य तडागनीडजैर्लघु पर्यव्रियताऽथ शङ्कितैः।**

**उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः।। 5।।**

**अन्वयः**

अयं तडागनीडजैः लघु एत्य पर्यव्रियत। अथ अस्य करग्रहजात् वैकृतात् शङ्कितैः विकस्वरस्वरैः उदडीयत।

**व्याख्या**

अयं उ हंसः, तडागनीडजैः उ पद्माकरकुलायोत्पन्नैः पक्षिभिः, लघु उ शीघ्रं, एत्य उ आगत्य, पर्यव्रियत उ परिवृतः। अथ उ परिवेष्टनाऽनन्तरम्, अस्य उ हंसस्य, करग्रहजात् उ हस्तपीडनजनितात्, वैकृतात् उ विकारात्, दन्तुरपक्षत्वरूपादिति भावः। शङ्कितैः उ भीतैः, विकस्वरस्वरैः उ उच्चैर्घोषैः पक्षिभिः, उदडीयत उड्डीनम्।

**दधतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः।**

**स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव।। 6।।**

**अन्वयः**

स खगः बहुशैवलक्ष्मतां दधतः सरसः बहुशैवलक्ष्मतां दधतो नलस्य धृतरुद्राक्षमधुव्रतं करं कोकनदभ्रमात् इव पुनः ययौ।

**व्याख्या**

सः उ पूर्वोक्तः, खगः उ पक्षी, हंस इत्यर्थः। बहुशैवलक्ष्मतां उ भूरिशैवलभूमितां, दधतः उ धारयतः, सरसः उ पल्लवात्। बहुशैवलक्ष्मतां उ अधिकशिवभक्तचिह्नतां, दधतः उ धारयतः, नलस्य उ नैषधस्य, धृतरुद्राक्षमधुव्रतं उ भ्रमरसदृशरुद्राक्षधारकं, करं उ हस्तं, कोकनदभ्रमात् इव उ रक्तकमलभ्रान्तेः इव, पुनः उ भूयः, ययौ उ जगाम, रक्तवर्णे नलहस्ते रक्तकमलभ्रान्तेरिव हंसः पुनर्जगामेति भावः।

**पतगश्चिरकाललालनादतिविस्रम्भमवापितो नु सः।**

**अतुलं विदधे कतूहलं भुजमेतस्य भजन्महीभुजः।। 7।।**

**अन्वयः**

स पतगः चिरकाललालनात् अतिविस्रम्भं अवापितो नु (किञ्च) एतस्य महीभुजः भुजं भजन् अतुलं कतूहलं विदधे।।

**व्याख्या**

अथाऽस्य स्वयमागमनादुत्प्रेक्षते पतग इति। सः पूर्वोक्तः, पतगः हंसः, चिरकाललालनात् उ बहुसमयोपलालनात्, अतिविस्रम्भं उ अविश्वासम्, अवापितो नु उ प्रापितः किं, नोचेत्कथं पुनः स्वयमागच्छेदिति भावः। एतस्य उ अस्य, महीभुजः उ राज्ञः, नलस्येत्यर्थः। भुजं उ करं, भजन् उ सेवमानः, अतुलं उ अनुपमं, कुतूहलं कौतुकं, विदधे उ चकार।

**नृपमानसमिष्टमानसः स निमज्जन्कुतुकाऽमतोर्मिषु।**

**अवलम्बितकर्णशष्कलीकलसीकं रचयन्नवोचत।। 8।।**

**अन्वयः**

इष्टमानसः स कुतुकाऽमतोर्षिषु निमज्जत् नृपमानसं अवलम्बितकर्णशष्कुलीकलसीकं रचयन् अवोचत।

**व्याख्या**

इष्टमानसः उ प्रियमानसः, सः उ हंसः, कुतुकाऽमतोर्षिषु उ कौतुकसुधातरङ्गेषु, निमज्जत् उ ब्रुडत्, नृपमानसं उ नलमनः, अवलम्बितकर्णशष्कुलीकलसीकं उ आलम्बितश्रोत्रशष्कुलीघटद्वयं रचयन् उ कुर्वन्, अवोचत उ उक्तवान् ।

जले निमज्जन्तं पुरुषं यथा कश्चित्तारणाय कलसप्रदानेन तमुद्धरति तथैव कौतुकतरङ्गेषु ब्रुडत् राजमानसमपि हंसः तत्कौतुकप्रशमनाय वक्ष्यमाणवाक्यं जगादेति भावः।

**मृगया न विगीयते नृपैरपि धर्माऽऽगमममर्मपारगैः।**

**स्मरसुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः।। 9।।**

**अन्वयः**

धर्माऽऽगमममर्मपारगैः अपि नृपैः मृगया न विगीयते (तथाऽपि) हे स्मरसुन्दर! मां यत् अत्यजः, स तव दयोदयोज्जवलः धर्मः।

**व्याख्या**

धर्माऽऽगमममर्मपारगैः अपि उ धर्मशास्त्रतत्तवपारगामिभिः अपि, नृपैः उ राजभिः, मृगया उ आखेटः, न विगीयते उ न गर्ह्यते, तथाऽपि, हे स्मरसुन्दर उ हे काममनोरम, मां उ पक्षिणं, मृगयालक्ष्यभूतमिति भावः। यत्, अत्यजः उ त्यक्तवान्, सः उ त्यागः, तव उ भवतः, दयोदयोज्जवलः उ करुणाऽवतारनिर्मलः, धर्मः उ सुकृतम्, त्वं न केवलमाकारत उज्जवलः प्रत्यत दयारूपधर्मेणाऽपीति भावः।

अबलस्वकुलाऽशिनो झषान्निजनीडद्रुमपीडिनः खगान्।

अनवद्यतृणार्दिनो मृगान्मृगयाऽधाय न भूभृतां घ्नताम्।। 10।।

**अन्वयः**

अबलस्वकुलाऽशिनो झषान् (घ्नताम्), निजनीडद्रुमपीडिनः खगान् (घ्नताम्), अनवद्यतृणार्दिनो मृगान् घ्नतां भूभृतां मृगया अघाय न।

**व्याख्या**

राज्ञां कृते मृगयाया विगानाऽभावं प्रतिपादयति - अबलेति। अबलस्वकुलाऽशिनः उ निर्बलनिजवंशभक्षकान्, झषान् उ मत्स्यान्, घ्नताम्, एवं परत्राऽपि। निजनीडद्रुमपीडिनः उ स्वकुलायवृक्षपीडकान्, विष्ठात्यागफलभक्षणादिनेति भावः। खगान् उ पक्षिणः, तथा अनवद्यतृणार्दिनः उ निरपराधाऽर्जुनहिंसकान्, मृगान् उ पशून्, घ्नतां उ हिंसतां, भूभृतां उ राज्ञां, मृगया उ आखेटः, अघाय उ पापाय, न उ न भवति। । तेषां झषखगपशूनां वधस्य दण्डरूपत्वाद्दण्डनाऽभाव एव दोष इति भावः।

**यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत्।**

**कृतमातपसञ्ज्वरं तरोरभिवृष्याऽमृतमंशुमानिव।।11।।**

**अन्वयः**

)हे राजन् (तव यत् अप्रियं अवादिषं , प्रियं आधाय तत् तरोः कृतं आतपसञ्ज्वरं अमृतं अभिवृष्य अंशुमान् इव नुनुत्सुः अस्मि।

**व्याख्या**

हंसः पुनः स्वागमनकारणं प्रतिपादयति – यदिति। हे राजन् (तव=भवतः , यत् ,अप्रियं =अप्रीतिजनकं वाक्यं , अवादिषं =अवोचम् ,प्रियं = प्रीतिजनकं वाक्यं , आधाय = निधाय , कथयित्वेति भावः। तत्= अप्रियं , तरोः = वृक्षस्य , कृतं = स्वयं विहितं , आतपसञ्ज्वरं = द्योतकृतं सन्तापं , अमृतं = जलं , अभिवृष्य = वर्षित्वा , अंशुमान् इव = सूर्य इव , नुनुत्सुः = निवारयितुम् इच्छुः , अस्मि=भवामि।

उपनभ्रमयाचितं हितं परिहर्तुं न तवाऽपि साम्प्रतम्।

करकल्पजनान्तराद्विधेः शुचितः प्रापिस हि प्रतिग्रहः।।12।।

**अन्वयः**

अयाचितं उपनम्रं हितं तव अपि परिहर्तुं न साम्प्रतम्। हि सः प्रतिग्रहः करकल्पजनान्तरात् शुचितः विधेः प्रापि।

**व्याख्या**

त्वदीयोपकृतिर्न मया ग्राह्येति चेत्तत्राह – उपनम्रमिति। अयाचितं = अप्रार्थितं , उपनम्रं = उपनतं , हितं = हितसम्पादकं , मदीयं प्रियवचनमिति भावः। तव अपि = भवतः अपि , परिहर्तुं =परित्यक्तुं , न साम्प्रतम् =नो युक्तम्। तदपि मादृश्यास्तिर्यग्जातेः कथं ग्राह्यमिति चेत्तत्राह – करकल्पेति। हि = यस्मात्कारणात् , सः= पूर्वोक्तः , मयाऽभिहित इति भावः। प्रतिग्रहः = दत्तपदार्थः , करकल्पजनान्तरात् = हस्तस्थानीयाऽन्यलोकात् , शुचितः=शुद्धात् , विधेः = भाग्यात् , प्रापि =प्राप्तः , न तु मत्त इति भावः।

अहं तु निमित्तमात्रं , दातृस्थानीयं तु भाग्यमेवेति अतो न ग्रहणलाघवमिति तात्पर्यम्।

**पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते।**

**इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युकर्तुमर्तयः।। 13।।**

अन्वयः

पतगेन मया जगत्पतेः तव उपकृत्यै किं प्रभूयते ? इति वेद्मि, तदपि अर्तयः तु मां प्रत्युपकर्तुं न त्यजन्ति।

व्याख्या

हंसः स्वगर्वं परिहरति — पतगेनेति। पतगेन उ पक्षिणा, मया उ हंसेन, तुच्छजन्तुना इति भावः। जगत्पतेः उ सार्वभौमस्य, तव उ भवतः, उपकृत्यै उ उपकाराय, किं प्रभूयते उ किं क्षम्यते ? समर्थेन न भूयत इति भावः। इति उ एवं, वेद्मि उ जानामि, , तदपि तथाऽपि, अर्तयः तु उ प्रत्युपकराऽर्थमुत्कण्ठारूपाः पीडास्तु, मां उ पतगं, प्रत्युपकर्तुं उ प्रत्युपकारं कर्तुं, न त्यजन्ति उ न मुञ्चन्ति, प्रत्युपकाराय प्रेरयन्तीत्यर्थः। पतगोऽप्यहं दयालोस्ते महोपकारं करवाणीति भावः।

**अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।**

**पृथुरित्यमथाऽणुरस्तु सा न विशेषे विदुषामिह ग्रहः।। 14।।**

अन्वयः

अथवा उपकर्तुः अचिरात् औपयिकीं उपक्रियां आचरेत्, इत्थं सा पृथुः अथ अणुः अस्तु। विदुषां इह ग्रहो न।

व्याख्या

स्वशक्त्यनुसारेण उपकारस्य प्रत्युपकारः शीघ्रं कर्तव्य इति प्रतिपादयति - अचिरादिति। अथवा उ पक्षान्तरे, उपकर्तुः उ उपकारकस्य, अचिरात् उ अविलम्बात्, औपयिकीं स्वोपायसाध्याम्, उपक्रियां उ उपकारम्, आचरेत् उ कुर्यात् जीवनस्य अनित्यत्वाच्छीघ्रं प्रत्युपकारं विदधीतेति भावः। इत्थं उ एवं सति, सा उ उपक्रिया, पृथुः उ अधिका, अथ उ अथ वा, अणुः उ अल्पा, अस्तु उ भवत्, विदुषां उ बुधानां,

विवेकिनामिति भावः। इह उ अस्मिन् विषये, ग्रहो न उ आग्रहो न। गुणग्रहिणो विवेकिनः कृतज्ञतामेवाऽस्य पश्यन्ति नैयून्यादिजनितं दोषं नाऽन्विष्यन्तीति भावः।

**भविता न विचारचारु चेत्तदपि श्रव्यमिदं मदीरितम्।**

**खगवागियमित्यतोऽपि किं न मुदं दास्यति कीरगीरिव।। 15।।**

**अन्वयः**

(हे नृप) इदं मदीरितं विचारचारु न भविता चेत् तदपि श्रव्यम्। इयं खगवाक् इत्यतः अपि कीरगीः इव मुदं किं न दास्यति।

**व्याख्या**

स्ववचः श्रवणे हेतुमुपपादयति - भवितेति। (हे नृप) इदं उ वक्ष्यमाणं, मदीरितं उ मत्कथितं, वच इति भावः। विचारचारु उ विमर्शमनोहरं, न भविता चेत् उ नो भविष्यति यदि, तदपि उ तथाऽपि मदीरिते विचारचारुत्वाऽभावेऽपीति भावः। श्रव्यम् उ श्रोतव्यम्, इयं उ एषा, खगवाक् उ पक्षिवाणी, इत्यतः अपि उ अस्मात्कारणात् अपि, कीरगीः इव उ शुकवाणी इव, मुदं उ हर्षं, किं न दास्यति उ किं न वितरिष्यति ? दास्यत्येवेति भावः। विचारचारुत्वाऽभावेऽपि कौतुकादपि मदीरितं वचः श्रौतव्यमिति भावः।

**स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।**

**यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम्।। 16।।**

**अन्वयः**

अरिसार्थसार्थकीकृतनामा स भीमभूपतिः जयति किल। यं प्रभुं अवाप्य विदर्भभूः शक्रभर्तृकां द्यां अपि हसति।

**व्याख्या**

साम्प्रतं स्ववचो वक्तुमुपक्रमते - स जयतीति। अरिसार्थसार्थकीकृतनामा शत्रूसमूहाऽन्वर्थीकृताऽभिधानः, सः उ प्रसिद्धः, भीमभूपतिः भीमाऽऽख्यनृपः, जयति किल सर्वोत्कर्षेण वर्तते खलु। यं उ भीमभूपतिः, प्रभुं उ भर्तारम्, अवाप्य उ प्राप्य, विदर्भभूः उ विदर्भभूमिः, शक्रभर्तृकां उ इन्द्रस्वामिकां, द्यां अपि उ दिवं अपि, लक्ष्यीकृत्येति शेषः। हसति उ उपहसति, किमुत अन्यभर्तृकदेशमिति शेषः। स्त्रियो हि भर्तृरुत्कर्षादन्याः स्त्रीरुपहसन्तीति भावः।

**दमनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात्।**

**वरमाप स दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयाम्।। 17।।**

**अन्वयः**

सः अमनाक् प्रसेदुषः तथ्यगिरः दमनात् तपोधनात् दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयां तनयां वरं आप।

**व्याख्या**

हंसः साम्प्रतं दमयन्त्या उत्पत्तिं वर्णयति- दमनादिति। सः उ भीमभूपतिः, अमनाक् उ अत्यर्थं, प्रसेदुषः उ प्रसन्नात्, निजोपासनयेति शेषः। तथ्यगिरः उ सत्यवचसः, अमोघवचनादिति भावः। तादृशात् दमनात् उ दमननामकात्, तपोधनात् उ तपस्विनः, क्षषेरित्यर्थः। दिष्टविष्टपत्रितयाऽनन्यसदृग्गुणोदयां काललैकत्रयाऽनितरसदृशसौन्दर्यादिगुणाविर्भावां, तनयां उ पुत्रीं, वरं उ अभीप्सितम्, आप उ प्राप, वरत्वेन पुत्रीं लब्धवानिति भावः।

**भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।**

**उदियाय यतस्तनुश्रिया दमयन्तीति ततोभिधां दधौ।।18।।**

**अन्वयः**

असौ यतः तनुश्रिया भुवनत्रयसुभ्रुवां कमनीयतामदं दमयन्ती उदियाय, ततः दमयन्तीति अभिधां दधौ।

**व्याख्या**

अथाऽस्या नामधेयं तद्व्युत्पत्तिं च प्रदर्शयति - भुवनेति। असौ उ तनया, यतः उ यस्मात्कारणात्, तनुश्रिया निजशरीरसौन्दर्येण, भुवनत्रयसुभ्रुवां उ लोकत्रितयसुन्दरीणां, कमनीयतामदं उ सौन्दर्यगर्वं, दमयन्ती उ अस्तं गमयन्ती सती, उदियाय उ उदिता, उत्पन्नेति भावः। ततः उ तस्मात्कारणात्, दमयन्ती इति उ दमयन्तीत्यानुपूर्विकाम्, अभिधां नाम, दधौ उ बभार।

**श्रियमेव परं धराऽधिपाद् गुणसिन्धोरुदितामवेहि ताम्।**

**व्यवधावपि वा विधोः कलां मृडचूडामिलयां न वेद कः।। 19।।**

**अन्वयः**

(हे राजन्) तां गुणसिन्धोः धराऽधिपान् उदितां श्रियं एव परं अवेहि वा व्यवधौ अपि मृडचूडानिलयां विधोः कलां को न वेद।

**व्याख्या**

अथ पद्यानामेकविंशत्या चिकुरादारभ्य दमयन्तीं वर्णयति- श्रियमिति। (हे राजन्) तां उदमयन्तीं, गुणसिन्धोः दयादाक्षिण्यादिगुणसमुद्रात्, धराऽधिपान् भीमनरेन्द्रात्, उदितां उ उत्पन्नां, श्रियं एव लक्ष्मीं एव, परं उ ध्रुवं, अवेहि जानीहि। वा उ अथवा, व्यवधौ अपि व्यवधाने सत्यपि, मृडचूडानिलयां शिवशिखाऽऽश्रयां, विधोः उ चन्द्रमसः, कलां षोडशं भागं, को न वेद को न जानाति ? सर्वेऽपि वेदेत्यर्थः।

यथा शिबशिरःस्थिताऽपि कला चन्द्रकलैव तथैव गुणसिन्धोर्भीमभूपालादुत्पन्नाऽपि एषा दमयन्ती श्रीरेवेति भावः।

**चिकुरप्रकरा जयन्ति ते विदुषी मूर्धनि सा बिभर्ति यान्।**

**पशुनाऽप्यपुरस्कृतेन तत्तुलवामिच्छतु चामरेण कः।। 20।।**

**अन्वयः**

ते चिकुरप्रकरा जयन्ति, विदुषी सा यान् मूर्धनि बिभर्ति। पशुना अपि अपुरस्कृतेन चामरेण तत्तुलनां क इच्छतु।

**व्याख्या**

साम्प्रतं दमयन्त्याः केशादारभ्य वर्णनमुपक्रमते – चिकुरेति। ते उ प्रसिद्धाः, चिकुरप्रकरा उ केशकलापाः, जयन्ति सर्वेत्कर्षेण वर्तन्ते। विदुषी उ पण्डिता, सा उ दमयन्ती, यान् चिकुरप्रकरान्, मूर्धनि उ शिरसि, बिभर्ति उ धारयति। पशुना अपि उ चतुष्पदेन अपि, मूर्खेन चमरीमृगेणाऽपीति भावः। अपुरस्कृतेन उ अनादृतेन, पृष्ठभागस्थापितेन वा, चामरेण उ चमरीपुच्छेन, सह तत्तुलनां उ चिकुरप्रकरसमीकरणं, कः उ जनः, इच्छतु उ वाञ्छतु, न कोऽपीति भावः।

**स्वदृशोर्जनयति सान्त्वनां खुरकण्डूयनकेतवान्मृगाः।**

**जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात्।। 21।।**

**अन्वयः**

मृगाः तदखर्वेक्षणशोभया जितयोः भयात् उदयत्प्रमीलयोः स्वदृशोः खुरकण्डूयनकैतवात् सान्त्वनां जनयन्ति।

**व्याख्या**

मृगाः उ हरिणाः, तदखर्वेक्षणशोभया उ दमयन्तीविशालनेत्रकान्त्या, जितयोः उ पराभूतयोः, अत एव भयात् उ भीतेः, उदयत्प्रमीलयोः उ उत्पद्यमाननिमीलनयोः, स्वदृशोः उ निजनेत्रयोः, खुरकण्डूयनकैतवात् उ शफघर्षणच्छलात्, सान्त्वनां आश्वासनं, जनयन्ति कुर्वन्ति।

यथा लोके परपराजितान् भयान्निमीलितनयनात् जनान् स्वजना हस्तपरामर्शादिना सान्त्वयन्ति तथैव मृगा अपि दमयन्तीनेत्रपराजिते स्वनेत्रे खुकण्डियनच्छलादाश्वासयन्तीति भावः।

**अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि।**

**श्रुतिगामितया दमस्वसुर्वतिभाते सुतरां धरापते।। 22।।**

**अन्वयः**

हे धरापते दमस्वसुः लोकयुगं श्रुतिगामितया सुतरां व्यतिभाते, दृशौ अपि (श्रुतिगामितया सुतरां व्यतिभाते), श्रुतदृष्टा रमणीयुगा अपि (श्रुतिगामितया सुतरां व्यतिभाते)।

**व्याख्या**

हे धरापते उ हे भूपते, दमस्वसुः उ दमयन्त्याः, लोकयुगं उ मातापितृकुलयुग्मं, श्रुतिगामितया उ लोकश्रवणविषयत्वेन, सुतरां उ अत्यर्थं, व्यतिभाते उ परस्परोत्कर्षेण विनिमयेन वा भाति (शोभते), दृशौ अपि उ नेत्रे अपि, दमस्वसुरिति अध्याहार्यम्। श्रुतिगामितया उ कर्णाऽन्तविश्रान्ततया, सुतरां उ अत्यर्थं, व्यतिभाते उ परस्परोत्कर्षेण, श्रुतदृष्टा आकर्णिताऽवलोकिताः, लोकतः श्रुताः स्वयं ज्ञाताश्चेति भावः। रमणीयुगा अपि सौन्दर्यौदार्यादय स्त्रीगुणा अपि, श्रुतिगामितया उ लोकतः श्रवणविषयतया, सुतरां उ अत्यन्तं, व्यतिभाते उ विनिमयेन भान्ति (शोभन्ते)।

दमयन्त्या मातृपितृकुलयुग्मं नेत्रयुगलं स्त्रीगुणा अति प्रसिद्धिपथागतत्वेन सुतरां शोभन्त इति भावः।

**नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।**

**अपि खञ्जनमञ्जनाऽश्चिते विदधाते रुचिगर्वदुर्विधम्।। 23।।**

**अन्वयः**

नलिनं मलिनं विवृण्वती, पृषतीं अस्पृशती तदीक्षणे अञ्जनाऽञ्चिते (सती) खञ्जनं अपि रुचिगर्वदुर्विधं विदधाते।

**व्याख्या**

नलिनं उ कमलं, मलिनं उ मलीमसं, असुन्दरमिति भावः, विवृण्वती कुर्वाणे, स्वसौन्दर्याऽतिशयेनेति भावः। पृषतीं उ मृगीं, अस्पृशती उ स्पर्शं अपि अकुर्वती, नेत्रसौन्दर्यस्पर्धायां मृगमपि दूरात्परिहरति इति भावः। तदीक्षणे उ दमयन्तीनयने, अञ्जनाऽञ्चिते उ कज्जलपरिष्कृते सती, खञ्जनं अपि उ खञ्जरीटं पक्षिणं अपि, रुचिगर्वदुर्विधं उ सौन्दर्याऽभिमानदरिद्रं, विदधाते उ कुर्वाते, दमयन्त्या नेत्रे सर्वथाऽप्यनुपमेये इति भावः।

**अधरं खलु बिम्बनामकं फलमस्मादिति भव्यमव्ययम्।**

**लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत्।। 24।।**

**अन्वयः**

अधरबिम्बं इति अदः पदं अस्या रदनच्छदं वदत् बिम्बनामकं फलं अस्मात् अधरं खलु इति भव्यं अन्वयं लभते।

**व्याख्या**

अधरबिम्बं उ अधरबिम्बं इत्यानुपूर्वीकं, इति उ एवं, अतः उ एतत्, पदं उ शब्दः, अस्याः उ दमयन्त्याः, रदनच्छदं उ ओष्ठं, वदत् उ अभिदधत् प्रतिपादयदिति भावः। बिम्बनामकं उ बिम्बाऽभिधेयं, फलं उ सस्यं, अस्मात् उ दमयन्तीरदनच्छदात् , अधरं उ अपकृष्टं, खलु उ निश्चयेन, इति उ अस्मात्कारणात्, भव्यं उ अबाधितम्, अन्वयं उ पदार्थसंसर्गं, लभते उ प्राप्नोति।

**हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।**

**कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम।। 25।।**

**अन्वयः**

इन्दुमण्डलं दमयन्तीवदनाय वेधसा हृतसारम् इव कृतमध्यबिलं धृतगम्भीरखनीखनीलिम विलोक्यते।

**व्याख्या**

इन्दुमण्डलं उ चन्द्रबिम्बं, दमयन्तीवदनाय उ दमयन्तीवदनं निर्मातुं, वेधसा उ ब्रह्मणा, हृतसारम् इव उ गृहीतश्रेष्ठभागम् इव, कृतमध्यबिलं उ विहिताऽन्तरच्छिद्रं, सत्, धृमगम्भीरखनीखनीलिम उ धृतगम्भीरनिम्नगर्ताकाशनैल्यं, विलोक्यते उ दृश्यते।

ब्रह्मणा दमयन्त्या मुखं निर्मातुं चन्द्रबिम्बात्सुन्दरभागो गृहीतः, अतो गृहीतसुन्दरभागे चन्द्रबिम्बे छिद्रं सञ्जातं तत्राऽऽकाशस्य नीलिमा पतितः स एव चन्द्रस्य कलङ्क इति भावः। चन्द्रः सकलङ्कः, दमयन्त्या मुखं निष्कलङ्कः। तस्माद्धेतोश्चन्द्रापेक्षया दमयन्तीवदनं मनोहकतरमिति भावः।

**धृतलाञ्छनगोमयाऽञ्चनं विधुमालेपनपाण्डरं विधिः।**

**भ्रमयत्युचितं विदर्भजाऽऽनननीराजनवर्द्धमानकम्।। 26।।**

**अन्वयः**

विधि धृतलाञ्छनगोमयाञ्चनं आलेपनपाण्डरं विधुं विदर्भजाऽऽनननीराजनवर्द्धमानकं भ्रमयति, उचितम्।

**व्याख्या**

विधिः उ ब्रह्मा, धृतलाञ्छनगोमयाञ्चनं उ गृहीतमृगचिङ्नगोमयसंश्लेषणम्, आलेपनपाण्डरं उ पिण्टोदकशुक्लवर्णं, विधुं उ चन्द्रमसं, विदर्भजाऽऽनननीराजनवर्द्धमानकं उ दमयन्तीमुखारार्तिकशरावं, किरणदीपकलिकायुक्तमिति भावः। भ्रमयति उ भ्रमणं कारयति, उचितम् उ योग्यम्, लोकोत्तरत्वादिति भावः। एवं नीराजयन्तीति देशाऽऽचारः।

सुषमाविषये परीक्षणे निखिलं पद्मभाजि तन्मुखात्।

अधुनाऽपि न भङ्गलक्षणं सल्लिन्मज्जनमुज्झति स्फुटम्।। 27।।

अन्वयः

सुषमाविषये परीक्षणे निखिलं पद्मं तन्मुखात् अभाजि, (अत एव) अधुना अपि भङ्गलक्षणं सलिलोन्मज्जनं न उज्झति स्फुटम्।

**व्याख्या**

सुषमाविषये उ परमशोभाविषये, परीक्षणे उ परीक्षायां, जलदिव्यशोधने कृते सतीति भावः। निखिलं उ समस्तं, पद्मं उ कमलं, तन्मुखात् उ दमयन्त्याननात्, अभाजि उ अभञ्जि, स्वयमेव भग्नमभूदित्यर्थः। अत एव अधुना अपि उ साम्प्रतम् अपि, भङ्गलक्षणं उ पराजयचिङ्नं, सलिलोन्मज्जनं उ जलादूर्ध्वभवनं, न उज्झति उ न जहाति, स्फुटम् उ इव, जलदिव्योन्मज्जनस्य पराजयचिह्नत्वस्मरणादिति भावः।

**धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ।**

**नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः।। 28।।**

**अन्वयः**

तद्भ्रुवौ विश्वजयाय उदिते रतिपञ्चबाणयोः धनुषी, तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः रतिपञ्चबाणयोः नलिके न।

**व्याख्या**

तद्भ्रुवौ उ दमयन्तीभ्रुवौ, विश्वजयाय उ जगद्विजयाय, उदिते उ उत्पन्ने, रतिपञ्चबाणयोः उ रतिकामदेवयोः, धनुषी उ चापौ, ध्रुवम्। एवं च तदुच्चनासिके उ दमयन्त्यन्नतनासाच्छिद्रे, त्वयि उ भवति, नालीकविमुक्तिकामयोः उ बाणप्रहाराऽर्थिनोः, रतिपञ्चबाणयोः उ रतिकामदेवयोः, नलिके न उ शराऽऽधारनलौ न? अपि तु नलिके एवोति भावः। दमयन्त्या भ्रूनासिकं दृष्ट्वा सर्वोऽपि कामवशो भवतीति तात्पर्यम्।

**सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा।**

**अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः।। 29।।**

**अन्वयः**

हे शूर जलदुर्गस्थमृणालजिद्भुजा मित्रजुषां अपि सरोरुहां श्रियः करलीलया गृहयालुः स तव परं सदृशी।

**व्याख्या**

हे शूर उ हे वीर, जलदुर्गस्थमृणालजिद्भुजा उ सलिलदुर्गस्थबिसजयिबाहुः, सा उ दमयन्ती, मित्रजुषां अपि उ अर्कसेविनां, सुहृत्सहायसम्पन्नानाम् अपि, सरोरुहां उ कमलानां, श्रियः उ शोभाः, सम्पदश्च, करलीलया उ हस्तविलासेन, बलिग्रहेण च, गृहयालुः उ ग्रहणशीला, सा उ दमयन्ती, तव उ भवतः, परं उ अत्यर्थं, सदृशी उ तुल्या, दमयन्ती भुजौ मृणालादपि कोमलौ, दमयन्त्याः पाणिः कमलादपि मनोहर इति भावः।

**वयसी शिशतातदुत्तरे सदृशि स्वाऽभिविधिं विशित्सुनी।**

**विधिनाऽपि न रोमरेखया कतसीम्नी प्रविभज्य रज्यतः।। 30**

**अन्वयः**

सदृशि स्वाऽभिविधिं विधित्सुनी शिशतातदुत्तरे वयसी विधिना रोमरेखया प्रविभज्य कृतसीम्नी अपि न रज्यतः।

**व्याख्या**

सदृशि उ सुलोचनायां, सुन्दर्यां दमयन्त्यामिति भावः। स्वाऽभिविधिं उ निजव्याप्तिं, विधित्सुनी उ विधातुम्, इच्छ्ती, शिशतातदुत्तरे उ बाल्ययौवने, वयसी उ अवस्थे, विधिना उ ब्रह्मणा, सीमाभिज्ञेनेति भावः। रोमरेखया उ लोमपङ्क्त्या, सीमाचिह्नेनेति भावः। प्रविभज्य उ प्रविभागं कृत्वा, रोमोत्पत्तेः पूर्वमत्र शैशवेन स्थातव्यं, ततः परं यौवनेनेति कालतो विभागं कृत्वेति भावः। कृतसीम्नी अपि उ विहितमर्यादे अपि उ न रज्यतः उ न सन्तुष्यतः, रम्यवस्तु दुस्त्यजमिति भावः। एतेन वयः सन्धिरुक्तः।

**अपि तद्वपुषि प्रसर्पेतोर्गमिते कान्तिझरैरगाधताम्।**

**स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ।। 31**

**अन्वयः**

कान्तिझरैः अगाधतां गमिते तद्वपुषि प्रसर्पतोः स्मरयौवनयोः द्वयोः अपि उभौ कुचौ प्लवकुम्भौ भवतः खलु।

**व्याख्या**

श्लोकत्रयेण पयोधरौ वर्णयति - अपीति। कान्तिझरैः उ लावण्यप्रवाहैः, अगाधतां उ अतलस्पर्शतां, दुरवगाहतामिति, भवः। गमिते उ प्रापिते, तद्वपुषि उ दमयन्तीशरीरे, प्रसर्पतोः उ प्रसर्पणं कुर्वतोः, प्लवमानयोरिति भावः। स्मरयौवनयोः उ कामतारुण्ययोः, द्वयोः अपि उ उभयोरपि, उभौ उ द्वौ, कुचौ उ पयोधरौ, प्लवकुम्भौ उ तरणकलशौ, भवतः उ विद्येते, खलु उ निश्चयेन, लोकेऽपि तरद्भिरनिमज्जनाय कम्भादिकमाश्रीयते इति प्रसिद्धम्।

**क्लसे निजहेतुदण्डजः किसु चक्रभ्रमङ्कारितागुणः।**

**स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यत्।।** 32

**अन्वयः**

निजहेतुदण्डजः चक्रभ्रमकारितागुणः कलसे किम् यत् स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमम् आतनोति।

**व्याख्या**

निजहेतुदण्डजः उ स्वकारणदण्डजन्यः, चक्रभ्रमकारितागुणः उ कलालभाण्डभ्रमणजनकत्वध्रमः, कलसे किम् उ दण्डकार्यरूपे घटे किम्, सङ्क्रान्त इति शेषः। यत् उ यस्मात् कारणात्, सः उ कलसः, तदुच्चकुचौ उ दममन्त्यन्नतपयोधरौ, भवन् उ सन्, दमयन्तीकुचस्वरूपेण परिणतः सन्निति भावः। प्रभाझरचक्रभ्रमम् उ प्रभाझरे (लावण्यप्रवाहे) चक्रभ्रमम् (चक्रवाकभ्रान्ति, कलालदण्डश्रमणं च), आतनोति उ प्रकरोति।

**भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः।**

**अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट्।।** 33

**अन्वयः**

दमस्वसुः चिकुरैः निर्मितबर्हगर्हणः शिखी षण्मुखं भजते खलु। दमस्वसुः कुचशोभया जितकुम्भः इभराट् अपि जम्भरिपुं भजते खलु।

**व्याख्या**

दमस्वसुः उ दमभगिन्याः, दमयन्त्या इत्यर्थः। चिकुरैः उ केशकलापैः, निर्मितबर्हगर्हणः उ कतपिच्छनिन्दः, शिखी उ मयूरः, षण्मुखं उ षडाननं, कार्तिकेयमित्यर्थः, भजते उ आश्रयते, खलु उ निश्चयेन। तथैव दमस्वसुः उ दमयन्त्याः, कुचशोभया उ पयोधरकान्त्या, जितकुम्भः उ पराजितमस्तकपिण्डः, इभराट् अपि उ ऐरावतः अपि, जम्भरिपुं उ जम्भभेदिनम् इन्द्रमित्यर्थः, भजते उ आश्रयते, खलु उ निश्चयेन, उभयत्रापि भीत्या उत्कर्षप्राप्तीच्छया वेति बोद्धव्यम्।

**उदरं नतमध्यपृष्टतास्फुरदङ्गुष्ठपदेन मुष्टिना।**

**चतुरङ्गुलमध्यनिर्गतत्रिबलिभ्राजि कतं दमस्वसुः।।** 34

**अन्वयः**

दमस्वसुः उदरं नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन मुष्टिना चतुरङ्गुलमध्यनिर्गतत्रिबलिभ्राजि कृतम्।

**व्याख्या**

दमस्वसुः उ दमयन्त्या, उदरं उ जठरं, नतमध्यपृष्ठतास्फुरदङ्गुष्ठपदेन उ निम्नमध्यप्रदेशपश्चाद्बागतास्फुटीभवद्वृद्धाङ्गुलिनयासस्थानेन, मुष्टिना उ सम्पीण्डिताङ्गुलिपाणिना, चतुरङ्गुलमध्यनिर्गतत्रिबलिभ्राजि उ अङ्गुलिचतुष्टयाऽन्तरालनिःसतबलित्रयशोभि, कृतम् उ विहितं, कौतुकिना विंधनेति शेषः। मुष्टिग्राह्यमध्येयं दमयन्तीति भावः।

**उदरं परिमातु मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ?**

**धृततच्चतुरङ्गुलीव यद्बलिभिर्भाति सहेमकाञ्चिभिः।।**

**अन्वयः**

कः अपि कुतुकी दमस्वसुः उदरं मुष्टिना परिमाति किमु ? यत् सहेमकाञ्चिभिः बलिभिः धृततच्चतुङ्गुलि इव भाति।

**व्याख्या**

प्रकारान्तरेण उदरमेव वर्णयति - उदरमिति। कः अपि उ अज्ञातनामधेयो जनः कुतुकी उ कुतूहली सन्, दमस्वसुः उ दमयन्त्याः। उदरं उ जठरं, मुष्टिना उ सम्पीण्डिताऽङ्गुलिपाणिना, परिमाति किमु उ परिच्छिनत्ति किम्? यत् उ यस्मात्कारणात्, सहेमकाञ्चिभिः उ सुवर्णमेखलासहिताभिः, बलिभिः उ तिसृभिः उदररेखाभिः, धृततच्चतुरङ्गुलि इव उ धृतपरिमात्रुङ्गुलीचतुष्टयम् इव, भाति उ शोभते।

**पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया।**

**विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम्।। 36**

**अन्वयः**

पृथुवर्तुलतन्नितम्बकृत् विधिः मिहिरस्यन्दनशिल्पशिक्षया एककचक्रचारिणं मान्मथं रथं निर्मित्सति किमु।

**व्याख्या**

पृथुवर्तुलतन्नितम्बकृत् उ विशालवृत्तजमयन्तीकटिपश्चाद्भागनिर्माता, विधिः उ ब्रह्मा, मिहिरस्यन्दनशिल्पशिक्षया उ रविरथनिर्माणाऽभ्यासपाटवेन, एककचक्रचारिणं उ एकाकिरथाऽङ्गचरणशीलं, मान्मथं उ मन्मथसम्बन्धिनं, रथं उ स्यन्दनं, निर्मित्सति किमु उ निर्मातुम् इच्छति किम्?, ब्रह्मा सूर्यस्येव मन्मथस्यापि एकचक्रं रथं निर्मातुमिच्छति किम्? इति भावः।

**तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम्।**

**तरुणीमपि जिष्णुरेव तां धनदाऽपत्यतपःफलस्तनीम्।।37**

**अन्वयः**

सुन्दरी परिणाहिना ऊरुयुगेण रम्भां तरुं परं जिष्णुः किमु धनदाऽपत्यतपः फलस्तनीं तां तरुणीं अपि जिष्णुः एव।

**व्याख्या**

सुन्दरी उ रुचिराऽङ्गी, दमयन्तीत्यर्थः। परिणाहिना उ विपुलेन, ऊरुयुगेण उ सक्थियुग्मेन, रम्भां उ रम्भां नाम, तरुं उ वृक्षं, परं उ केवलं, जिष्णुः उ जयशीला इति, किमु उ किं वक्तव्यम्, अपि तु धनदाऽपत्यतपः फलस्तनीं उ कुबेरपत्रतपःफलभूतकुचां, तां उ प्रसिद्धां रम्भां, तरुणीं अपि उ युवतीम् अपि, जिष्णुः एव उ जयशीला एव। दमयन्ती ऊरुसौन्दर्येण न रम्भां नाम तरमेव रम्भां नामाऽप्सरोविशेषमपि जितवतीति भावः।

**जलजे रविसेवयेव ये पदमेतत्पदातामवापतुः।**

**ध्रुमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्तरदम्पती।। 38**

**अन्वयः**

ये जलजे रविसेवया इव एतत्पदतां पदम् अवापतुः, ते विधिपत्त्रदम्पती एत्य रुतः सहंसकीकुरुतः ध्रुवम्।

**व्याख्या**

पद्यद्वयेन दमयन्तीचरणौ वर्णयति – जलजे इति। ये जलजे उ द्वे पद्मे, रविसेवया इव उ सूर्योपासनया इव, एतत्पदतां उ दमयन्तीचरणताम् एव, पदम् उ स्थानम् प्रतिष्ठामिति भावः। अवापतुः उ प्रापतुः। ते उ द्वे पद्मे, विधिपत्त्रदम्पती उ ब्रह्मवाहनजम्पती, ब्रह्मवाहनभतौ हंसीहंसाविति भावः। एत्य उ आगत्य, रुतः उ रवात्, कूजनादित्यर्थः। अथवा रुतः उ कजतः। सहंसकीकुरुतः उ पादकटकयुक्ते हंसयुक्ते च करुतः, ध्रुवम् उ इव।

द्वे कमले सूर्यसेवया इव दमयन्तीचरणरूपां प्रतिष्ठां प्रापतुः। दमयन्त्याश्चरणौ कमलसदृशाविति भावः। यत्र कमलं तत्र हंस आगच्छति इति उभयोः सहस्थित्या कमलसदृशौ दमयन्तीचरणौ सहंसकीकुरुतः इति शब्देन पादकटकयुक्तौ अथवा हंसयुक्तौ च करुत इव।

**श्रितपुण्यसरः सरित् कथं न समाधिक्षपिताऽखिलक्षपम्।**

**जलजं गतिमेतु मञ्जुलां दमयन्तीपदनाम्नि जन्मनि।। 39**

**अन्वयः**

श्रितपुण्यसरःसरित् समाधिक्षपिताऽखिलक्षपं जलजं दमयन्तीपदनाम्नि जन्मनि मञ्जुलां गतिं कथं न एतु।

**व्याख्या**

श्रितपुण्यसरःसरित् उ सेक्तिपवित्रकासारनदीकं, समाधिक्षपिताऽखिलक्षपं उ ध्यानयापितसमस्तरजनीकं, जलजं उ कमलं, दमयन्तीपदनाम्नि उ दमयन्तीचरणनामधेये, जन्मनि उ जनने, जन्मान्तर इति भावः। मञ्जुलां उ रमणीयाम्, उत्तमामिति भावः। गतिं उ अवस्थां, कथं उ केन प्रकारेण, न एतु उ न प्राप्नोतु, एत्वेवेति भावः।

**सरसीः परिशीलितुं मया गमिकर्मीकृतनैकनीवृता।**

**अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी।। 40**

**अन्वयः**

सरसीः परिशीलितुं गमिकर्मीकृतनैकनीवृता मया सदसत्संशयगोचरोदरी सा दृशोः अतिथित्वम् अनायि।

**व्याख्या**

तादृशी दमयन्ती त्वया कथं दृष्टेत्यत आह - सरसीरिति। सरसीः उ सरांसि, उपलक्षणमेतत् सरितश्चेति। परिशीलितुं उ परिचेतुं, विहर्तुमिति भावः। गमिकर्मीकृतनैकनीवृता उ गमनफलाश्रयीकृताऽनेकजनपदेन, मया उ हंसेन, सदसत्संशयगोचरोदरी उ भावाऽभावसन्देहास्पदोदरी, कृशोदरीति भावः, तादृशी सा उ दमयन्ती, दृशोः उ नेत्रयोः, अतिथित्वम् उ प्राधुणिकत्वं, ग्राह्यत्वम्। अनायि प्रापिता, अवलोकितेति भावः।

**अवधृत्य दिवोऽपि यौवतैर्न सहाऽधीतवतीमिमामहम्।**

**कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिन्तयम्।।** 41

**अन्वय**

अहम् इमां दिवः यौवतैः अपि सह न अधीतवतीं अवधूत्य विधातुः आशये अस्याः पतिः कतमः तु वसति इति अचिन्तयम्।

**व्याख्या**

अहम् उ हंसः, इमां उ एतां, दमयन्तीमित्यर्थः। दिवः उ स्वर्गस्य सम्बन्धिभिः, यौवतैः अपि उ युवतीसमूहैः अपि, सह उ समं, न अधीतवतीं उ न अध्ययनकर्त्रीं, स्वर्गस्थयुवतीसमूहादपि अधिकसुन्दरीमिति भावः। अवधूत्य उ निश्चित्य, विधातुः उ ब्रह्मणः, आशये उ हृदि, अस्याः उ दमयन्त्याः, पतिः उ भर्ता, कतमः उ कः, तु उ नु, वसति उ तिष्ठति, इति उ एवं, अचिन्तयम् उ चिन्तितवान्। अहं देवाङ्गनाऽभ्योऽपि सुन्दर्या अस्याः पतिर्ब्रह्मणा को निश्चित इति विमृण्टवानिति भावः।

**अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम्।**

**युवसु व्यपनेतुमक्षमस्त्यि सिद्धान्तधियं न्यवेशयम्।।**42

**अन्वयः**

अथ अनुरूपम् इमं निरूपयन् सर्वेषु अपि युवसु पूर्वपक्षतां व्यपनेतुं अक्षमः (सन्) त्वयि सिद्धान्तधियं न्यवेशयम्।

**व्याख्या**

अथ उ चिन्ताऽनन्तरम्, अनुरूपम् उ योग्यं, दमयन्त्या इति शेषः। इमं उ पतिं, निरूपयन् उ आलोचयन्, सर्वेषु अपि उ सकलेषु अपि, युवसु उ तरुणेषु, पूर्वपक्षतां उ दूष्यकौटितां, व्यपनेतुं उ निवारयितुम्, अक्षमः उ असमर्थः सन्, त्वयि उ भवति विषये, सिद्धान्तधियं उ सिद्धान्तबुद्धिं, न्यवेशयम् उ निवेशितवान्, अन्यान् यूनौ दमयन्त्या अयोगयान्विचार्य भवानेन तस्या अनुरूपर्पैतरिति निरचैषमिति भावः।

**अनया तव रूपसीमया कतसंस्कारविबोधनस्य मे।**

**चिरमप्यवलोकिताऽद्य सा स्मृतिमारूढवती शुचिस्मिता।।** 43

**अन्वयः**

चिरम् अवलोकिता अपि सा शुचिस्मिता अद्य अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे स्मितम् आरूढवती।

**व्याख्या**

चिरम् उ बहुपूर्वकाम्, अवलोकिता अपि उ दृष्टा अपि, सा उ पूर्वोक्ता, शुचिस्मिता उ शुक्लहास्या, सुन्दरी दमयन्तीति भावः। अद्य उ अस्मिन् दिने, अनया उ सन्निकृष्टस्थया, तव उ भवतः, रूपसीमया उ सौन्दर्यकाष्ठया, कृतसंस्कारविबोधनस्य उ उद्‌बुद्धभावनाऽऽख्यसंस्कारस्य, मे उ मम, हंसस्य, स्मितम् उ संस्कारमात्रजन्यं, ज्ञानं, स्मरणमित्यर्थः। आरूढवती उ आरूढा, एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवतीति भावः।

**त्वयि वीर विराजते परं दमयन्तीकिलकिञ्चितं किल।**

**तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम्।**

**अन्वयः**

हे वीर दमयन्तीकिलकिञ्चितं त्वयि परं विराजते किल। मणिहारावलिरामणीयकं तरुणीस्तन एव दीप्यते।

**व्याख्या**

हे वीर उ हे शूर, दमयन्तीकिलकिञ्चितं उ दमयन्तीश्रृङ्गारचेष्टाविशेषः, त्वयि उ भवति, परं उ एव, विराजते उ शोभते, किल उ खलु। उक्तमर्थं दृष्टान्तेन समर्थयते – तरुणीति। मणिहारावलिरामणीयकं उ मुक्ताहारपङ्क्तिसौन्दरर्यं, तरुणीस्तन एव उ युवतिपयोधर एव, दीप्यते उ सोभते।

**तव रूपमिदं तया विना विफलं पुष्पमिवाऽवकेशिनः।**

**इयमृद्धधना वृथाऽवनी स्ववनी सम्प्रवदत्पिकाऽपि का।। 45**

**अन्वयः**

(हे वीर) तव इदं रूपं तया विना अवकेशिनः पुष्पं इव विफलम्। ऋद्धधना इयं अवनी वृथा, सम्प्रवदत्पिका स्ववनी अपि का।

**व्याख्या**

(हे वीर) तव उ भवतः, इदं उ दृश्यमानं, रूपं उ सौन्दर्यम्, अनुपममिति शेषः। तया विना उ दमयन्त्या विना, अवकेशिनः उ बन्ध्यवृक्षस्य, पुष्पं इव उ कुसुमम् इव, विफलम् उ निष्फलं, निरर्थकमिति भावः। एवं च ऋद्धधना उ वृद्धवित्ता, इयं उ दृश्यमाना, अवनी उ भूमिः, वृथा उ व्यर्थप्राया, तया (दमयन्त्या) विनेति शेषः। तथैव सम्प्रवदत्पिका उ कूजत्कोकिला, स्ववनी अपि उ निजोद्यानम् अपि, का उ तुच्छा, निरर्थकेत्यर्थः, दमयन्त्या विनेति शेषः। दमयन्तीयोगे तु भवद्रूपं भूमिः उद्यानं च सर्वं सफलमिति भावः।

**अनयाऽमरकाम्यमानया सह योगः सुलभस्तु न त्वया।**

**धनसंवतयाऽम्बुदागमे कमुदेनेव निशाकरत्विषा।।46**

**अन्वयः**

अमरकाम्यमानया अनया सह योगः अम्बुदागमे धनसंवृतयानिशाकरत्विषा सह योगः कुमुदेन इव त्वया न सुलभः।

**व्याख्या**

अथ स्वाऽपेक्षां दर्शयितुं दमयन्त्या दौर्लभ्यं द्योतयति - अनयेति। अमरकाम्यमानया उ देवाऽभिलष्यमाणया, अनया सह उ दमयन्त्या समं, योगः उ सम्बन्धः, अम्बुदागमे उ मेघागमे, वर्षकाल इति भावः। धनसंवृतया उ मेघाच्छन्नया, निशाकरत्विषा सह उ चन्द्रकान्त्या समं योगः उ सम्बन्धः, कुमुदेन इव उ कैरवेण इव, त्वया उ भवता, न सुलभः उ न सुप्रापः, दुर्लभ इति भावः। अतोऽहं भैमीसकाशं गत्वा वाक्कौशलेनाऽनुरागमत्पाद्य तया सह भवतो योगं जनयिष्यामीति तात्पर्यम्।

**तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम्।**

**हृदये निहितस्तया भवानपि नेन्द्रेण यथाऽपगीयते।।** 47

**अन्वयः**

तत् अहं दमयनत्याः सविधे तथा तथा तव स्तवं विदधे, यथा तया हृदये निहितो भवान् इन्द्रेण अपि न अपनीयते।

**व्याख्या**

अथ दमयन्तीप्राप्त्युपायं प्रकाशयति – तदिति। तत् उ तस्मात्कारणात्, दमयन्तीयोगस्य दौर्लभ्यादिति भावः। अहं उ हंसः, दमयनत्याः उ भैम्याः, सविधे उ समीपे, तथा तथा उ तेन तेन प्रकारेण, तव उ भवतः, स्तवं उ स्तोत्रं, प्रशंसामिति भावः। विदधे उ विधास्ये, करिष्यामि। यथा उ येन प्रकारेण, तया उ दमयन्त्या, हृदये उ मनसि, निहितः उ स्थापितः स पतित्वेनेति शेषः। भवान् इन्द्रेण अपि उ मघोना अपि, न अपनीयते उ नो दूरीक्रियते, मनुष्येण तु का वार्तेति भावः। इन्द्रादिभिः प्रलोभिताऽपि भैमी यथा भवत्येव गाढाऽनुरागा स्यात्तथा प्रयतिष्य इति तात्पर्यम्।

**तव सम्मतिमत्र केवलामधिगन्तुं धिगदं निवेदितम्।**

**ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्।।** 48

**अन्वयः**

अत्र केवलां तव सम्मतिम् अधिगन्तुं इदं निवेदितं धिक्। हि साधवो निजोपयोगितां फलेन ब्रुवते, कण्ठेन न ब्रुवते।

**व्याख्या**

तर्हि तथैव क्रियतां, किं निवेदनेनेत्यत आह – तवेति। अत्र उ अस्मिन् कार्ये, केवलां उ एकां, तव उ भवतः, सम्मतिम् उ अङ्गीकारम्, अधिगन्तुं उ ज्ञातुम्, इदं उ पुरः प्रतिपाद्यमानं, निवेदितं उ निवेदनं, धिक् उ निवेदितस्य निन्देत्यर्थः। उक्तमर्थमर्थान्तरेण समर्थयते - ब्रुवत इति। हि उ यस्मात् कारणात्, साधवः उ सज्जनाः, निजोपयोगितां उ स्वोपकारित्वं, फलेन उ कार्येण, ब्रुवते उ बोधयन्ति, किन्तु कण्ठेन उ वाग्व्यापारेण, न ब्रुवते उ नो बोधयन्ति, निजोपयोगितामिति शेषः।

**तदिदं विशदं वचोऽमृतं परिपीयाऽभ्युदितं द्विजाऽधिपात्।**

**अतितृप्ततया विनिर्ममे स तदुद्गारमिवं स्मितं सितम्।।**49

**अन्वयः**

स द्विजाऽधिपात् अब्युदितं विशदं तत् इदं वचोऽमृतं परिपीय अतितृप्तया तदुद्गारम् इव सितं स्मितं विनिर्ममे।

**व्याख्या**

सः उ नलः, द्विजाऽधिपात् उ पक्षिस्वामिनः, हंसादिति भावः। पक्षान्तरे - ब्राह्मणप्रभोः चन्द्रादिति भावः। अब्युदितं उ आभिर्भूतं, विशदं उ प्रसन्नम् उज्जवलं च, तत् उ पूर्वोक्तम्, इदं उ अनुभूयमानं, वचोऽमृतं उ वाक्यपीयूषं, परिपीय उ सादरमाकर्ण्य, पीत्वा च, अतितृप्तया उ अतिसौहित्येन, तदुद्गारम् इव उ तदुद्वमनम् इव, सितं उ शुक्लं, स्मितं उ मन्दहास्यं, विनिर्ममे उ विनिर्मितवान्, पीतस्य शुक्लवचोमृतस्य उद्गारसदृशं स्मितमपि शुक्लं भवतीति भावः।

**परिमृज्यभुजाऽग्रजन्मना पतगं कोकनदेन नैषधः।**

**मृदु तस्य मुदेऽगिरद् गिरः प्रियवदामृतकूपकण्ठजाः।।** 50

**अन्वयः**

नैषधः भुजाऽग्रजन्मना कोकनदेन पतगं परिमृज्य तस्य मुदे प्रियवादामृतकूपकण्ठजाः गिरः मृदु अगिरत्।

**व्याख्या**

नैषधः उ नलः, भुजाऽग्रजन्मना उ बाह्वग्रोत्पन्नेन, कोकनदेन उ रक्तोत्पलेन, रक्तोत्पलसदृशेन पाणिना इति भावः। पतगं उ पक्षिणं, हंसमित्यर्थः। परिमृज्य उ संस्पृष्येत्यर्थः। तस्य उ हंसस्य, मुदे उ हर्षाय, प्रियवादामृतकूपकण्ठजाः उ इष्टवाक्यपीयूषोदपानवागिन्द्रियजाः, गिरः उ वाणीः, मृदु उ कोमलं यथा तथा, अगिरत् उ उक्तवान्।

**न तुलाविषये तवाकृतिर्न वचोवर्मनि ते सुशीलता।**

**त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा।।** 51

**अन्वयः**

(हे हंस) तव आकृतिः तुलाविषये न, ते सुशीलता वचोवर्मनि न। (अत एव) आकृतौ गुणा इति सामुद्रिकसारमुद्रणा त्वदुदाहरणा।

**व्याख्या**

(हे हंस) तव उ भवतः, आकृतिः उ आकारः, तुलाविषये न उ सादृश्यभूमौ न, त्वदीयाऽऽकृतिरसाधारणीति भावः। एवं च - ते उ तव, सुशीलता उ सच्चरित्रता, वचोवर्मनि न उ नवाक्यमार्गे न, ते सुशीलता वक्तुमशक्येति भावः। अत एव - आकृतौ उ आकारे, गुणाः उ दयादाक्षिण्यादयः, इति उ एवम्भूता, सामुद्रिकसारमुद्रणा उ सामुद्रिकशास्त्रकारसिद्धान्तप्रतिपादनं, त्वदुदाहरणा उ भवद्दृष्टान्तभूता, अस्तीति शेषः।

**न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा।**

**न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा।।**52

**अन्वयः**

ननु तावकी तनुः परं सुवर्णमयी न, किं (तु) वाक् अपि तथा (सुवर्णमयी), तथा अनवलम्बे पथि परं पक्षपातिता न, (अनवलम्बे) मादृशे अपि सा पक्षपातिता न किमु (अस्ति एव)।

**व्याख्या**

ननु उ हे हंस, तावकी उ त्वदीया, तनुः उ मूर्ति, परं उ एव, सुवर्णमयी न उ स्वर्णमयी न, किं (तु) तावकी, वाक् अपि उ वाणी अपि, तथा उ तेन प्रकारेण, सुवर्णमयी उ शोभनाऽक्षरमयीत्यर्थः, त्वदीया मूर्तिर्यथा सुर्णमयी तथैव वाणी अपि सुवर्णमयी उ सुन्दरवर्णमयीति भावः। तथा अनवलम्बे उ अवलम्बरहिते, पथि उ मार्गे, आकाशे इति भावः। परं उ एव पक्षपातिता न उ पक्षपतनशीलता न, अनवलम्बे उ निराधारे, मादृशे अपि उ मत्सदृशे अपि, पक्षपातिता उ पक्षवर्तिता, न किमु? उ नाऽस्ति किम्? अस्तेवेति भावः। तव अनवलम्बे पथि (आकाशे) एव पक्षपातिता (पक्षपतनशीलता) न, प्रत्युत मादृशे अनवलम्बे (अवलम्बरहिते) अपि पक्षपातिता पक्षवर्तिता न किमु? अस्त्येवेति भावः।

**भृशतापभृता मया भवान् मरुदासादि तुषारसारवान्।**

**धनिनामितरः सतां पुनर्गुणवत्सन्निधिरेव सन्निधिः।। 53**

**अन्वयः**

(हे हंस) भृशतापभृता मया भवान् तुषारसारवान् मरुत् आसादि। धनिनाम् इतरः सन्निधिः पुनः सतां गुणवत्सन्निधिः एव सन्निधिः।

**व्याख्या**

(हे हंस) भृशतापभृता उ अतिशयसन्तप्तेन, मया उ नलेन, भवान् उ त्वं, तुषारसारवान् उ हिमश्रेष्ठांऽशसम्पन्नः, मरुत् उ वायुः, आसादि उ प्राप्तः, सन्तापहरत्वादिति भावः। तथा हि धनिनाम् उ आढ्यानां, कुबेरादीनामिति भावः। इतरः उ अन्यः, पद्मशङ्खादिः, सन्निधिः उ उत्तमशेवधिः, पुनः उ भूयः, सतां उ विदुषां, गुणवत्सन्निधिः एव उ गुणिजनसामीप्यम् एव, सन्निधिः उ महानिधिः। हे हंस मत्कृते त्वमेव शीतलमारुतः, अन्यस्तु दहनप्राय इति भावः।

**शतशः श्रुतिमागतैव सा त्रिजन्मोहमहौषधिर्मम।**

**अधुना तव शंसितेन तु स्वदृशैवाऽधिगतामवैमि ताम्।। 54**

**अन्वयः**

त्रिजन्मोहमहौषधिः सा शतशो मम श्रुतिम् आगता एव। अधुना तव शंसितेन तु तां स्वदृशा एव अधिगताम् अवैमि।

**व्याख्या**

त्रिजन्मोहमहौषधिः उ त्रैलोक्यसम्मोहनमहौषधं, सा उ दमयन्ती, शतशः उ बहुवारं, मम उ नलस्य, श्रुतिम् उ कर्ण, आगता एव उ आयाता एव। अधुना उ इदानीं, तव उ भवतः, शंसितेन तु उ कथनेन तु, स्वदृशा एव उ आत्मदृष्ट्या एव, अधिगताम् उ ज्ञातां, दृष्टामिति भावः। अवैमि उ जानामि, आप्तोक्तिप्रामाण्यादिति भावः।

**अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च वश्यताम्।**

**सविधेऽपि न सूक्ष्मसाक्षिणी वदनाऽलङ्कृतिमात्रमक्षिणी।। 55**

**अन्वयः**

सुहृदा स्वहृदा च अखिलं अनाविलं पश्यतां विदुषां सविधे अपि न सूक्ष्मसाक्षिणी, अक्षिणी वदनाऽलङ्कृतिमात्रम्।

**व्याख्या**

स्वदृष्टेराप्तदृष्टेर्गरीयस्त्वं प्रतिपादयति - अखिलमिति। सुहृदा उ मित्रेण, आप्तेनेति भावः। स्वहृदा च उ निजाऽन्तःकरणेन च, अखिलं उ समस्तं पदार्थम्, अनाविलं उ अकलुषम्, असन्दिग्धं यथा तथा, पश्यतां उ विलोकयतां, जानतामिति भावः। तादृशानां विदुषां उ बुधानां, विवेकिनामिति भावः। सविधे अपि उ समीपे अपि, न सूक्ष्मसाक्षिणी उ सूक्ष्मपदार्थस्य अद्रष्टृणी, अक्षिणी उ नेत्रे, वदनाऽलङ्कृतिमात्रम् उ मुखाऽलङ्कारमात्रं, न तु दूरसूक्ष्मपदार्थदर्शनोपयोगिनी इति भावः।

**अमितं मधु तत्कथा मम श्रवणप्राघुणिकीकृता जनैः।**

**मदनाऽनलबोधनेऽभवत्खग धाय्या धिगधैर्यधारिणः।।56**

**अन्वयः**

हे खग जनैः मम श्रवणप्राघुणिकाकृता अमितं मधु तत्कथा अधैर्यधारिणो मम मदनाऽनलबोधने धाय्या अभवत्। धिक्।

**व्याख्या**

हे खग उ हे विहग, हंस इत्यर्थः। जनैः उ लोकैः, मम उ नलस्य, श्रवणप्राघुणिकाकृता उ कर्णाऽतिथीकृता, श्रवणविषयीकृतेति भावः। अमितं उ अपरिमितं, मधु उ क्षौद्रम्, अपरिमितमधुसमाना अतिमधुरेति भावः। तत्कथा उ दमयन्तीगुणवर्णना, अधैर्यधारिणः उ अत्यन्ताऽधीरस्य, मम उ नलस्य, मदनाऽनलबोधने उ कामाग्निप्रज्वलने, धाय्या उ सामिधेनी, अग्निसमिन्धमसमर्था ऋगिति भावः। अभवत् उ अभूत, धिक् उ अधैर्यधारिणमिति शेषः। अधैर्यधारिणो मम निन्देति भावः।

**विषमो मलयाऽहिमण्डली विषफूत्कारमयो मयोहितः।**

**बत कालकलत्रदिग्भवः पवनस्तद्विरहाऽनलैधसा।। 57**

**अन्वयः**

विषमः कालकलत्रदिग्भवः पवनः तद्विरहाऽनलैधसा मया मलयाऽहिमण्डलीविषफूत्कारमय ऊहितः बत।

**व्याख्या**

विषमः उ प्रतिकूलः, कालकलत्रदिग्भवः उ यमदिशाभवः, दाक्षिणात्यः, प्राणहर इति भाव। पवनः उ वायुः, तद्विरहाऽनलैधसा उ दमयन्तीवियोगाऽग्निकाष्ठरूपेण, मया उ नलेन, मलयाऽहिमण्डलीविषफूत्कारमयः उ नलयपर्वतसर्पसङ्घगरलफू- त्कारस्वरूपः, ऊहितः उ तर्कितः। बत उ खेदे।

**प्रतिमासमसौ निशाकरः खग सङ्गच्छति यद्दिनाऽधिपम्।**

**किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः।। 58**

**अन्वयः**

हे खग! असौ निशाकरः प्रतिमासं यत् दिनाऽधिपं सङ्गच्छति, ततः स तीव्रतरैः धैर्यतस्करैः करैः मम दाहाय सङ्गच्छति किमु?।

**व्याख्या**

हे खग! उ हे हंस!, असौ उ अयं, निशाकरः उ चन्द्रः, प्रतिमासं उ मासे मासे, यत्, दिनाऽधिपं उ सूर्यं, सङ्गच्छति उ प्राप्नोति। ततः उ सूर्यसङ्गात्, सः उ चन्द्रः, तीव्रतरैः उ अतितीक्ष्णैः, धैर्यतस्करैः उ धीरतापहिरिभिः, करैः उ करिणैः, मम उ नलस्य, कान्तावियोगिन इति भावः। दाहाय उ सन्तापाय, सङ्गच्छति उ प्राप्नोति, किमु उ उत्प्रेक्षायाम्। सूर्यसङ्गादेव चन्द्रकरेषु तीक्ष्णता, अन्यथा कथं स्यादिति भावः।

**कुसुमानि यदि स्मरेषवो न तु वज्रं विषवल्लिजानि तत्।**

**हृदयं यदमूमुहन्नमूर्मम यच्चातितमामतीतपन्।। 59**

**अन्वयः**

स्मरेषवः कुसुमानि यदि, न तु वज्रं, तत् विषवल्लिजानि। यत् अमूः मम हृदयम् अमूमुहन् यत् अतितमाम् अतीतपन्।

**व्याख्या**

स्मरेषवः उ कामबाणाः, कुसुमानि यदि उ पुष्पाणि चेत्, न तु वज्रं उ न तु अशनिः, तत्क्षणमरणाऽभावादिति भावः। तत् उ तर्हि, विषवल्लिजानि उ गरललतोत्पन्नानि। यत् उ यस्मात्कारणात्, अमूः उ स्मरेषवः, मम उ नलस्य, हृदयम् उ मनः, अमूमुहन् उ अमूर्च्छयन्, यत् उ यस्मात्, अतितमाम् उ अतिमात्रम्, अतीतपन् उ तापितवत्यः।

**तदिहाऽनवधौ निमज्जतो मम कन्दर्पशराऽऽधिनोरधौ।**

**भव पोत इवाऽवलम्बनं विधिनाऽऽकस्मिकसृष्टसन्निधिः।।60**

**अन्वयः**

तत् इह अनवधौ कन्दर्पशराऽऽधिनीरधौ निमज्जतो मम विधिना आकस्मिकसृष्टसन्निधिः (सन्), पोत इव अवलम्बनं भव।

**व्याख्या**

तत् उ तत्कारणात्, इह उ अस्मिन्, अनवधौ उ अवधिशून्ये, अपार इति भावः। कन्दर्पशराऽऽधिनीरधौ उ कामबाणमनोव्यथासमुद्रे, निमज्जतः उ अन्तर्गतस्य, मम उ नलस्य, विधिना उ भाग्येन, आकस्मिकसृष्टसन्निधिः उ अकस्मादुत्पादितसामीप्यः, मत्सौभाग्यादागत इति भावः। त्वमिति शेषः।

पोत इव उ यानपात्रम् इव, अवलम्बनं उ आलम्बनं, भव उ एधि, दमयन्तीसंयोजनेन त्वं मम कामबाणमनोव्यथासमुद्रोत्तरणहेतुर्भव इति भावः।

**अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः।**

**स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता।। 61**

**अन्वयः**

अथवा इयं नः भवतः प्रवर्तना कथं पिष्टं न पिनष्टि, हि ग्रहणानां यथार्थता यथा सतां परार्थता स्वतः एव।

**व्याख्या**

अथवा उ पक्षान्तरे, इयं उ एषा, नः उ अस्माकं, भवतः उ तव, प्रवर्तना उ प्रेरणा, कथं उ केन प्रकारेण, पिष्टं उ चूर्णितमन्नादिकं, न पिनष्टि उ न पुनश्चूर्णयति, भवतः स्वतः कर्तुत्वान्मदीया प्रेरणा पिष्टपेषणरूपेति भावः। उक्तमर्थं समर्थयते - स्वत इति। हि उ यस्मात्कारणात्, ग्रहणानां उ ज्ञानानां, यथार्थता उ याथार्थ्यं, प्रामाण्यमिति भावः। यथा उ इव, सतां उ सज्जनानां, पराऽर्थता उ पराऽर्थप्रवृत्तिः, स्वतः एव उ स्वभावत एव, यथा ज्ञानानां प्रामाण्यं स्वतस्तथैव सज्जनानां परार्थप्रवृत्तिः स्वभावत एव न तत्र प्रवर्तनाया अपेक्षेति भावः।

**तव वर्त्मनि वर्ततां शिवं, पुनरस्तु त्वरितं समागमः।**

**अपिसाधय साधयेप्सितं, स्मरणीयाः समये वयं वयः।। 62**

**अन्वयः**

हे वयः! तव वर्त्मनि शिवं वर्तताम्। त्वरितं पुनः समागमः अस्तु। अपिसाधय। ईप्सितम् साधय। समये वयं स्मरणीयाः।

**व्याख्या**

हे वयः उ हे हंस!, तव उ भवतः, वर्त्मनि उ मार्गे, शिवं उ मङ्गलं, वर्तताम् उ भवतु। त्वरितं उ शीघ्रम् एव, पुनः उ भूयः, समागमः उ सङ्गमः, मया सहेति शेषः। अस्तु उ भवतु, कृतकार्यस्य तवेति शेषः। अपिसाधय उ गच्छ। ईप्सितम् उ अभीष्टं, दमयन्त्या समं मत्संयोजनरुपमिति शेषः। साधय उ सम्पादय। समये उ कार्यकाले, वयं स्मरणीयाः उ स्मर्तव्याः।

**इति तं स विसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः।**

**अविशद्वनवेश्म विस्मितः श्रुतिलग्नैः कलहंसशंसितैः।। 63**

**अन्वयः**

धैर्यवान् ससूनृतवाग्बृहस्पतिः स नृपतिः इति तं विसृज्य श्रुतिलग्नैः कलहंसशंसितैः विस्मितः (सन्) वनवेश्म अविशत्।

**व्याख्या**

धैर्यवान् उ धैर्ययुक्तः, उपायलाभादिति शेषः। ससूनृतवाग्बृहस्पतिः उ सत्यप्रियवादेषु वाचस्पतिः, प्रगल्भ इति भावः। सः उ पूर्वोक्तः, नृपतिः उ राजा, नल इत्यर्थः। इति उ इत्थं, तं उ हंसं, विसृज्य उ प्रस्थाप्य, श्रुतिलग्नैः उ कर्णप्रविष्टैः, कलहंसशंसितैः उ हंसभाषितैः, विस्मितः उ आश्चर्ययुक्तः सन्, वनवेश्म उ उपवनभवनम्, अविशत् उ प्रविष्टः।

**अथ भीमसुताऽवलोकनैः सफलं कर्तुमहस्तदेव सः।**

**क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ।।** 64

**अन्वयः**

अथ सः अण्डजः तत् अहः एव भीमसुताऽवलोकनैः सफलं कर्तुं क्षितिजमण्डलमण्डनायितं कुण्डिनं नगरं ययौ।

**व्याख्या**

अथ उ यात्रार्थं राजाऽनुज्ञाऽनन्तरं, सः उ पूर्वोक्तः, अण्डजः उ पक्षी, हंस इत्यर्थः। तत् अहः एव उ तद् दिनम् एव, भीमसुताऽवलोकनैः उ भैमीदर्शनैः, सफलं उ साऽर्थकं, कर्तुं उ विधातुं, तस्मिन्नेव दिने दमयन्ती द्रष्टुमिति भावः। क्षितिजमण्डलमण्डनायितं उ भूमण्डलाऽलङ्कारभूतं, कुण्डिनं उ कुण्डिननामकं, नगरं उ पुरं, ययौ उ जगाम।

**प्रथमं पथि लोचनाऽतिथिं पथिकप्रार्थितसिद्धिशंसिनम्।**

**कलसं जलसम्भृतं पुरः कलहंसः कलयाम्बभूव सः।।** 65

**अन्वयः**

सः कलहंसः प्रथमं पथि लोचनाऽतिथिं पथिकप्रार्थितसिद्धिशंसिनं जलसम्भृतं कलसं पुरः कलयाम्बभूव।

**व्याख्या**

अथ श्लोकत्रयेण शुभशकुनान्याह – प्रथममित्यादिना। सः उ पूर्वोक्तः, कलहंसः उ राजहंसः, प्रथमं उ आदौ, पथि उ मार्गे, लोचनाऽतिथिं उ नेत्राऽऽगन्तुकभूतं, पथिकप्रार्थितसिद्धिशंसिनं उ पान्थेष्टार्थसाफल्यसूचकं, जलसम्भृतं उ सलिलपूर्णं, कलसं उ कुम्भं, पुरः उ अग्रे, कलयाम्बभूव उ ददर्श, यात्रासमये आकस्मिकरूपेण नेत्रगोचरः पूर्णघटः शकुनसूचको भवतीति भावः।

।।।।।

# UNIT II : Drama Ascaryacudamani of Saktibhadra

।। श्रीः ।।

## आश्चर्यचूडामणिः

(संस्कृत व्याख्योपेतः)

### प्रथमोऽङ्कः

नान्द्यन्ते।

(ततः प्रविशति सूत्रधारः)

**सूत्रधारः-**

**वीचीस्थाने सहस्रं मरतकपरिघस्पर्धि बिभ्रद्भुजानां**
**उत्फेनो हारजालैररुणरुचिरनन्ताहिरत्नप्रभाभिः।**
**बिभ्राणः शङ्खमन्तश्चरमचरमनिर्वापणीयं च तेजः**
**पायाद्वः शाङ्र्गधन्वा शयित इव समुद्रैकदेशे समुद्रः॥ १ ॥**

(परिक्रम्य नेपथ्याभिमुखमलोक्य) आर्ये! इतस्तावत्।

(प्रविश्य नटी )

**नटी-** अज्ज ! इअं म्हि । (आर्य। इयमस्मि।)

**सूत्रधारः** - आर्ये !

**अभिरञ्जनीं जनानां सहायसाध्यां गुरुपदेशेन । धुरमुद्वहामि गुर्वीं नृप इव भरतादिभिर्वोढाम्॥२ ॥**

**नटी** — अज्जस्स गरीअं दाव अहिआरं आआरो एव्व सूएदि। (आर्यस्य गरीयांसं तावदधिकार आकार एव सूचयति।)

**सूत्रधारः**—अथ किम् |सुन्दरि ! ननु बहूनामसाधारणो दुर्गमः पन्थाः।

**नटी** - अज्ज! किं असाहारण ति पुच्छदि। (आर्य! किमसाधारणमिति पृच्छयते।)

**सूत्रधारः**—आर्ये! दक्षिणापथादागत माश्चर्यचूडामणि नाम नाटकमभिनयांम्रेडित सौभाग्यमभिलषाम इत्यार्यमिश्राणां शासनम्।।

**नटी–** अज्ज ! अच्चाहिदं खु एदं, आआसं पसवइ पुप्फं, सिअदांओ तेल्लं उप्पादअंति, जइ दक्खिणाओ दिसाओ आअदं णाडअंणि बन्धणम्। ( आर्य ! अत्याहितं खल्वेतत् आकाशं प्रसूते पुष्पम् सिकताः तैलमुत्पादयन्ति, यदि दक्षिणस्याः दिशः आगतं नाटकनिबन्धनम्।)

**सूत्रधारः—** आर्ये ! मा मैवम् । उपचिनु गुणम्, अपहस्तय जन्माभिनिवेशम् | पश्य

**गुणाः प्रमाणं न दिशां विभागः निदर्शनं नन्विदमेव तन्त्र ।**

**स्तनद्वये ते हरिचन्दनं च हारश्च नीहारमरीचिगौरः ॥ ३ ॥**

**नटी–** (आत्मानं विलोक्य) जुज्जइ, रअणाअरो खु सो देसो। अज्ज! कदमो उण सो कबी जो अत्तणो पञ्ञारूवं णिबन्धणव्वाजेण देसंतरं पेसिदुकामो। (युज्यते, रत्नाकरः खलु स देशः। आर्य! कतमः पुनः स कविः य आत्मनः प्रज्ञारूपं निबन्धनव्याजेन देशान्तरं प्रेषितुकामः।)

**सूत्रधारः** – आर्ये! श्रृयताम्। उन्मादवासवदत्ता- प्रभृतीनां काव्यानां कर्तुः कवेः शक्तिभद्रस्येदं प्रज्ञाविलसितम्। अतस्त्वमपि पात्रावधानं कुरुष्व। अहमण्यार्यमिश्रान् विज्ञापयामि अये! किन्तु खलु मयि विज्ञापनव्यग्रे शब्द हव श्रूयते। अङ्ग पश्यामि।

(नेपथ्ये ज्याघोषः क्रियते)

**सूत्रधारः** – भवतु विज्ञातम्।

**सपत्नीकस्य रामस्य वर्तयन् वन्यमास्पदम्।**

**ज्याघोषेणैव सौमित्रिः पक्कान् सत्वान् व्यपोहति॥४ ॥**

(निष्कान्तौ)

|| स्थापना ||

(ततः प्रविशति धनुर्वाणपाणिर्लक्ष्मणः)

**लक्ष्मणः–**

**ज्याघोषेण निराकरोमि भयदान् पर्यन्तभाजो मृगान्**

**पर्णैस्सद्म समापयामि शयनं बध्नामि पुष्पच्छदैः।**

**वेत्राणामुपपादयामि वलयैरायामिनां विष्टरं**

**सिञ्चामि क्षितिमार्द्रपङ्कजरजोविद्धैरपां रेणुभिः॥५॥**

(तथा कृत्वा) कथञ्चिदेवमनुष्ठितमार्यशासनम्| अहो! नु खलु विपन्नानामवस्था मेधाविनी यावदिमां पर्णशालां परिसमाप्तां तावत् गोदावर्यास्तटैकदेशे तरङ्गमारुतैरध्वपरिश्रममपनयन्तमार्यमार्यया सार्धं विज्ञापयामि।

(परिक्रम्यावलोक्य)

अये अरण्यविरुद्धेयमाकृतिः। तथा हि–

**अस्यातिमात्रायतलोचनस्य**

**नतभ्रुणः कम्रपयोधरस्य।**

**आश्चर्यरत्नस्य विलासयोनेः**

**किमाकगे द्यौर्नु वसुन्धरा नु ॥ ६ ॥**

(चित्तविकारं निरूप्य)

किमिदम् नन्वहं रामानुजो लक्ष्मणः।

**सनाथीकुर्वाणा धरणिमथवा घाम मरुतां**

**भवेदेषा कामं विरमतु वितर्कश्चलधियाम्।**

**वचः कर्तुं पित्रोर्वनमिदमवाप्तस्य वशिनो।**

**वशे तिष्ठन् भ्रातुः स्मरपरवशः स्यां कथमहम्॥७॥**

(ततः प्रविशति ललितसुकुमारवेषा शूर्पणखा)

**शूर्पणखा** - (लक्ष्मणं निरूप्य) हं अअं वि सो एव्व। (हं अयमपि स एव।) (व्रीडां नाटयति)

**लक्ष्मणः**–प्रतिकूलमदमाचरितम्। यदेषा–

**आचाराननुचरता तपोधनानां**

**सावज्ञं परुषतरं मयेक्षितापि।**

**सव्रीडा वदनमधः करोति कम्पात्**

**उत्तंसप्रगलितषट्पदेन मूर्ध्ना ॥ ८ ॥**

**शूर्पणखा – (**स्वगतम्) किं णु खु अअं वि भणिस्सदि, होदु एत्तिअं दाव कहइस्सम् । (प्रकाशम् ) अज्ज ! इदो दाव। ( किं न खलु अयमपि भणिष्यति, भवतु एतावत्तावत् कथयिष्ये। आर्य ! इतस्तावत्।)

**लक्ष्मणः**- न समाधिः स्त्रीषु लोकज्ञः। ( तूष्णीं गच्छति)

**शूर्पणखा – (** किञ्चिदनुगम्य) अज्ज! असदिसं विअ अज्जस्स सरणाअदस्स उवक्खणं इत्थिआजणस्स। (आर्य! असदृशमिव आर्यस्य शरणागतस्य उपेक्षणं स्त्रीजनस्य।)

**लक्ष्मणः**- न हि न हि मयोपेक्ष्यते भवती साम्प्रतमवस्थान्तरशोचनीयस्य गुरोरलङ्घनीयेन शासनेन खलु।

**शूर्पणखा** - जइ एव्वं, इमं वि जणमन्तरेण आण्णा गुरुजणस्स ण खु दाव उवक्खणं अरुहदि। (यद्येवम्, इममपि जनमन्तरेण आज्ञा गुरुजनस्य न खलु तावदुपेक्षणमर्हति।)

**लक्ष्मणः–** (सरोषम्) आः कस्तावन्मामाज्ञापयति।

**शूर्पणखा –** (भयं निरूप्य) पसीददु पसीददु अज्जो। अज्जो एव्व रामो आणवेदि। (प्रसीदतु प्रसीदत्वार्यः। आर्य एव राम आज्ञापयति।)

**लक्ष्मणः–** (स्वगतम्) हन्त पूर्वमनया दृष्टः खल्वार्यः, भवतु, प्रसादयामि गुरुवचनमुहूर्त–भाजनीभूतामत्रभवतीम्। (प्रकाशम्) भद्रे! किमाज्ञापयत्यार्यः।

**शूर्पणखा** – सुणोदु अज्जो। (शृणोत्वार्यः)

**लक्ष्मणः** – अवहितोऽस्मि।

**शूर्पणखा** – अज्ज ! मए सह अत्तणो परिअरणं अज्जरामो आणवेदि| (आर्य ! मया सह आत्मनः परिचरणम् आर्यरामः आज्ञापयति।)

**लक्ष्मणः**– (हस्तं परावृत्य) पश्य–

**वासो वल्कलमास्पदं विटपिनो वन्यं शरीरस्थितिः**

**शय्या दर्भलता प्रसाधनमपां वर्षी जटानां भरः।**

**बाले ! किं बहुना वने वनमृगन्यायस्य न त्वं पदं**

**सारङ्गाक्षि ! तपोभृतः क्व तपसां शत्रुः क्व सङ्कल्पजः ॥९॥**

**शूर्पणखा–** अलीअं अलीअं एदं। णं सो अज्जो अज्जाए सह वत्तदि। (अलीकमलोकमेतत्। ननु स आर्य आर्यया सह वर्तते।)

**लक्ष्मणः**– भद्रे ! न जानासि परमार्थतो वृत्तमार्यस्य|

**शूर्पणखा** – किं किं।

**लक्ष्मणः** – यावदार्यस्तीर्णप्रतिज्ञः प्रकृतिमण्डलं गुरुजनं भरतं च न पश्यति, तावदेकमेव धर्ममवलम्बते ।

**शूर्पणखा–** जइ एव्वं एत्थ सा किं करोदि। (यद्येवमत्र सा किं करोति ।)

**लक्ष्मणः**– यदहं करोमि ।

**शूर्पणखा**– जह अज्जं सा उवअरदि तह तुमं वि अहं उवअरिस्सम्। (यथा आर्य सा उपचरति तथा त्वामप्यहमुपचरिष्यामि।)

लक्ष्मणः – भद्रे ! इदमपि प्रार्थनीयम्। पश्य–

**यतते यस्य निष्कृत्यै जनस्सर्वोऽपि बुद्धिमान्।**

**दास्यं तत्स्वयमिच्छन्ती मुग्धा त्वं मुग्धलोचने!॥१० ॥**

**शूर्पणखा** – अज्ज ! कि सिणेहो तुलअदि गुणदोसाणि। (आर्य! किं स्नेहस्तुलयति गुणदोषान्।)

**लक्ष्मणः–** (आत्मगतम्) एवं व्याहरन्तीमेनां किमिति प्रत्यादिशामि। (विचार्य) भवतु दृष्टम्। (प्रकाशम्) भद्रे ! आर्यस्य पर्णगृहप्रवेशानन्तरमत्रभवतीमभिप्रेतस्थाने द्रक्ष्यामि।

**शूर्पणखा–** जइ एव्वं अज्ज ! तस्स पण्णसालस्स पस्सदो एव्व पडिवालइस्सम्। (यद्येवमार्य ! तस्याः पर्णशालायाः पार्श्वत एव प्रतिपालयिष्यामि।)

**लक्ष्मणः–** (आत्मगतम्) अस्तु कामं नास्त्यनन्तरायः कालक्षेपः। (प्रकाशम्) यदभिप्रेतं भवतु भवत्यै।

**शूर्पणखा–** जं अज्जो आणवेदि। (यदार्य आज्ञापयति।)

(इति निष्कान्ता)

**लक्ष्मणः–** (सविमर्शम्) परीक्षास्पदमेषा। कुतः–

**क्वेदं वनं वनचरैरपि दुर्विगाहं**

**क्वेयं वधूः कुवलयच्छविचोरनेत्रा।**

**हेमारविन्दमकरन्दरसोपयोगां**

**कः श्रद्दधीत जलधौ कलहंसकन्याम् ।। ११ ।।**

एष पूर्वोद्दिष्टः प्रदेशः।

(ततः प्रविशति रामः सीता सह)

रामः– देवि! नगराधिवासात् सविशेष इव वनाधिवासो मे प्रतिभाति। पश्य–

**उद्यानं वनभूमयः कुसुमितैरुद्रन्धयः पादपैः**

**शैला निर्झरहासिनो जलधरश्यामा गिरिः कृत्रिमः।**

**नद्यः सारसमूर्च्छितोर्मिवलया धर्माभिषेकास्पदं**

**शीताः शीकरसङ्गमात् सुरभयो मित्रं सरोजानिलाः॥ १२ ॥**

**सीता** – अज्जउत्त! जाव अहं जीवामि दाव एत्थ एव्व वसिदुं मे बुद्धी जइ तह ण किलंमदि साकेदे गुरुजणो। (आर्यपुत्र ! यावदहं जीवामि तावदत्रैव वस्तुं मे बुद्धिः यदि तथा न क्लाम्यति साकेते गुरुजनः।)

**लक्ष्मणः –** (विलोक्य) अये ! श्यमार्यः, अहो ! नु खलु कष्टं विधेः कर्म, नहि नहि कैकेय्याः। अम्ब! कैकेयि!

**आर्येणांशुकमुज्झता धृतमभूदापाटलं वल्कलं**

**विन्यस्तं पदमार्यया वृकवधूपादाङ्कपांसौ पथि।**

**सन्तापैस्तनुतामुपैति भरतः पर्याकुलाः कोसलाः**

**वैधव्यं हतमास्थिता त्वमपि ते धिक्कर्म सर्वङ्कषम् ॥ १३ ॥**

यावदार्यमुपसर्पामि। (उपसृत्य) जयत्वार्यः।

**रामः**- लक्ष्मण ! किमवसितस्तवारम्भः।

लक्ष्मणः - आर्य ! अथ किम् ।

**रामः**- तेन हि तस्य मार्गमादेशय।

लक्ष्मणः –यदाज्ञापयत्यार्थः। इत इतः।

(सर्वे परिकामन्ति)

रामः- ( लक्ष्मणस्य मुखरागं विलोक्य) वत्स ! लक्ष्मण !

**मार्गे निर्वृतिमार्गमार्गणपरानाराधयन्तो मुनीन्**

**स्वैरं सेविततीर्थसिन्धुपयसो दूरं निरस्ताधयः।**

**मात्रा लक्ष्मण ! केकयेन्द्रसुतया व्याजेन नीता वयं**

**स्वामुत्सृज्य धुरं भुवो मुनिवनं यातव्यमिक्ष्वाकुभिः॥ १४ ॥**

**लक्ष्मणः**- सत्यमाह लोकः "न सन्त्यगुणा गुणवताम्" इति।

**रामः** - लक्ष्मण ! कि नाद्यापि शान्तस्ते मातरि संरम्भः।

**लक्ष्मणः** - आर्य !

**मात्रोः प्रस्नविभिस्स्तनैस्त्वयि मुदा सम्फुल्लदृष्ट्योस्तयोः**

**तातस्याश्रुजलैस्समं शिरसि ते हैमात् क्षरन्थ्यो घटात्।**

**आपस्तत्र वसिष्ठमन्त्रजयिना मन्त्रेण रुद्धा यया**

**तां लोकोत्सवकालरात्रिमदयां मन्ये कथं मातरम्।।१५ ।।**

**रामः** - (कर्णौ पिधाय) शान्तं पापं शान्तं पापम्।

**हते राज्ये भवान् भक्त्या प्रत्याचष्टे स्वमातरम्। अहो ! सन्तोषबाह्यानामधर्मैकरतं मनः ॥ १६ ॥**

पश्य बाल ! पापात्मनः क्षत्रियस्य -

**साधारणी नयविदां धरणिः कलत्रं**

**अस्त्राणि मित्रमरयः सहजाः सुताश्च।**

**पापात् परस्य पतनं नरकेषु लाभः**

**द्वे चामरे च सितमातपवारणं च ॥ १७ ।।**

**लक्ष्मणः**- नाहं राज्याभिलाषाद्ब्रवीमि।

**रामः–** किमन्यत्तव कोपकारणम् ।

**लक्ष्मणः** – विपर्यस्तः क्रम इति ।

**रामः** - यद्येवमहं तव प्रथममुपालम्भविषयः। पश्य–

**इन्द्रकल्पे स्थिते राशि स्नेहपर्यश्रुलोचने।**

**अभिषेकाय निर्लज्जो यस्सिंहासनमास्थितः॥ १८ ॥**

**सीता–** सच्चं एव्व भणिदं अज्जउत्तेण। (सत्यमेव भणितमार्यपुत्रेण।)

**लक्ष्मणः**– "वयसा परिणतोऽहं" इति तातस्तथा त्वयि प्रतिपन्नः।

**रामः**– ननु भरतः कनीयान् मे।

**लक्ष्मणः**– अहमशक्तः पृथिवीं रक्षितुमिति।

**रामः** – बाल ! पश्य–

**न कथं रक्षितुं शक्तः पृथिवीमात्मदेवताम्।**

**दानवोन्मूलनं तेजो यस्य द्यामपि रक्षति ॥ १९ ॥** **लक्ष्मणः**– किन्तु पुत्रस्नेहात्तथा चापल्यं कृतमिति।

**रामः–** एष लोकस्वभावः बहुपुत्राणामेकस्मिन् ईषत्पक्षपातः। तव किं साधारणो भ्रातृस्नेहः।

**लक्ष्मणः**– किं बहुना, सर्वथा तातस्य मरणकारणं सैव संवृत्ता।

**रामः**– मा मा। तातं प्रति निरपराधः स गुरुजनः। पश्य–

**नियमसलिलं पित्रोर्हेतुं निरीक्षणवन्ध्ययोः**

**क्षिपति कलशं तोयाधारे पटुध्वनितं सुते।**

**उषसि मृगयां याता राज्ञा वनद्विपशङ्कया**

**रभसमिषुरुन्मुक्तः कालादसूनहरत् स्वयम्॥ २० ॥**

**सीता** – जुज्जइ तादिसेण विहिणा होदव्वम्। का उण अण्णहा अत्ताणं लोअं अ विणासेदि। (युज्यते तादृशेन विधिना भवितव्यम्। का पुनरन्यथा आत्मानं लोकं च विनाशयति।)

**लक्ष्मणः–** यद्येवमहमेवापराद्धः। प्रसीदत्वार्यः। कथाप्रसङ्गादविदितान्तरमागतास्स्मः पर्णशालाम्। प्रविशत्त्वार्यः।

**रामः**– लक्ष्मण ! त्वयाप्ये कान्ते परिश्रमोऽपनीयताप्।

**लक्ष्मणः**– यदाज्ञापयत्यार्थः। (इति निष्कान्तः)

रामः- (पर्णशालां प्रविश्य सर्वतो विलोक्य सविस्मयम्) देवि ! पश्य पश्य सर्वतोमुखनैपुण्यं वत्सलक्ष्मणस्य। इह हि-

**धनुर्ज्यानिर्घोषैस्सरभसमपास्तं मृगकुलं**

**कृता पर्णैश्शाला शयनमपि पुष्पैः प्रतिनवैः।**

**लताभिर्वेत्राणां विरचितमभूदासनमिदं**

**जलैस्सिन्धोः सिक्ता बलिकुसुमभाजो वनभुवः॥२१॥**

**सीता** - अज्जउत्त! कुसुमपल्लवसमिद्धिहिं पण्णसालाविभूदिहिं कदत्थिदो पासादबहुमाणो। (आर्यपुत्र ! कुसुमपल्लवसमृद्धिभिः पर्णशालाविभूतिभिः कदर्शितः प्रासादबहुमानः।)

**रामः**- देवि ! विविक्तं च स्थानमिदम्। सेव्यतां वनान्तमारुतः। तथाहि-

**अशङ्किता शिथिलय पांसुधूसरं**

**स्तनांशुकं शुकहरितं शुक्रालपे! |**

**विशोषिताधरकमलं विसर्पता**

**तरङ्गितं तव मुखगन्धवाहिना ॥ २२ ॥**

**सीता—** जं अज्जङत्तो आणवेदि। (यदार्यपुत्र आज्ञापयति।)

(निष्कान्तौ)

इति शक्तिभद्रविरचिते चूडामणिनाटके

प्रथमोऽङ्कः ।

## व्याख्यानम्

तेजोऽशुकुलसम्भूतं रक्षोवंशविनाशकम् ।

साकेताकाशराकेशं रामचन्द्रं नमाम्यहम् ॥

वीणापाणिं नमस्कृत्य वाणीरूपां सरस्वतीम् ।

चुडामणे 'रमा' टीका 'रमाकान्तेन' तन्यते ॥

नान्यन्त इति ॥ नान्द्याः = आशीर्वचनात्मिकायाः स्तुतेः, अन्ते = समाप्तौ। ततः= नान्दीपाठानन्तरम्, सूत्रधारः = सूत्रं (कथासूत्रम्) धारयतीति सूत्रधारो नटा-ध्यक्षः, प्रविशति = रङ्गशालायां प्रवेशं करोति ।

सूत्रधार इति॥ अथ तत्र भवान् दक्षिणदेशाऽलङ्कारभूतशक्तिभद्रनामा कविवरो मर्यादापुरुषोत्तमस्य भगवतो रामस्य वनवासादारभ्य लंकाविजयान्तश्चरितमवलम्ब्य 'आश्चर्यचूडामण्यभिधानं नाटकं कर्तुकामो निर्विघ्नपूर्वकं प्रारिप्सितसमाप्ति- फलकमाशीर्वादं

सूत्रधारमुखेन नाट्यादौ सामाजिकान् प्रति 'वीचीस्थाने' इत्यादिना निबध्नाति। अत्र च "नान्द्यन्ते ततः प्रविशति सूत्रधारः" इति कथनेन अस्मादाशीर्वादात् प्रागेव देवतास्तुतिरूपाया नान्द्याः कृतत्वेन कथासूत्रधारस्यैवाऽयमाशीर्वादो न नान्दीसूत्रधारस्येति सुधीभिरवगन्तव्यम्।

वीची स्थाने इति॥ मरतकपरिघस्पर्धि भुजानाम् सहस्रम् वीचीस्थाने विभ्रत्, हारजालैः उत्फेनः, अनन्ताहितरत्नप्रभाभिः अरुणरुचिः, शङ्खम् विभ्राणः, अन्तः चरम् अचरम् अनिर्वापणीयं तेजः च विभ्राणः, समुद्रकदेशे शयितः अपरः समुद्र इव शाङ्र्गधन्वा वः पायात् इत्यन्वयः। मरतकपरिधस्पर्धि = मरतकमयैः=हरिन्मणिनिर्मितः, (पन्ना इति लोके) परिघैः = परिघातनैः, ( सींखचा इति लोके ) स्पर्धितुम् = तुलयितुं शीलं यस्य तत्, यद्यपि कोषादौ 'मरकत' इत्येव दृश्यते तथाप्यत्र देश-भेदात् वर्णविपर्ययाद् वा मरतक इत्यपि पाठो कथञ्चिद् भवेदपि। अत एव कविना 'मरतक' इति पाठो मूले कृतो भवेत्। भुजानाम् = बाहूनाम्, सहस्रम् = दशशतानि, वीचीस्थाने = तरङ्गस्थाने, विभ्रत् = धारयन्, हारजालैः= मुक्तावलीसमूहैः, उत्फेनः = उत्कृष्टफेनः, अनन्ताहिरत्नप्रभाभिः = अनन्तस्य आहेः = शेषस्य, समुद्रपक्षे अनन्तानाम् अहीनाम्, रत्नप्रभाभिः = रत्नविभाभिः, अरुणरुचिः = रक्तशोभः, शङ्खम् = कम्बु, विभ्राणः। अत्रशङ्खशब्दो भगवद् भुजान्तरव- र्तिनामायुधान्तराणामप्युपलक्षकः। समुद्रपक्षे शङ्खम् = निधिम् कम्बु च, समुद्रो हि शङ्कानां निधीनाञ्चोत्पत्तिस्थानम्। अन्तः = उदरे, चरमचरम् = चराचरात्मकञ्जगत् (बिभ्राणः) समुद्रपक्षे चरम् = जङ्गमञ्जलमानुषादिकम्, अचरम् = स्थावरं पर्वतादिकम्, अन्तः = हृदये, अनिर्वापणीयम् = अविनाश्यम्, नित्यमिति यायत्, तेजः = ब्रह्मज्योतिः, समुद्रपक्षे और्वाग्निम्, बिभ्राणः समुद्रस्य = क्षीरसागरस्य, एकदेशे = एकभागे, (शेषे ) शयितः अपरः = अन्यः ( शुद्धजलमयः), समुद्र इव = सागर इव (परिलचयमाणः), शाङ्र्गधन्वा = विष्णुः वः = युष्मान्, पायात् = रक्षतु। स्रग्धरा वृत्तम्। तरुलक्षणं हि-म्रभ्नैर्यानात्र्येण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्। शिलष्टोपमाऽलंकारः ॥१॥

परिक्रम्येति ॥ विघ्नविनाशफलकमाशीर्वादं विधाय भारतीवृत्तेरङ्गभूताऽऽमुखप्रस्तावाय परिक्रमणम्, नेपथ्यम् = पात्रवेशपरिवर्त्तनस्थानम्, तदभिमुखम् = तस्यां दिशि, अवलोक्य = अवलोकयितुं विधाय, नाट्यप्रयोगसहायभूतां नटीं सम्बोधयति- आर्य इति॥

अभिरञ्जनीमिति॥ जनानाम् अभिरञ्जनीम्, गुरूपदेशसहायसाध्याम्, भरतादिभिः ऊढाम्, गुर्वीं वा धुरम् नृप इव उद्वहामि, इत्यन्वयः। जनानाम् = सामा-जिकानाम्, नृपपक्षे प्रजानाम् अभिरञ्जनीम् जनानुरागफलवतीम्, गुरूपदेशेन = गुरूणाम् = सेवाभिः प्रसादितानाम् महातीर्थानाम् उपदेशेन = शिक्षापूर्वकोपदेशेन, सहायसाध्याम् = सहायैः = तत्तत्पात्रोचितपाठगीतिगतिरसप्रयोगादिनिपुणैः, नृपपचे- अमात्यादिसहायभूतैः सह साध्याम् = निष्पाद्याम्, भरतादिभिः = नाट्यप्रयोगप्रवर्त्तकैः भरतप्रभृतिभिः, नृपपक्षे - भरताख्यप्रभृतिभिः नृपतिभिः, ऊढाम्= धारिताम्, (अत एव) गुर्वीम् = प्रयोगसाफल्येन गरीयसीम्, वा = च (अत्र वा शब्दश्चकारार्थकः) धुरम् = नाट्यप्रयोगात्मकं भारम्, नृपपक्षे - राज्यभारम्, नृप इव = राजा इव, उद्वाहामि = धारयामि। यथा अर्वाचीनो राजा प्राक्तनैः राजन्यैः भरतादिभिरूढां धुरमुद्वहति तथैवाहमपि नाट्यसम्प्रदायप्रवर्त्तकैर्भरतादिभिर्निर्दिष्टां नाट्य- प्रयोगात्मिकां धुरमुद्वहामीति भावः। आर्या वृत्तम्। तल्लक्षणं हि “यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या॥" श्लिटोपमाऽलङ्कारः॥ २ ॥

दक्षिणापथादिति॥ दक्षिणापथात् = दक्षिणदिशः, आगतम्=आयातम्, आश्चर्यचूडामणिम् = आश्चर्यकराणाम् = विस्मयोत्पादकानाम्, चूडामणिः = शिरोरत्नम् इति आश्चर्यचूडामणिः, नाटकाख्य निबन्धनस्य संज्ञा। अथवा आश्चर्यभूतः विस्मयरूपः चूडामणिः यत्र प्रतिपाद्यत्वेन स्वीकृतः तन्नाटकम् = रूपकप्रधानमस्तीति शेषः। तद्धि नाटकम् अभिनयैः =

वाचिकाङ्गिकाहार्यसात्विकैः, आम्रेडितम् = द्विगुणीकृतम्, सौभाग्यं यस्य तदभिलषामः = कर्तुमिच्छामः, आर्यमिश्राणाम् = श्रेष्ठजनानाम् सभ्यानामिति यावत्। शासनम् = आदेशः। शक्तिभद्रविरचिताऽऽश्चर्यचूडामणिनामकं नाटकं प्रयोगपथे आनेयमिति प्रेक्षकाणामाग्रहः ।

अत्याहितमिति॥ अस्याहितम् = आहितम् = स्थितम्, तदतिक्रम्य वर्त्तते इति अत्याहितम् = असङ्गतम्, असम्बद्धमित्यर्थः। आकाशं प्रसूते इति॥ यथा आकाशे कुसुमम्, सिकतासु च तैलमलीकं तथैव प्रविरलविद्वज्जनदक्षिणापथान्नाटकात्मक निबन्धागमन- मलीकमेवेति भावः ॥

अपहस्तयेति। अपहस्तय जन्माभिनिवेशम् = जन्मनः अभिनिवेशः, जन्मभूमि मुद्दिश्य यः अभिनिवेशः = दोषग्रहणाग्रहः, तम्, अपहस्तय = परित्यज ॥

गुगाः प्रमाणमिति॥ गुणाः प्रमाणम्, दिशाम् विभागः न (प्रमाणमिति शेषः) ते स्तनद्वये हरिचन्दनम् नीहारमरीचिगौरः हारश्च तत्र इदम् एव निदर्शनम् ननु इत्यन्वयः। गुणाः = आनन्दादिजनक कलाविशेषादयः, प्रमाणम् = कारणम्, दिशाम् = आशानाम्, विभागः = विभजनम्, न (प्रमाणमिति शेषः) ते = तव, स्तनद्वये = कुचद्वये, हरिचन्दनम् = दक्षिणस्याः दिशः आगतम्मलयजचन्दनम्, नीहारमरीचिगौरः = हिमालयात् आगतानाम्, नीहाराणाम् = तुषाराणाम्, मरी चिभिः = किरणैः, गौरः = शुभ्रः, हारः = मुक्तावली च, इदमेव = पूर्वोक्तमेव, तत्र = दोषगुणहानोपादाने, निदर्शनम् = उदाहरणम्। भिन्न देशाभ्यामागतयोर्हरिचन्दनयो-स्त्वस्कुच्चयुगे सन्निवेशः गुणा एव उपादाने कारणं न दिशाम्विभाग इति समर्थयति। उपजाति वृत्तम्। तल्लक्षणं हि -"अनन्तरोदीरितलचमभाजौ पादौ यदीयाबुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम| विशेषालङ्कारः॥ ३ ॥

रश्नाकर इति ॥ रत्नाकरः = रत्नानाम् = नाट्य-कलानिपुण कवीनाम् (अत्र रत्न शब्दस्य प्रासङ्गिकी व्याख्या बोध्या) आकरः = उत्पत्तिस्थानम्, स देशः = पूर्वोक्तः दक्षिणापथः, आत्मनः = स्वस्थ, प्रज्ञारूपम् = प्रज्ञा = ज्ञानम्, तद्रूपम् = ज्ञानस्व रूपम्, निबन्धनव्याजेन = नाटक रूपकाव्यवन्धच्छलेन, देशान्तरम् = अन्यो देशः देशान्तरम् = अन्यदेशम्,

प्रज्ञाविलासितमिति॥ प्रज्ञाविलसितम् = ज्ञानविलासः। विज्ञापनव्यग्रे = कर्मव्यावृते मयि इति।

नेपथ्ये इति॥ नेपथ्यम् = पात्र-वेश-रचना-स्थानम् तस्मिन्, ज्याघोषः = मौर्व्वीरवः। विज्ञातमिति ॥

विज्ञातम् = विशेषेण अवगतम् ॥

सपत्नीकस्येति॥ सपत्नीकस्य रामस्य वन्यम् आस्पदम् वर्तयन् सौमित्रिः ज्याघोषेणैव पक्वान् सत्वान् व्यपोहति इत्यन्वयः। सपत्नीकस्य = भार्यासहितस्य, रामस्य = भरताग्रजस्य, वन्यम् आस्पदम् = निवासोपयुक्ताम् पर्णकुटीम्, वर्त्तयन् = सम्पादयन्, सौमित्रिः = सुमित्रासूनुः लक्ष्मणः, ज्याघोषेणैव = मौर्वीटङ्कारेणैव, पक्वान् = विपरिणामावस्थां प्राप्तान्, परिणतानित्यर्थः (प्राप्तयौवनत्वेन अतिदृप्तान् इति यावत्) सत्वान् = सिंहव्याघ्रादीन् हिंसकजन्तून्, व्यपोहति = निरस्यति, दूरीकरोतीत्यर्थः। अनुष्टुब्वृत्तम्| तवलक्षणं हि — “श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चकम्। द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥” ४ ॥

स्थापनेति॥ स्थापना = आमुखम्। अत्र प्रयोगतिशयरूपाऽऽमुखभेदेन पात्रप्रवेशः सूचितः॥

(ज्याघोषेणेति। पर्यन्तभाजो भयदान् मृगान् ज्याघोषेण निराकरोमि, (अहमिति सर्वत्र योज्यम्) पर्णैः सद्म सभापयामि, पुष्पच्छदैः शयनम् बध्नामि, वेत्राणाम् वलयैः आयामिनाम् विष्टरम् उपपादयामि, अपाम् आर्द्ररजोविद्धैः रेणुभिः क्षितिम् सिञ्चामि इत्यन्वयः। पर्यन्तभाजः = पर्यन्तान् = परिसरान् नदीपर्वत- समीपवर्तिनः प्रदेशान् भजन्तीति पर्यन्तभाजः परिसरनिवासिनः, भयदान् = भीतिप्रदान् मृगान् = सिंहादिपशून्, अत्र मृगशब्दः पशुसामान्यवाचकः। ज्या -घोपेण = मौर्वीरवेण, निराकरोमि = दूरं नयामि, पर्णैः = पत्रैः सद्म = गृहम् समापयामि = सम्पादयामि, पर्णशालायाः पर्णवाहुल्यात् तन्निर्माणे तेषां प्रधानकारण-त्वात् पणरित्युक्तम्। अत्र पर्णशब्देन पर्णकुटीनिर्माणे सापेक्षसाधानान्तराण्यपि उपलक्ष्यन्ते। पुष्पच्छदैः = कुसुमदलैः, शयनम् = शय्याम् बध्नामि = रचयामि, वेत्राणाम् = वेतसाम्, वलयैः = कटकैः, (वलयीकृतवेत्रैरिति यावत्) आयामिनाम् = व्रतिनाम् विष्टरम् = आसनविशेषम्, उपपादयामि = उत्पादयामि। आर्द्रपङ्कजरजौविद्धैः = आर्दैः = स्वभावतः मध्वाद्रैः पङ्कजरजोभिः = कमलरेणुभिः, विद्धैः = सम्पृक्तैः, अपाम् = जलानाम्, रेणुभिः = कणैः, क्षितिम् = वसुधाम्, सिञ्चामि = सेचनेन संस्करोमि। अथवा आर्द्राणाम् = नूतनानाम्, तत्क्षणप्रस्फुटितानाम् पङ्कजानाम् रजोविद्धैः= परागसम्पृक्तैः, अपाम् रेणुभिः = जलानाम् = कणिकाभिः क्षितिसेचनं करोमि। अत्र कविः लक्ष्मणमुखेन कथाबीज-भूतं भयप्रदराक्षसनिराकरणोत्साहं सूचयति। शार्दूलविक्रीडितं वृत्तम्। तल्लक्षणं हि- "सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम्।" ॥ ५ ॥

तथा कृस्वेति॥ पूर्वोक्तप्रकारेण भयप्रदान् मृगान् दूरीकृत्य सुखप्रदां पर्णशालाञ्च निर्माय आह-

कथञ्चिदेवमिति॥ आर्यशासनम् = आर्यस्य = रामस्य शासनम् = पर्णशालानिर्माणविषयाज्ञापनम्। कथञ्चित् = केनापि प्रकारेण, एवम् = पूर्वोक्तरूपेण, अनुष्ठितम् = सम्पादितम् (मया इति शेषः)। अहो नु खलु इति॥ विपन्नानाम् = विपद्ग्रस्तानाम् अवस्था = वृत्तिः, मेधाविनी = मेधया = अतिशायिन्या बुद्धिवृत्या संयुक्ता, पर्णशालां विरचय्य तन्निवेदनमध्यवस्यति - यावदिति॥ आर्यया = सीतया, सार्धम् = सह, गोदावर्याः = तन्नामिकायाः नद्याः, तटैकदेशे = तीरैकप्रान्ते, तरङ्ग- मारूतैः = वीचिपवनैः, अध्वपरिश्रमम् = मार्गजन्यखेदम् अपनयन्तम् = दूरीकुर्वन्तम्, आर्यम् = रामम्, तावत् इमाम् = पुरोदृश्यमानाम्, पर्णशालाम् = पर्णकुटीम्, परिसमाप्ताम्- समाप्तिं गताम्, विज्ञापयामि = निवेदयामि, सूचयामीत्यर्थः।

परिक्रम्येति॥ अथ परिक्रम्य अकस्मात् स्वाभिमुखं समायान्ती ललितसुकुमार वेशां शूर्पणखां दृष्ट्वा आह-अये इति॥ अद्भुद्दर्शन समावेगसूचकमव्ययम्।

अरण्यविरुद्धेयमाकृतिरिति॥ इयम् = सौकुमार्यादि -विशिष्टत्वेन पुरोदृश्यमाना, आकृतिः = आकारविशेषः, अरण्ये = विपिने, विरुद्धा = अयोग्या। ईदृशाकृतिविशेषस्य कानने जन्म निवासो वा न संभवतीति बोध्यम्।

अस्यातिमात्रायतेति॥ अतिमात्रायतलोचनस्य नतभ्रुणः कम्रपयोधरस्य विलासयोनेः अस्य आश्चर्यरत्नस्य किन्नु द्यौः आकरः किन्नु वसुन्धरा इत्यन्वयः। अतिमात्रायतलोचनस्य = अतिमात्रम् = अत्यधिकम्, आयते = विस्तृते, लोचने = नयने यस्य तस्य अतिविस्तृतनयनस्य, नतभ्रुणः, वक्रभ्रुणः कम्रपयोधरस्य = सुन्दरकुचस्प, विलासयोनेः = प्रियतमर्दशनावसरे लोचनादिव्यापाराणाम् विशेषेण लासः विलासः तस्य योनिः= उत्पत्तिस्थानम् कारणं वा, तस्य विलासयोनेः, अस्य = पुरो दृश्यमानस्य, आश्चर्यरत्नस्य= विस्मयोत्पादकमणेः (अत्र स्त्रीरूपं रत्नम्

विवक्षितम्) किन्नु द्यौः = किन्नु स्वर्गः, आकरः = खनिः, 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः। उत्पत्तिस्थानमिति यावत्, किन्नु = अथवा वसुन्धरा = वसुधा। ईदृगाश्चार्यभूतस्त्री-रूपरत्नविशेषस्योत्पत्तिस्थानं वसुधा स्वर्गो वा भवितुमर्हति नारण्यमिति भावः। उपजातिवृत्तम्। तल्लक्षणं तूतमेव। सन्देहालङ्कारः॥ ६ ॥

चित्तविकारमिति॥ मायाकृतसुकुमाररूपायाः शूर्पणखायाः दर्शनेन हृदये कामविकृतिं निरूप्य = लक्षयित्वा।

किमिदमिति॥ किमिदम् = साम्प्रतं विलक्षणरम- णीसाक्षात्कारजन्यः कन्दर्पविकारः सर्वथा मत्कृते नोचित इति परामृशन् आत्मनि चापलस्य अयोग्यत्वे कारणमाह - नन्वहमिति॥ ननु = निश्चयेन, अहम् = न केवलं नाम्ना अपितु विनयधैर्यादिगुणसम्पन्नः, रामस्य अनुजः = लघुभ्राता लक्ष्मणः (अस्मीति शेषः)। अतो मयि स्मरचापलत्वं सर्वथा असमीचीनमिति गूढाशयः।

सनाथीकुर्वाणेति॥ एषा धरणीम् अथवा मरुताम् धाम सनाथीकुर्वाणा कामम् भवेत्, वितर्कः विरमतु, (वितर्कः) चलधियाम् (भवतीतिशेषः) पित्रोः वचः कर्तुम् इदम् वनम् अवाप्तस्य वशिनः भ्रातुः वशे तिष्ठन् अहम् कथम् स्मरपरवशः स्याम् इत्यन्वयः। एषा = शूर्पणखा, धरणीम् = वसुधाम्, अथवा = किम्वा, मरुताम् = देवानाम्, धाम = निवासस्थानम्, स्वर्गमित्यर्थः, सनाथीकुर्वाणा = सफलीकुर्वती, कामं भवेत् = यथेच्छं भवेत्, वितर्कः = विकल्पः, चलधियाम् = चपलबुद्धिमताम् भवतीति शेषः। पित्रोः = माता च पिता च पितरौ तयोः कैकेयीदशरथयोः, वचः = राज्यपरित्यागपूर्वकवनवास- विषयकं वचनम् कर्त्तम् = पालयितुम्, इदम् = जनस्थानाख्यम्, वनम् = विपिनम् अवाप्तस्य = प्राप्तस्य, वशिनः = जितेन्द्रियस्य, भ्रातुः = अग्रजस्य (रामस्य) वशे = अधिकारे, तिष्ठन् = विद्यमानः, अहम् = लक्ष्मणः, कथम् = केन प्रकारेण, स्मरपरवशः = मनसिजवशीभूतः, स्याम् = भवेयम्। शिखरिणीवृत्तम्। तल्लक्षणं हि - "रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी"॥ ७ ॥

ललितसुकुमारवेषा| ललितः = सुशोभनः, सुकुमारः = सुकोमलः च वेषः = नेपथ्यम् = प्रसाधनं यस्याः सा। इह रावणभगिनीशूर्पणखा लोकोत्तरं पुरुषं पतित्वेन परिग्रहीतुम् इतस्ततः परिभ्रमन्ती मायाबलेन ललितसुकुमारवेषा भूत्वा गोदावरीतीरगतं राममुपगम्य ततोऽलब्धमनोरथा मार्गे स्वाभिमुखमागच्छन्तं सौमित्रिं दृष्ट्वा सर्वथा तत्र रामसादृश्यमवलोक्य तद्रूपातिशयं विभावयति हमिति॥ हमिति अतर्कित सौन्दर्यातिशयदर्शन प्रभवहर्षसमुत्थो वाणीरूपोऽनुभावः। अयमपि = लक्ष्मणोऽपि, स एव = राम एव, रामे विद्यमानानां सर्वेषामेव सौन्दर्य सौकुमार्य्यादीनां लचमणेऽपि दृश्यमानत्वात् स एवेति तत्वारोपः। अत्रोभयोर्भेद- व्यवच्छेदार्थम् एवशब्दः। व्रीडामिति॥ मदनपरवशा शूर्पणखा लक्ष्मणपुरस्तात् व्रीडाम् = लज्जाम् नाटयति = प्रदर्शयति, लज्जाया अभिनयं करोतीत्यर्थः।

प्रतिकूलमिति॥ इदम् = प्रत्यक्षेण दृश्यमानम्, आचरितम् = आचरणम् ( लजादिप्रदर्शनपरो व्यवहारः) प्रतिकूलम् = विपरीतम्, सर्वथा विरुद्धमिति यावत्।

आचारेति॥ तपोधनानाम् आचारान् अनुचरता मया सावज्ञम् परुषतम् इक्षितापि सव्रीड। (सती) कम्पात् उत्तंसप्रगलितषट्पदेन मूर्ध्ना वदनमधः करोति इत्यन्वयः। तपोधनानाम् = तपस्विनाम्, आचारान् नियमान्, अनुच- रता = सेवमानेन, व्यवहरता वा, मया = लक्ष्मणेन, सावज्ञम् = अवज्ञया सह = अपमानपूर्वकं यथा स्यात्तथा, परुषतरम् = कठोरतरम्, इक्षितापि =

अवलोकितापि, सव्रीडा = सलज्जा, (सती ) कम्पात् = वेपथोः, उत्तंसप्रगलितषट्पदेन = उत्तंसेभ्यः = कर्णभूषणभूतेभ्यः "उत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे" इत्यमरः, कुसुमेभ्यः प्रगलिताः = प्रच्युताः (पूर्वम् मकरन्दादिलोभ- वशादवस्थिताः) षट्पदाः = भ्रमराः यस्मिन् तेन, मूर्ध्ना = शिरसा (सह वर्त्तमाना) वदनम् = आननम्, अधः करोति = नम्रीकरोति। यथा यथा क्रमेण मया वैराग्यातिशयः प्रकाश्यते तथा तथा एषा रागातिशयं विभावयति अतः अस्मद्व्यापारापेक्षया अस्याः सर्वथा विरुद्धमाचरणम् तच्च अदृष्टपूर्वमिति भावः। प्रहर्षिणी वृत्तम्। तल्लक्षणं हि-"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" ॥ ८ ॥

पूर्व रामात् अपूर्णमनोरथा लक्ष्मणात् अपि तथैव शङ्कमाना आह-

किन्नु खलु इति॥ प्रणयनिवेदनप्रसङ्गे रामेण यथोक्तं तथैव अनेनापि उच्येत अन्यथावेतिशूर्पणखाहृदयस्थो भावः।

न समाधिरिति॥ समाधिः = यमनियमादिसाध्य उपास्यनिष्ठः चित्तलयः, आराध्योपासनेत्यर्थः, स्त्रीषु = नारीषु, न लोकज्ञः = लोको लोकव्यवहारः समागतं प्रति स्वागतवचनादि तं न जानति। तपस्विनां स्त्रीविषयं लोकवृत्तान्तज्ञानं नास्तीति अस्याः प्रतिवचनदानाभावेन न दोषावसरः इति ध्येयम्।

असदृशमिव इति॥ शरणागतस्य = शरणं प्राप्तस्य, स्त्रीजनस्य = नारीजनस्य, उपेक्षणम् = उपेक्षा, तिरस्कारो वा आर्यस्य = त्वत्सदृशसज्जनस्य (कृते) असदृशमिव = अननुरूपमिव, अनुचितमिवेति यावत्। शरणागतस्य शत्रोरपि उपेक्षा नोचिता का कथा शरणागताऽनाथस्त्रीजनस्येति भावः।

शूर्पणखाप्रतिपादिताऽसदृशस्वं निषेधति - नहि नहि इति॥ त्वाम्प्रति मदीयोपेक्षा समुचिता एव, यतोहि - साम्प्रतम् = इदानीम्, अवस्थान्तरशोचनीयस्य = अन्या अवस्था अवस्थान्तरम् तेन = वनवासात्मकपरिस्थिति विशेषेण चिन्तनीयस्य गुरोः = आर्यरामस्य, अलङ्घनीयेन = अनुपेक्षणीयेन, शासनेन = आज्ञया, भवती मया उपेक्ष्यते।

गुरुवचनमुहूर्तमिति॥ गुरोः वचनम् तस्य भ्रातृवचनस्य मूहूर्त्तम् = क्षणं यावत्, भाजनीभूताम् = पात्रीभूताम्। अवहित इति॥ अवहितोऽस्मि = दत्तावधानोऽस्मि सावधानोऽस्मीत्यर्थः।

वासोवल्कलमिति॥ वल्कलम् वासः विटपिनः आस्पदम् वन्यम् शरीरस्थितिः दर्भलता शय्या अपा वर्षी जटानाम् भरः प्रसाधनम्, हे बाले ! किंबहुना वने वनमृगन्यायस्य त्वम् न पदम्, हे सारङ्गाक्षि ! तपोभृतः क्व तपसाम् शत्रुः सङ्कल्पजः क्व इत्यन्वयः। वल्कलम् =त्वक् (वृक्षाणाम् ) वासः = परिधानवस्त्रम्, विटपिनः = शाखिनः, आस्पदम् = गृहम् वन्यम् = पर्णमूलादिकम्, शरीरस्य = प्राणस्य, स्थितिः अस्तित्वसाधनम् (अत्र स्थितिशब्दः तत्साधनस्यापि लक्षकः) दर्भलता = कुशवल्ली, शय्या = शयनीयम्, अपाम् = जलानाम्, वर्षी = वर्षकः, जटानाम् = सटानाम्, भरः = भारः समूहोवा, प्रसाधनम् = अलङ्कारः, हे बाले ! किम्बहुना = किमधिकेन, वने = विपिने, वनमृगन्यायस्य = वनमृगस्य = कानपशोः न्याय इव न्यायः = आचारः यस्य तस्य मम त्वम् = शूर्पणखा, न पदम् = न संसर्गयोग्यम् स्थानमिति भावः, हे सारङ्गाति ! = सारङ्गस्य = हरिणस्य अक्षिणी इव अक्षिणी = नयने यस्याः तत्सम्बोधने सारङ्गाक्षि = मृगनयने इत्यर्थः, तपोभृतः = तपस्विनः, क्व = कुत्र, तपसाञ्च = व्रतानाम्, शत्रुः = रिपुः, सङ्कल्पजः = मनसिजः, क्व। वने व्रतिनां वेषभोजनशय्यादिकं स्वीकृत्य सततं तपः कर्मणि विराजमाने मयि राज्यसुखभोगपरायणायाः तव अनुरागप्रदर्शनं विफलमेव, तपःपरायणस्य

मम कामपरायणा त्वम् न संसर्गास्पदत्वं प्राप्स्यसि इति भावः। शार्दूलविक्रीडितं वृत्तम्। विषमालङ्कारः॥९॥

अलोकमिति ॥ अलीकम् = मिथ्या।

यावदार्य इति॥ तीर्ण प्रतिज्ञः = तीर्णा = पारंगता, प्रतिज्ञा = तपोधनधर्मावलम्बनपूर्वकवनवासरूपो निश्चयः येन सः, आर्यः = रामः, प्रकृतिमण्डलम् = प्रजावर्गम् गुरुजनम् = वसिष्ठकौशल्यादिकम्, भरतम् = भरतनामधेयंस्वानुजम्, यावत् न पश्यति = यावत् नावलोकयति, तावत् एकम् = केवलम्, धर्ममेव = अर्थकामानुबन्धरहितं धर्ममेव, अवलम्बते = स्वीकरोति।

लक्ष्मणः शूर्पणखायाः प्रणयनिवेदनं खण्डयन्नाह -

यतते इति॥ सर्वोऽपि बुद्धिमान् जनः यस्य निष्कृत्यै यतते हे मुग्धलोचने ! तत् दास्यम् स्वयम् इच्छन्ती त्वम् मुग्धा (असीति शेषः) इत्यन्वयः। सर्वोऽपि = समग्रोऽपि, बुद्धिमान् = धीमान्, जनः = लोकः, यस्य निष्कृत्यै = यस्य निराकृत्यै, यतते = प्रयासं करोति, हे मुग्धलोचने ! = हे सुनयने, तत् दास्यम् = तत् पारतन्त्र्यम्, स्वयमिच्छन्ती = आत्मना अभिलषन्ती, त्वम् = शूर्पणखा, मुग्धा = मोहिता, विचारशून्येत्यर्थः, असीति शेषः। स्वेच्छया त्वया मदीयनिन्दितदास्यं न स्वीकार्य- मिति भावः। अनुष्टुब् वृत्तम् ॥ १० ॥

किं स्नेह इति॥ स्नेहः = सहजानुरागः किं गुणदोषान् तुलयति = विविच्य विजानाति? स्नेहे गुणदोषविचारो नास्त्येवेति भावः। अन्तरायः = विघ्नः, अभिप्रेतम् = अभिमतम् ।

क्वेदं वनमिति ॥ वनचरैः अपि दुर्विगाहम् इदम् वनम् क्व, कुवलयच्छविचोरनेत्रा इयम् वधूः क्व, हेमारविन्दमकरन्दरसोपयोगाम् कलहंसकन्याम् जलधौ कः श्रद्दधीत इत्यन्वयः। वनचरैरपि = वने चरन्ति इति वनचराः किरातादयः तैरपि, दुर्विगाहम् = दुष्प्रापम्, इदम् = जनस्थानसंज्ञकम्, वनम् = विपिनम्, क्व = कुत्र, कुवलयच्छविचोरनेत्रा = कुवलयानाम् = उत्पलानाम् श्वेतकमलानामिति यावत्, छविः = शोभा तां चोरयतः=अपहरतः नेत्रे यस्याः सा श्वेतकमलशोभाहरणशीलनयना इत्यर्थः, इयम् वधूः = दृश्यमाना वनिता, क्व = कुत्र, हेमारविन्दमकरन्दर- सोपयोगाम् = हेमारविन्दस्य = सुवर्णकमलस्य यः मकरन्दरसः = पुष्परसः तस्योपयोगः = आस्वादनं यस्याः ताम्। अथवा हेमारविन्दमकरन्दरसः उपयोगः = उप- जीवनसाधनं यस्याः तामिति विग्रहः। कलहंसकन्याम् = मरालबालिकाम् जलधौ = सागरे, कः श्रद्दधीत = को विश्वसेत्। यथा मातङ्गमकरादिसङ्कुले सागरे कलहंसक- न्यायाः प्रसङ्गो नोचितस्तथैव मृगयाव्यावृतैः किरातादिभिरपि दुष्प्रापे सिंहप्रभृतिहिंसक जन्तुबहलेऽस्मिन् वने वनितासञ्चार अप्रासङ्गिक इति ध्येयम्। वसन्ततिलकं वृत्तम्। तल्लक्षणं हि "ज्ञेयं वसन्ततिलकं तभजाजगौगः"। दृष्टान्तोऽलङ्कारः ॥ ११॥

पूर्वोद्दिष्ट इति॥ पूर्वोद्दिष्टः = पूर्वम् = पर्णकुटीनिर्माणानन्तरम्, उद्दिष्टः = प्राप्यत्वेन अङ्गीकृतः। अथवा आर्येण पूर्वम् = प्राक्, उद्दिष्टः = पर्णशालां निर्माय अत्रैव आगच्छेति संकेतविषयीभूतः, एष प्रदेशः = स्थान-विशेषः।

सीतया सह रङ्गशालायां प्रवेशं कृत्वा रामः सीतायाः वनवासाभिरुश्चिम् उत्पादयन् साकेत- निवासापेक्षया वनवासस्य श्लाघ्यत्वं समर्थयते-देवीति॥ नगराधिवासात् = अयोध्यानिवासात्, वनाधिवासः = काननिवासः, सविशेषः = ततोऽप्यधिक इव, मे = मम, प्रतिभाति = प्रतीयते, अयोध्यानिवासापेक्षया वनवासे अस्ति वैशिष्ट्यमिति भावः।

तदेव समर्थयन्नाह उद्यानमिति। कुसुमितैः पादपैः उद्गन्धयः वनभूमयः उद्यानम्, जलधरश्यामाः निर्झरहासिनः शैलाः कृत्रिमः गिरिः, सारसमूर्च्छितो- र्मिवलयाः नद्यः धर्माभिषेकास्पदम्, शीकरसङ्गमात् शीताः सुरभयः सरोजानिला मित्रम् (अस्तीति शेषः) इत्यन्वयः| कुसुमितैः = पुष्पितैः, पादपैः=वृक्षैः, उद्गन्धयः = उद्गतः = ऊर्ध्वगतः गन्धः = वासः यासु ताः, वनभूमयः = काननप्रदेशाः, उद्यानम् = पुष्पवाटिका, निर्झरहासिनः = शिलासङ्घट्टनेन उद्गतफेनैः निर्झरैः = प्रपातैः हसन्त इव लक्ष्यमानाः, जलधरश्यामाः = जलधर इव = पयोधर इव श्यामाः = कृष्णवर्णाः, शैला पर्वताः, कृत्रिमा क्रीडार्थं निर्मितः, गिरिः = पर्वतः, सारसमूर्च्छितोर्मिवलयाः = सारसानाम् = सलिलनिवासरतानां वलाकादीनाम् (पक्षपातैः) मूर्छिताः = द्विगुणं वर्धिताः, ऊर्मिवलयाः = वलयाकारेण वर्तमानाः तरङ्गाः यासु ताः, नद्यः = सरितः, धर्माभिषेकास्पदम् = धर्मकाले = ग्रीष्मसमये अभिषेकस्य = स्नानस्य, आस्पदम् = योग्यस्थानम्, शीकरसङ्गमात् = अम्बुकणसम्पर्कात्, शीताः = शीतलाः, सुरभयः = सुगन्धियुक्ताः, सरोजानिलाः = कमलसमीराः, मित्रम् = व्यजनवायुः, अस्तीति शेषः। नगरे उद्यानक्रीडापर्वतव्यजनपवनादिजन्यं सुखं यत्नसाध्यं भवति, वने त्विदं सर्वमेव अयत्नसाध्यम् अत एव स्वाभाविकरूपेण उपभोगयोग्यमिति भावः। शार्दूलविक्रीडितं वृत्तम्। ॥ १२ ॥

वनवासं प्रति स्वाभिरुचिं ज्ञापयन्ती जानकी आह - आर्यपुत्र ! यावदहं जीवामि इति॥ न केवलं चतुर्दशसम्वत्सरान् एव विपिने वस्तुम् बुद्धिः अपि तु जीवनपर्यन्तमन्त्रैव निवसितुम् मदीयोऽभिलाषः।

तपोधनाचारजटावल्कलधारिणं कान्तामात्रसहायं रामं दृष्ट्वा करुणाविह्वलीकृतचित्तः लक्ष्मणः 'अहो नु खलु' इत्यादिना विस्मयं प्रदर्शयन् रामस्येममवस्थाविशेषं विधिकृतं मन्यमानः 'कष्टं विधेः कर्म' इत्युक्त्या अनुचित- घटनाविषयत्वात् विधेः कर्मणः कष्टत्वं प्रतिपादयति। अथ तदानीमेव वनवासरूपं कैकेयीकर्महेतुकं दुरवस्थाविशेषं निश्चित्य तस्य नियतिकृतत्वं निषेधति - नहि नहि कैकेय्या इति॥ रामस्य वनवासरूपं दुरवस्थाविशेषं प्रति कैकेय्याः कर्म एव कारणं न तु विधेः कर्म इति भावः। कैकेय्याः दुष्कर्म एव विवृणोति-

आर्येणशुकमिति॥ अंशुकम् उज्झता आर्येण आपाटलम् वल्कलम् धृतमभूत्, आर्यया वृकवधूपादाङ्कपांसौ पथि पदम् विन्यस्तम्, भरतः सन्तापैः तनुताम् उपैति, कोसलाः पर्य्याकुलाः (सन्ति) त्वमपि हतम् वैधव्यम् आस्थिता (अतः) ते सर्वङ्कषं कर्म धिक् इत्यन्वयः। अंशुकम् = वसनम्, उज्झता = मुखता, आर्येण = भ्रात्रा रामेण, आपाटलम् = ईषच्छवेतरक्तम्, वल्कलम् = त्वक्, धृतमभूत् = स्वीकृतमासीत्, आर्यया = = पूज्यया, वृकवधूपादाङ्कपांसौ = वृकवधूनाम् = ईहामृगभार्याणाम् "कोकस्वीहामृगो वृकः" इत्यमरः, पादाः = चरणाः तेषाम् अङ्काः = चिह्नानि येषु तेषां पांसवः = रजांसि यस्मिन्, पथि = मार्गे, पदम् = चरणम्, विन्यस्तम् = स्थापितम्, भरततः = कैकेयीनन्दनः, सन्तापैः = भ्रातृवियोगपितृविनाशादिहेतुकैः परितापैः, तनुताम् = कृशताम् क्षीणतामिति यावत्, उपैति = प्राप्नोति, कोसलाः = कोसलदेशवासिनो जनाः, पर्याकुलाः = खिन्नचित्ताः, (सन्ति) त्वमपि = न केवलम् अन्ये एव त्वत्कर्मदुःखिताः अपि तु कैकेय्यपि स्वदुष्कर्मवशात्, हतम् = अत्यन्त- निकृष्टम्, वैधव्यम् = पत्यभावजन्यावस्थाविशेषम्, आस्थिता = प्राप्ता, (अतः) ते = तव, सर्वङ्कषम् = सर्वविनाशहेतुम्, कर्म = कार्यम्, धिक्। अत्र धिक् शब्दः शब्दः निन्दावाचकः। अन्येषां स्वस्य च विनाशहेतुः तव कर्म सर्वथा निन्ध्यमेवेति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

उपसर्पामि = समीपं गच्छामि।

अथ लक्ष्मणकृतसमुदाचारः रामः पर्णशालां प्रति गच्छन् मार्गे लक्ष्मणस्य कैकेयीकर्मस्मरणजन्यमुखरागं विलोक्य तं सम्बोधयन् कैकेयीकृतस्य कर्मणः स्वपक्षे उपकारत्वम् उपपादयति - मार्ग इति ॥

लक्ष्मण ! मार्गे निर्वृतिमार्गमार्गणपरान् मुनीन् आराधयन्तः, स्वैरं सेविततीर्थसिन्धुपयसः दूरं निरस्ताधयः वयम् केकयेन्द्रसुतया मात्रा व्याजेन भुवः स्वाम् धुरम् उत्सृज्य इक्ष्वाकुभिः यातव्यम् मुनिवनम् नीताः इत्यन्वयः। हे लक्ष्मण ! मार्गे = वनपथे, निर्वृति- मार्गमार्गणपरान् = निर्वृतिप्राप्तये = मोक्षलाभाय यो मार्गः = श्रवणादिरूपः पन्थाः तस्य मार्गणम् = अन्वेषणम् तस्मिन् परान् = निरतान्, मुनीन् = ऋषीन् मोक्षप्राप्तिपथप्रवृत्तान् ऋषीन् इत्यर्थः, आराधयन्तः = सेवमानाः, स्वैरम् = यथेच्छम् सेवितम् = आस्वादितम् तीर्थभूतानाम् सिन्धूनाम् = गङ्गायमुनादीनां सरिताम् पयः = जलं यैः (अत एव) दूरं निरस्ताधयः = निरस्ताः निःशेषेण अस्तंगताः आधयः = मनोव्यथाः येषाम् ते "पुंस्याधिर्मानसी व्यथा" इत्यमरः, वयम्, केकयेन्द्रसुतया = केकयराजकन्यया, मात्रा = कैकेय्या, व्याजेन = छलेन, भुवः = पृथिव्याः, स्वाम् = स्वकीयाम, धुरम् = राज्यभारम्, उत्सृज्य = परित्यज्य, इक्ष्वाकुभिः = इक्ष्वाकुवंशजैः नृपतिभिः, यातव्यम् = गन्तव्यम्, मुनि- वनम् = तपोवनम्, नीताः = प्रापिताः। इक्ष्वाकुकुलोत्पन्नाः सर्वे राजानः स्ववार्धक्ये पुत्रादिकं राज्ये नियोज्य मोक्ष- प्राप्त्यर्थं मुनिवनं समागच्छन्तीति परम्परा| तस्या एव परम्परायाः परिपालनाय मात्रा वयं तपोवनमानीता अतस्तस्या इदं कर्म अस्मान् सर्वथा उपकरोतीति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

अत्यन्तापकारिण्यामपि कैकेय्यामुपकारमवलोक्याह - सत्यमाहेति। गुणवताम् = सत्यविनयदयादाक्षिण्यादि- गुणशालिनाम्, अगुणाः = दोषाः, न सन्ति। अथवा अगुणाः = गुणरहिताः जनाः न सन्ति। गुणैकपक्षपातिन उदारहृदयाः स्वान् प्रति अपकारिणोऽपि उपकारकत्वेन स्वीकुर्वन्तीति भावः।

लक्ष्मणस्य कैकेयीदोषज्ञापकं वचनं श्रुत्वा तत्क्रोधोपशमनाथ राम उपक्रमते - लक्ष्मण इति॥ संरम्भः = आवेगः| अपराधिन्यपि माता सर्वथा वन्द्यैव न खलु कदाचिदपि निन्द्या, अतो मातरम्प्रति तवावेगः न साम्प्रतिकः ।

अथ राममुखात् मातृशब्दमाकर्ण्य कुपितो लक्ष्मणः कैकेय्याः मातृत्वं खण्डयन्नाह- मात्रोरिति॥ मुदा प्रस्नविभिः स्तनैः सह वर्तमानयोः तयोः मात्रोः - सम्फुल्लदृष्टयोः (सत्योः) तातस्य अश्रुजलैः समम् हैमात् घटात् ते शिरसि क्षरन्त्यः आपः वसिष्ठमन्त्रजयिना मन्त्रेण यया रुद्वा (इत्थं) लोकोत्सवकालरात्रिम् अदयाम् ताम् कथम् मातरम् मन्ये इत्यन्वयः। मुदा = हर्षेण, प्रस्नविभिः= क्षीरं स्रवद्भिः स्तनैः = कुचैः सह वर्तमानयोः तयोः मात्रोः— कौशल्यासुमित्रयोः, मुदा सम्फुल्लदृष्टयोः = प्रसन्नातिरेकेण उत्फुल्लनेत्रयोः (सस्योः) यद्धा स्तनशब्दः स्वविकारं स्तन्यं लक्षयति, प्रस्नविशब्दश्च स्वफलभूतस्य निष्यन्दस्य लक्षकः, तथा च प्रस्नविभिः = निष्यन्दमानैः, स्तनैः = स्तन्यैः क्षीरैरिति यावत् समं क्षरन्त्य इत्यन्वयो विधेयः। तातस्य = पितुर्दशरथस्य, अश्रुजलैः = रोदनवारिभिः नेत्राम्बुभिरित्यर्थः, समम् = सह, हैमात् = स्वर्णनिर्मितात्, घटात् = कलशात्, ते शिरसि = तव मस्तके, क्षरन्त्यः = स्रवन्त्यः, आपः = जलानि, वसिष्ठमन्त्रजयिना = वसिष्ठस्य = कुलगुरोः मन्त्रः = अभिषेकमन्त्रः तम् जयति इति तेन = कुलगुरुप्रयु- क्ताभिषेकमन्त्रविजयिना, मन्त्रेण = रामवनवासात्मक- दुरभिसन्धिना, यथा कैकेय्या, रुद्धाः = निरुद्धाः, (एवं भूनाम्) लोकोत्सवकालरात्रिम् = लोकस्य उत्सवः = आनन्दः तस्य कालरात्रिः = संहारदेवता विनाशयामिनीत्यर्थः लोकानन्द संहारदेवताभूताम्, अदयाम् = दयारहिताम् निष्ठुरामिति यावत् ताम् = कैकेयीम्, कथम् = केन प्रकारेण, मातरम्

= जननीम्, मन्ये = जाने। सर्वथाऽनिष्टकार्यकारिणी मातापि न मातृबुद्ध्या सम्मानास्पदेति भावः| शार्दूलविक्रीडितं वृत्तम्। सहोक्तिरूपकालङ्कारयोः संसृष्टिः ॥ १५ ॥२६

अथ रामो मातुरुपालम्भमसहमानस्तजन्य- पापोपशमनार्थं शान्तं पापमित्यादि पठित्वा लक्ष्मणकृतोपालम्भस्यासमीचीनत्वमुपपादयति- इत इति॥ हते राज्ये भक्त्या भवान् स्वमातरम् प्रत्याचष्टे यत् तत् अहो ! सन्तोषबाह्यानाम् मनः अधमैकरतम् (भवतीति शेषः) इत्यन्वयः| हते = दुःखोत्पादकत्वेन अत्यन्तं गर्हिते, राज्ये भक्त्या = अभिलाषेण, भवान् = लक्ष्मणः स्वमातरम् = निजजननीम्, प्रत्याचष्टे = अधिक्षिपति, यत्, तत्, अहो = अतिकष्टम्, सन्तोषबाह्यानाम् = सन्तोषात् = परितोषात्, बाह्यानाम् = बहिर्भूतानाम् असन्तुष्टानामिति यावत्, मनः = चेतः, अधर्मैकरतम् = हिंसाऽनृतवादगुरु - अधिक्षेपादितत्परं भवतीति शेषः। भक्तियोग्यायाभ्मातरि भक्तिं विहाय प्रत्याख्यानयोग्ये राज्ये तव भक्तिर्नोचितेति भावः। अनुष्टुपवृत्तम्। अर्थान्तरन्यासोऽलङ्कारः ॥ १६ ॥

राज्याधिपत्ये क्षत्रियस्य दोषान् वक्तुमारभते-पश्येति॥ बाल ! = गुणदोषविवेकाऽसमर्थ ! पश्य = अवलोकय, सावधानेन त्वया मद्वचनमवगन्तव्यम् इति भावः। पापात्मनः = कलुषितहृदयस्य, क्षत्रियस्य = लब्धराज्यस्य राजन्यस्य| साधारणी इति॥ उपरिष्टादेव समागतस्य 'क्षत्रियस्य' इति शब्दस्य धरण्यादिना सम्बन्धो ज्ञेयः। (क्षत्रियस्य) धरणिः नाम कलत्रम् नयविदाम् साधारणी, मित्रम् अस्त्राणि, अरय सहजाः सुताश्च, परस्य पापात् नरकेषु पतनम्, द्वे चामरे, सितम् आतपत्रारणम् च लाभः इत्यन्वयः| धरणिः = पृथिवी नाम (क्षत्रियस्य) कलत्रम् = भार्या, (या) नयविदाम् = नीतिज्ञानाम्, साधारणी = सामान्या, प्रथमं कमपि पतित्वेन स्वीकृत्य ततोऽधिकं सौन्दर्यादिगुणयुतमन्यं दृष्ट्वा तमभिसरति अतस्तत्र सामान्यात्वं समुचितमेव। मित्रम् = सुहृत्, अस्त्राणि = खड्गादीनि शरीररक्षण साधनानि एव नतु अमात्यादीनि, सहजाः = सोदराः भ्रातर इत्यर्थः, सुताश्च = पुत्राश्च, अरयः = शत्रवः। प्रायेण राजानो राज्यनिमित्तं भ्रातरं पितृपुत्रादिकञ्च निघ्नन्तो दृश्यन्ते। परस्य = अन्यस्य प्रजाजनस्येति यावत्, पापात् = दोषात्, नरकेषु = दुर्गतिषु, पतनम् = स्खलनम्, अत्र राज्यस्य ऐहिकपारलौकिकफलविरोधित्वं प्रतिपाद्य तथाकथितं लाभमाह - द्वे चामरे इति॥ द्वे = द्विसङ्ख्यके चामरे = प्रकीर्णके, (चँवर इति लोके) सितम् = धवलम्, श्वेतमिति यावत्, आतपवारणम् = छत्रम्, च लाभः = फलम्। क्षत्रियस्य राज्याधिपत्यं सर्वथा दुःखायैव न तु सुखाय, चामरछत्रादिकमपि कष्टप्रदमेवेति भावः। वसन्ततिलकं वृत्तम् ॥ १७॥

विपर्य्यस्तः क्रम इति॥ क्रमः = ज्येष्ठ पुत्रस्य राज्यप्रदानरूपा परम्परा, विपर्यस्तः = विपरीतः कृतः। ज्येष्टभ्रातरं रामं विहाय भरतस्य राज्यप्राप्तिप्रसङ्गेन, अथवा यौवने यौवराज्यपदयोग्यस्य रामस्य वार्धक्ययोग्यवनवासप्रसङ्गेन परम्पराप्राप्तः क्रमः मात्रा कैकेय्या विपरीतः कृतः इति भावः। अत एव मया कोपः क्रियते।

यदि मयि स्थिते भरतस्य राज्याधिकारः सम्वृत्तः, इत्ययं जनन्युपालम्भविषयस्तर्हि जीवत्यपि पितरि यौवराज्यपदभागहमेव प्रथमं तवोपालम्भविषयोऽस्मीति यद्येवमित्यादिना प्रतिपाद्य तदेव अग्रिमश्लोकेन समर्थयते - इन्द्रकल्प इति॥ इन्द्रकरलूपे स्नेहपर्य्यश्रुलोचने राशि स्थिते यः निर्लज्जः अभिषेकाय सिंहासनम् आस्थितः (सोऽहं तवोपालम्भविषय इति पूर्वग्रन्थेनान्वयः)| इन्द्रकल्पे॥ वासवतुल्ये, स्नेहपर्य्यश्रुलोचने = प्रेमपूरिताश्रुनयने, राशि = दशरथे, स्थिते = वर्त्तमाने सति, यः, निर्लज्जः = निर्गता = दूरं गता लज्जा = त्रपा यस्मात् लज्जाशून्य इत्यर्थः (भूत्वा) अभिषेकाय = राज्याभिषेकाय, सिंहासनम् = राज्यासनम्, आस्थितः= नियुक्तो जातः (सोऽहं प्राथम्येन तवाधिक्षेपपात्रम्)|अनुष्टुब्बृत्तम् ॥ १८ ॥

लक्ष्मणो रामस्य राज्याभिषेकविषयकं पितुर्हार्दिकरहस्यमुद्घाटयति - वयसा परिणत इति। अहम् = दशरथः, वयसा = अवस्थया, परिणतः = वार्धक्यमुपगतः, अस्मात् कारणात्, तातः = पिता दशरथः, तथा = तेन प्रकारेण, त्वयि = ज्येष्ठात्मजे रामे, राज्यम्प्रतिपन्नः = प्रतिपादितवान्।

यदि वय आधिक्यमेव मयि राज्यनिधाने कारणं तर्हि भरताऽपेक्षया मम वयो अधिकत्वेन मयि स्थिते भरतस्य राज्याभिषेकः समुचित एवेति मन्यमानो राम आहे- ननु मरत इति ॥

स्वयि राज्यनिधानेन वयआधिक्य कारणमपितु तातस्य पृथ्वीरक्षाऽसामर्थ्य मेवेतिस्वाभिप्राय लक्ष्मणो विवृणोति - अहमशक्त इति ।।

अथ रामः लक्ष्मणोक्तां तातस्य पृथिवीरक्षणाशक्ति प्रतिक्षिपति - बालेति॥ बाल ! = पितृपराक्रमानभिज्ञ ! पश्य = जगति गीयमानं पितुरतुलं सामर्थ्यमनुस्मर। न कथमिति।। यस्य दानवोन्मूलनं तेजः द्यामपि रक्षति (सः) आत्मदेवताम् पृथिवीम् रक्षितुम् कथं न शक्तः (भवतीति शेषः) इत्यन्वयः। यस्य = दशरथस्य, दानवोन्मूलनम् = दैत्यविनाशकम्, तेजः = बलम्, द्यामपि = स्वाधिकारबहिर्भूतं स्वर्गमपि, रक्षति, सः, आत्मदेवताम् = आत्मैव देवता यस्याः स्वाधिकारे विद्य- = मानाम्, पृथिवीम् = वसुन्धराम्, रक्षितुम् = पालयितुम् कथं न शक्तः = समर्थो भवतीति शेषः। यः स्वतेजसा स्वर्गमपि रक्षति सः स्वराज्यरक्षणे सर्वथा समर्थ इति भावः। अनुष्टुब्वृत्तम् ॥ १९ ॥

अथ लक्ष्मणः रामेण निरस्ते क्रमभङ्गदोषे मातुर्दोषान्तरं प्रकटयति - किन्त्विति ॥ पुत्रस्नेहास् = भरते स्नेहाधिक्यात्, तथा चापलम् = अभिलषित- फलमुद्दिश्य तथा विधमनुचितं कर्म कृतम्। स एव तस्याः दोषः।

रामः मातुः पुत्रस्नेहं स्वाभाविकम्मन्यमानः स्वं प्रति भक्त्यानुरक्तं लक्ष्मणमधिक्षिपति - एष लोकस्वभाव इति॥ लोकानाम् = जनानाम्, एष स्वभावः = ईदृशी प्रवृत्तिः, बहुपुत्राणाम्मध्ये एकस्मिन् = कस्मिन्नपि पुत्रविशेषे ईषत् = किञ्चित् पक्षपातः = स्नेहाधिक्यम् भवतीत्येष लोकस्वभाव इति सम्बन्धः। तव = भवतः लक्ष्मणस्य, भ्रातृस्नेहः = सोदरप्रेम, किं साधारणः? = किं सामान्यम्?, अन्यापेक्षया मां प्रति तव स्नेहाधिक्यं स्फुटमेवेति भावः।

यदा सर्वे दोषा निरस्तास्तदा पितृमरण- कारणात्मकंदोषविशेषमाविर्भावयति — किम्बहुनेति॥

न माता तातमरणकारणम् तत्तु अन्यदेवेति राम आह - मा मा इति॥ मरणकारणमेव विवृणोति –नियमसलिलमिति॥ निरीक्षणवन्ध्ययोः पित्रोः नियम- सलिलं हर्तुम् तोयाधारे पटुध्वनितम् कलशम् क्षिपति सुते उषसि मृगयाम् याता राज्ञा वनद्विपशङ्कया रभसम् इषुः उन्मुक्तः (स एव इषुः) कालात् स्वयम् असून् अहरत् इत्यन्वयः निरीक्षणवन्ध्ययोः = निरीक्षणे = अवलोकने, वन्ध्यौ = असमर्थौ, तयोः = अन्धत्वेन आश्रमाद् बहिः पदमपि चलितुमसमर्थयोः, पित्रोः = मातापित्रोः, नियमसलिलम् = नियमार्थम् = सन्ध्यावन्दनादिहेतुकम्, सलिलम् = जलम्, हर्तुम् = आहर्तुम् आनेतुमित्यर्थः, तोयाधारे = नद्याम्, पटुध्वनितं यथा स्यात्तथा कलशम् = घटं, क्षिपति = प्रक्षिपति, सुते = मुनिकुमारे, उषसि = उषःकाले, मृगयाम् = आखेटम्, "मृगव्यं स्थादाखेटो मृगयास्त्रियाम्" इत्यमरः, याता = गच्छता, आखेटं कुर्वतेस्यर्थः, राज्ञा = अस्मत्पित्रा दशरथेन, वनद्विपशङ्कया = वनगजभ्रान्त्या, रभसम् = वेगेन, इषुः = वाणः, उम्मुक्तः (स एव) कालात् = समयं प्रतिपाल्य, (तातस्य) असून् = प्राणान्, अहरत्

= अपहृतवान्। ध्वनिसाम्यनिमित्तया वनगजभ्रान्त्या राज्ञा प्रयुक्तः शरो मुनिकुमारवधहेतुकं मुनिशापं द्वारीकृत्य तातमरणहेतुः सञ्जात इति भावः। हरिणी वृत्तम्। तरुलक्षणं हि - रसयुगहयै -र्न्सौ म्रौ स्लौ गो यदा हरिणी तदा।। २० ।।

लक्ष्मणः राममुखात् तातमरणरहस्यं ज्ञात्वा स्वापराधं स्वीकरोति - यद्येवमिति॥ यदि एवम् = पुत्रवियोगसन्तप्तमुनिशाप एव पितृविनाश हेतुश्चेत् अहमेव = लक्ष्मण एव अपराद्धः = दोषी अस्मीति शेषः। आर्यः = भवान्, प्रसीदतु = प्रसन्नोभवतु, बालोऽयमिति बुद्ध्या ममापराधः क्षन्तव्यः, कथाप्रसङ्गात् = पूर्वोक्तवार्ताप्रसङ्गात्, अविदितान्तरम् = अविदितम् अविज्ञातम् अन्तरम् = मार्गदैर्ध्यम् यथा स्यात्तथा भूत्वा पर्णशालाम् = पर्णकुटीम्, आगताः स्मः = समायाताः स्मः (वयमिति शेषः।)

लक्ष्मण निर्मितां पर्णशालाम्प्रविश्य सर्वतस्तद्वैलक्षण्यञ्च विलोक्य रामो लक्ष्मणस्य गृहनिर्माण कौशलं प्रशंसति- देवि पश्येति ॥

सर्वतोमुख नैपुण्यम् = सर्वतोमुखम् = सर्वत्रव्यापि नैपुण्यम् = कौशलम्, अत एव गृहनिर्माण चातुर्यमपि। शिल्पसौष्ठवमेव विवृणोति - धनुर्ज्यानिर्घोषैरिति॥ धनुर्ज्यानिर्घोषैः मृगकुलम् सरभसम् अपास्तम्, पर्णैः शाला कृता, प्रतिनवैः पुष्पैः शयनम् अपि (कृतमिति शेषः) वेत्राणाम् लताभिः इदम् आसनम् विरचितम् अभूत्, सिन्धोः जलैः बलिकुसुमभाजः वनभूमयः सिक्ताः इत्यन्वयः। धनुर्ज्यानिर्घोषैः = धनुषः = कार्मुकस्य ज्या = मौर्वी तस्याः निर्घोषैः = ध्वनिभिः, मृग कुलम् = पशुकदम्बकम्, सरभसम् = सवेगं यथा स्यात्तथा, अपास्तम् = निरस्तम् दूरीकृतमिति यावत्, पर्णैः = दलैः, शाला = गृहम्, कृता = निर्मिता, प्रतिनवैः = अभिनवैः, पुष्पैः = कुसुमैः, शयनमपि = शय्यापि (कृतमिति शेषः) वेत्राणाम् = वेतसाम्, लताभिः = वलीभिः, इदम् आसनम् = इदम् पीठम्, विरचितमभूत् = निर्मितमभूत्, सिन्धोः = नद्याः, जलैः = वारिभिः, बलिकुसुमभाजः = यज्ञपुष्पशालिन्यः, वनभुवः = काननप्रदेशाः, सिक्ताः = आर्द्रीकृताः, सेचनेन संस्कृता इत्यर्थः। सर्वतोभावेनेयं पर्णशाला अस्माकं निवासयोग्या कृतेति भावः। शिखरिणी वृत्तम् ॥ २१ ॥

सीता प्रासादापेक्षया पर्णशालायां वैशिष्ट्यं प्रतिपादयति - आर्यपुत्र ! कुक्षमपल्लवेति।। कुसुमानाम् = पुष्पाणाम्, पल्लवानि = किसलयानि तेषां समृद्धिः यासु ताभिः = पुष्पकिसलयसमृद्धिभिः, अथवा कुसुमपल्लवात्मिका समृद्धिः यासु ताभिः पर्णशालायाः विभूतिभिः = ऐश्वर्यैः, प्रासादबहुमानः = राजसदनपक्षपातः, कदर्थितः = अधरीकृतः, तिरस्कृत इत्यर्थः।

विविक्तम् = विजनम्, एकान्तमिति यावत्, वनान्तमारुतः = काननपवनः, सेव्यताम् = स्पर्शसुखमनुभूयताम्।

अशङ्कितेति॥ हे शुकालपे ! विशोषिताधरकमलम् विसर्पता तव मुखगन्धवाहिना तरङ्गितम् (एवम्भूतम्) शुकहरितम् पांसुधूसरम् स्तनांशुकम् अशङ्किता (भूत्वा) शिथिलय इस्यन्वयः। हे शुकालपे ! शुकस्य = कीरस्य आलपः = आलापः स इव आलपो यस्याः तत्सम्बोधने शुकालपे, विशोषिताऽधरकमलम् = यथा अधर कमलम् = अधर एव = ओष्ठ एव कमलम् = सरोजम् विशोषितम् = शुष्कतां प्रापितं भवति तथा विसर्पता = विविधं निःसरता, तव = सीतायाः, मुखगन्धवाहिना = मुखोद्भूतेन निःश्वासवायुना, तरङ्गितम् = तरङ्गवद्वर्त्तमानम् वीचिवञ्चञ्चलमिति व्यज्यते, (एवम्भूतम्) शुकहरितम् = कीरवद्हरिद्वर्णम्, पांसुधूसरम् = रजोधूसरितम्, स्तनांशुकम् = पयोधरवसनम्, अशङ्किता (भूस्वा) = एकान्तत्वेन शंकारहिता भूत्वा शिथिलय = बन्धनादुम्मोचय। पर्णशालाद्वारं सर्वथा एकान्तमतोऽशङ्किता

भूत्वा कुचस्थं वस्त्रं शिथिलीकृत्य स्वेच्छं वनान्तमारुतसेवनेन अध्वश्रमापनोदं कुरु इति भावः। सुचिरावृत्तम्। तल्लक्षणं तु - "चतुर्ग्रहैरिह उभौ सरौ गः"। रूपकालङ्कारः ॥ २२ ॥

इति आश्चर्यचूडामणे 'रमा' टीकायां प्रथमोऽङ्कः ॥

---------------------------

## द्वितीयोऽङ्कः

(ततः प्रविशति ललितसुकुमारवेषा शूर्पणखा)

**शूर्पणखा** - (सनिर्वेदम्) पुणो वि तं एव्व रामं पदिभावे पसाद इस्सम्। जस्स वअणप्पच्चरण लक्खणमासादिअ मूढसमिद्धं सरस्सदी विअ अकिदत्था एव्व णिवुत्तम्हि। अन्ज वि दाव मए पण्णसालस्स पस्से मुधा सो अअरुणो अपुरुसो अधम्मिओ अदक्खिणो सो मणुस्सअंतु पडिवालिदो। अहो ! णु खु मए मन्दभाआए सेल्लो संपादिओ। अहवा एत्तिआइ वा तस्स भाअहेआणि जेण अहं पच्चादिट्ठम्हि। होदु इमस्स पुव्वजस्स सव्वं णिवेदिअ पच्चा जाणिस्सम् (परिक्रामति) (पुनरपि तमेव रामं पतिभावे प्रसादयिष्यामि यस्य वचनप्रत्ययेन लक्ष्मण मासाद्य मूढसमृद्धं सरस्वतीय अकृतार्थैव निवृत्तास्मि| अद्यापि तावत् मया पर्णशालायाः पार्श्वे मुधा सः अकरुण अपुरुषः अधार्मिकः अदक्षिणः स मनुष्यजन्तुः प्रतिपालितः। अहो ! नु खलु मया मन्दभाग्यया शल्यः सम्पादितः। अथवा एतावन्ति वा तस्य भागधेयानि येनाहं प्रत्यादिष्टास्मि। भवतु अस्य पूर्वजस्य सर्वं निवेद्य पश्चात् ज्ञास्ये।)

(ततः प्रविशति रामः सीतया सह)

**रामः-** वेदेहि ! विदूरे सर्वं विस्मयनीयतया श्रूयते। पश्य-

**शैलायामिभिरम्बुवाहनिवहच्छायै स्त्रियामाचरैः**

**सेव्या पञ्चवटीति मे मतिरभूदुद्वेलकौतूहला।**

**सेयं देवि ! चिरोचितामुपनयत्युद्यानयोग्यां श्रियं**

**श्रोतुर्विस्मयनीयवस्तुविषयाः शैलाटवीसागराः॥ १ ॥**

**सीता–** अज्जउत्त ! अत्थि मह वि कोदूहलं वणन्तरप्पवुत्ताइ अच्चरिआइ पच्चा अन्तेउरणचवासस्स पुणो पुणो कहअमाणाए विह्नयं उप्पादेदुं। (आर्यपुत्र ! अस्ति ममापि कौतूहलं वनान्तरप्रवृत्तानि आश्चर्याणि पश्चादन्तःपुरनित्यवासस्य जनस्य पुनः पुनः कथ्यमानस्य विस्मयमुत्पादयितुम्।)

**शूर्पणखा –** (उपसृत्य) जेदु जेदु अज्जो। (जयतु जयत्वार्यः।)

**रामः**- सुन्दरि ! किं दृष्टस्त्वया लक्ष्मणः।

**शूर्पणखा-** आं दिट्ठो। ( आं दृष्टः।)

**रामः**- किं श्रुतं तेन मे वचनम्।

**शूर्पणखा-** सुदं एव्व। (श्रुतमेव।)

**रामः**- किमिति तेन त्वं प्रत्याख्याता।

**शूर्पणखा**- तवस्सिधम्मेण अजं उवअरन्तस्स मे किं तुए समाहि भङ्गस्स णिमित्तभूदार त्ति। (तपस्विधर्मेण आर्यमुपचरतो मे किं त्वया समाधिभङ्गस्य निमित्तभूतयेति।)

**रामः**- (सस्मितमात्मगतम्) तस्यानेन वचनेन भवितव्यम्। (प्रकाशम्) भद्रे ! पुनरपि भवतीं परिश्रमपथे नियोक्ष्यामि|

**शूर्पणखा** - मा मा एव्वं अज्जेण भणिदुं। एत्थ एव्व वसमाणा अज्जपादाइ अहं तवअरिस्सं। (मा मैवमार्येण भणितुम्। अत्रैव वसन्ती आर्यपादावहमुपचरिष्यामि।)

**सीता** - एसा खु तवस्सिणी अजउत्तं अहिकारिअ उप्पण्णेण सिणेहेण अत्तणो गुणपक्खपादं विभावेदि। (एषा खलु तपस्विनी आर्यपुत्रमधिकृत्योत्पन्नेन स्नेहेन आत्मनो गुणपक्षपातं विभावयति।)

**रामः**- (शूर्पणखां विलोक्य) भद्रे ! तवायं व्यवसायः मयापि प्रार्थनीयः। किन्तु -

**साक्षात्कृत्य समित्समिद्धमनलं यस्या गुरोराज्ञया**

**हस्तं दत्तमजात्मजेन मुनिना धर्मार्थमालम्बिषि।**

**साप्येषा पदमक्षरं जिगमिषोर्बन्धाय मे कल्पते**

**सन्नाहोऽयमतः परं सुवदने ! चिन्त्यस्त्वया चिन्त्यताम् ||२||**

**शूर्पणखा**- जड़ एव्वं ण सक्कुणोमि अण्णदो गमिदुं। एत्थ एव्व वसमाणा जीविअं परिच्चइस्सम्। (यद्येवं न शक्नोमि अन्यतो गन्तुम्। अत्रैव वसन्ती जीवितं परित्यक्ष्यामि।)

**सीता** - अजउत्त ! ण खु दाव उवक्खणीओ से ववसाओ। (आर्यपुत्र ! न खलु तावदुपेक्षणीयोऽस्या व्यवसायः।)

**रामः**- भद्रे ! भूयोऽपि लक्ष्मणाभिगमनार्थमेव भवतीं प्रार्थये।

**शूर्पणखा**- संदं पावं, संदं पावं, अजस्स वअणं पमाणीकरन्तीए मए अपहत्थिदो इत्थिआसमुदाआरो। (शान्तं पापम्, शान्तं पापम्, आर्यस्य वचनं प्रमाणीकुर्वत्या मया अपहस्तितः स्त्रीसमुदाचारः।)

**रामः** - भद्रे ! मा मैवम्। एष सनातनो धर्मः। पश्य-

**अभिसरणमयुक्तमङ्गनाना-**

**मिति तव सुन्दरि ! मा स्म भूद् वितर्कः।**

**ननु पतिमगमत् स्वयं नदीनां**

**सरिदपि शम्भुजटामुहूर्तमाला || ३ ||**

**शूर्पणखा** – अज्जपादेसु परवसा अहं किं ण करिस्सम्। (आत्मगतम्।) होदु, जइ सो जणो दाणिं वि पच्चादेसपरुसो म अन्तरेण भवे, पच्चा अहं सहअं एव्व अत्तणो पंकिदिं पडिवज्जिस्सम्। (इति

निष्क्रान्ता) (आर्य पादेषु परवशाहं किं न करिष्यामि। भवतु, यदि स जनः इदानीमपि प्रत्यादेश परुषो मामन्तरेण भवेत्, पश्चादहं सहजामेवात्मनः प्रकृतिं प्रतिपत्स्ये।)

**सीता –** अजउत्त ! णं तवस्सिणीं बालिअं पच्चादिसंतेण अज्जउत्तेण अअं दाव जणो उक्कण्ठाभाअणं किदो। (आर्यपुत्र ! ननु तपस्विनीं बालिकां प्रत्यादिशता आर्यपुत्रेण अयं तावज्जनः उत्कण्ठाभाजनं कृतः।)

**रामः**– देवि ! न संसर्गमर्हति कुटुम्बिनां अनर्गलः स्त्रीजनः।

**सीता –** जइ एव्वं अविस्ससणीओ जणो किस्स हेदुणो कुमारस्स समीपे पेसिङ्गो। (यद्येवम् अविश्वसनीयो जनः, कस्य हेतोः कुमारस्य समीपे प्रेषितः।)

**रामः–** देवि ! तया सह कुमारस्य सम्बन्धः कुतः। ननु तस्याः प्रत्यादेशव्यपदेशः।

**सीता—** हा ! कुमारेण पच्चाखिदे का उण से गई। (हा ! कुमारेण प्रत्याख्याते का पुनरस्या गतिः।)

**रामः**– (सीतां निरीक्ष्य) देवि ! तिष्ठतु सर्वम्।

**चरणनलिनसाध्यं यानमाहार्यमम्भः**

**शयनमवनिपृष्ठं मण्डनं स्नानमात्रम् |**

**तव तरुणि ! तथापि त्वं श्रिया चक्षुषी मे**

**हरसि पुरमयोध्यामावसन्तीव चित्रम्** ॥ ४ ॥

**सीता–** (आत्मगतम्) किं णु खु ण जाणादि अज्जउत्तो णं महरिसिपदिणीए अणसूआए अस्समे मं विसज्जअन्तीए मए दिण्णं वरं तुह भत्तुणो दसणपहे सव्वं मण्डणं भविस्सदित्ति। (किन्नु खलु न जानात्यार्यपुत्रः ननु महर्षिपत्न्या अनसूयया आश्रमे मां विसर्जयन्त्या मे दत्तं वरं तव भर्तुर्दर्शनपथे सर्वं मण्डमं भविष्यतीति।)

(नेपथ्ये) तिष्ठ तिष्ठ पिशिताशने ! तिष्ठ |

**रामः**– (आकर्ण्य) अये ! लक्ष्मणस्येव स्वरः।

**सीता**– हं सो एव्व। (हं तस्यैव।)

(ततः प्रविशति लक्ष्मणः स्वरूपधारिण्या शूर्पणखया निष्कोशेन निवस्त्रिंशेन च)

**लक्ष्मणः**– तिष्ठ तिष्ठ पिशिताशने ! तिष्ठ |

**रामः**– (आकर्ण्य दृष्ट्वा) लक्ष्मण ! किमिदम्।

**भीमदंष्ट्रमरुणोर्ध्वमूर्धजं शैलवर्ष्म जलदोदरच्छवि|**

**ताटकां हतवतस्ततोऽपि मे रूपमेतदवशं भयावहम्**॥ ५ ॥

**सीता** – (ससम्भ्रमम्) अज्जउत्त! वारेहि वारेहि दाणिं रक्खसि। (आर्यपुत्र ! वारय वारयेदानीं राक्षसीम्।)

**रामः** - देवि ! न भेतव्यम्। किं न दृष्टपूर्वं त्वया चित्रभित्तौ पिशाचिकारूपम् ।

**सीता** - हिअअ ! किं एदं। णं एसो अज्जउत्तो। अज्जउत्तसणाहस्म तुह किं पडवेपणं। (हृदय ! किमेतत्। नन्वेष आर्यपुत्रः। आर्यपुत्रसनाथस्य तव किं प्रवेपनम्।)

**शूर्पणखा** – दिट्ठिआ बुभुक्खिदाए मए तावसपिशिदासणजादणिव्वेदाए सअं एव्व उवणदाइ सिणिद्धसुउमाराइ भक्खरूपाइ| आं इमाइ खादिअ सीदं अज्जलावणस्स उपाअणं करिस्सम् (इत्यभिधावति) (दिष्टया बुभुक्षिताया मम तापसपिशिताशनजातनिर्वेदायाः स्वयमेवोपनते स्निग्धसुकुमारे भक्षरूपे। आं इमे खादित्वा सीतामार्यरावणस्य उपायनं करिष्ये।)

**लक्ष्मणः**- अभिधावत्येषा।

**व्याजृम्भते जलधरोदरचुम्बिबाहु-**

**रावर्तते क्षणनतोन्नतभूमिचका।**

**व्यादाय वक्त्रमभिधावति भीममस्मा-**

**नुद्घाटितार्गलकवाटपुटा पुरीव ॥ ६ ॥**

**रामः**- एषैषा

**गगनमुत्पतति क्षितिमण्डले भ्रमति धावति तिष्ठति जृम्भते ।**

**नखमुखैरसिवर्ष्माभिरम्बरे जलमुचां शकलीकुरुते कुलम् ॥ ७ ॥**

**सीता** - अजउत्त ! वारेहि वारेहि दाणिं रक्खसिं। (आर्यपुत्र ! वारय वारयेदानीं राक्षसीम्।)

**रामः**- - देवि ! न भेतयं न भेतव्यम्।

**शून्यमन्तररविन्दलोचने ! यन्त्रमेतदपरं न राक्षसी।**

**लीढमीषदधुना ममायुधैरार्तनादमवनौ पतिष्यति॥८॥**

**लक्ष्मणः**- प्रसीदत्वार्यः। अहमेवैनां प्रतिबध्नामि।

(इत्यन्तरं प्रविशति)

**शूर्पणखा** - हद्धि, अच्चाहिदं खु एदम्। भक्खरूपाइ मे परक्कमंति। (हा धिक्, अत्याहितं खल्वेतत्। भक्षरूपाणि मे पराक्रमन्ते।)

**लक्ष्मणः**- आः त्वामद्य विहङ्गेभ्यो विभजामि।

**शूर्पणखा**- इमं दाव पुव्वं कठोरहिअअं एक्कन्दे खादिस्सं (इमं तावत् पूर्व कठोरहृदयं एकान्ते खादिष्यामि।)

**लक्ष्मणः**- एष गृहीतोऽहम्। अये ! प्रमत्तोऽस्मि|

**रामः** - तिष्ठ तिष्ठ।

**मुनयो न वयं कृतागसि त्यज संरम्भमिदं धृतं धनुः।**

**करुणाविमुखाः शिलीमुखाः सततं राक्षसि ! राक्षसेषु नः ॥९॥**

**शूर्पणखा** – (लक्ष्मणं गृहीत्वा) हद्धि, लहूइ गिरिसिहराइ। (हा धिक्, लघूनि गिरिशिखराणि।)

(खमुत्पत्य निष्कान्ता)

**रामः–** (सशोकम्) देवि ! किमद्यापि स्त्रीस्वभावं न मुसि।

**साध्वसेन सह धैर्यमास्थिता मुञ्च मां हरिणमुग्ध लोचने ! |**

**तूर्णमुत्पतति वर्त्म वार्मुचां राक्षसी भुजगृहीतलक्ष्मणा ॥ १० ॥**

**सीता–** अज्जउत्त ! को मं रक्खदि। (आर्यपुत्र ! को मां रक्षति।)

**रामः–** कुमारः केन रक्ष्यते ।

**सीता–** णं तस्स हत्थगदं आउहं। (ननु तस्य हस्तगतमायुधम्।)

**रामः–** (सविषादम्) आयुधेन किं प्रयोजनं राक्षसीभुजगृहीतस्य।

**धिगहं मोनुषं जन्म वसुधामात्रगोचरम् ।**

**राक्षसी लक्ष्मणं हृत्वा तिरोऽभूत् पश्यतो मम॥११॥**

**सीता–** (सविषादम्) हदाए मए अज्जउत्तं पडिबन्धमाणाए कुमारो हिअसेल्लं कारिदो। (हतया मयार्यपुत्रं प्रतिबध्नत्या कुमारो हृदयशल्यं कारितः।)

**रामः–** (शरमुद्धरन्) कस्य नु खलु दिव्यास्त्रस्यैषा विषयः।

(नेपथ्ये) हं ! पादिदन्हि, अज्ज ! सरणं सरणं। (हं ! पातितास्मि, आर्य ! शरणं शरणम्।)

**रामः–** अये ! स्त्रीस्वर इव| कुतोऽयं भूमिकम्पः। नूनं पातिता लक्ष्मणेन राक्षसी।

**सीता** – अहं वि तं एव्व तक्केमि। (अहमपि तदेव तर्कयामि।)

**रामः** – भद्रे ! हस्तमवलम्ब्य मामनुगच्छ, यावदहं लक्ष्मणमन्विच्छामि।

**सीता** – घत्तिस्सं । (प्रयतिष्ये।) –

(उभौ परिक्रामतः)

**रामः** – (परिक्रम्यावलोक्य) अये !

**जगतीधरधातुसान्द्रमम्भः**

**सरितः सर्पति किन्नु काननान्तम्।**

**तरुणारुणकान्ति लोहितं नु**

**च्युतमुत्पातपयोधरोदरेभ्यः ॥ १२ ॥**

(ततः प्रविशति लक्ष्मणः)

**लक्ष्मणः-** (सानुक्रोशम्) हन्त ! धिङ्यां स्त्रीव्यपदेशिनीं प्रति प्रथममुद्यतास्त्रम्। अथवा नेदमनुशयस्थानम्।

**दृष्ट्वा तस्याश्च दौरात्म्यं ज्ञात्वा भ्रातुश्च निश्चितम्।**

**व्यस्तमस्त्रं निशाचर्याः कथञ्चित् कर्णनासिके॥१३॥**

यावदार्यमुपसर्पामि (उपसृत्य) जयत्वार्यः।

**रामः** –( सहर्षमालिङ्गय)

**समुच्छ्वसिहि चेतस्त्वं कुशली लक्ष्मणोऽधुना।**

**रेमे वनेऽपि येनाहमयोध्यामावसन्निव ॥ १४ ॥**

(भूयः परिष्वज्य) कुमार ! क्व सा राक्षसी।

**लक्ष्मणः –**(आत्मगतम्) किमिति वक्ष्यामि। (अधोमुखस्तिष्ठति)

(ततः प्रविशति साकन्दा शूर्पणखा)

**शूर्पणखा** – हा अज्जलावण ! हा अज्जकुंभअण्ण ! हा अज्जवि भीसण ! परित्ताअहि परित्ताअहि मं तापसव्वाजपडिच्छण्णाणं मणु स्साणं अविणआदो | (हा आर्यरावण ! हा आर्यकुम्भकर्ण ! हा आर्यविभीषण। परित्रायस्व परित्रायस्व मां तापसव्याजप्रतिच्छन्नयो-र्मनुष्ययोरविनयात्।)

**रामः-** लक्ष्मण ! पश्य पश्य-

**सन्ध्यारुणा सलिलवाहपरम्परेव**

**शैलस्य धातुरसधूसरितेव भित्तिः।**

**बालातपप्रणयिनीव तमालवीथी**

**सन्दृश्यते सरसलोहितताम्रमूर्तिः ॥ १५ ॥**

**लक्ष्मणः-** (स्वगतम्) दिष्ट्या कुत्सनीयं कर्मेदमार्यः स्वयमेव परिच्छिनत्ति।

**रामः-** लक्ष्मण ! युक्तं कृतं त्वया। ननु वधस्थाने स्त्रीणामेष एव दण्डः।

**सैषा शूर्पणखा नाम वसन्ती दण्डके वने। खरदूषणयोर्ज्येष्ठा रावणस्य कनीयसी ॥ १६ ॥**

इति श्रूयते ।

**शूर्पणखा**– सुमरह सुमरह मणुस्सा तुम्हाणं अविणअं, तस्स फलं अज्जप्पहुदि दक्खिस्सह। (स्मरतं स्मरतं मनुष्यौ ! युवयोरविनयम् तस्य फलमद्यप्रभृति द्रक्ष्यथः।)

**लक्ष्मणः**– आः अपेहि तावत्।

**शूर्पणखा**– खरदूषणाणं मे इमं अवत्थं दंसइस्सम्। (निष्क्रान्ता) (खरदूषणयोः मे इमामवस्थां दर्शयिष्यामि।)

**सीता** – अजउत्त ! अज्ज उच्छसिदम्हि। अहवा इत्थं पडिभये रक्खसीहि वणप्पदेसे तह लावण्णवदी सुउमारगत्ता सीमंतिणी कहं विअ वत्तदि। (आर्यपुत्र ! अद्योच्छ्वसितास्मि। अथवा इत्थं प्रतिभये राक्षसी- भिर्वनप्रदेशे तथा लावण्यवती सुकुमारगात्रा सीमन्तिनी कथमिव वर्तते।)

(रामो लक्ष्मणमीक्षते)

**लक्ष्मणः**– ( कर्णे ) एवमिव।

**सीता** – अज्जउत्त ! किं कुमारो मन्तेदि। (आर्यपुत्र ! किं कुमारो मन्त्रयते।)

**रामः** – देवि !

**वक्त्रेण स्फुरिताधरेण शफरप्रस्पन्दिना चक्षुषा**

**मध्येन स्तननम्रितेन पृथुलेनारोहचक्रेण च।**

**सव्रीडं चकितं पदे पदशतं न्यस्तं यथा लीलया**

**सा जाता भयकारणं तव विधेः शक्त्या द्विषो रक्षसाम् ॥१७॥**

**सीता**– अलिअं अलिअं एदं। (अलीकमलीकमेतत्।) **रामः**– ननु लक्ष्मणः कथयति।

**सीता**– हं तस्सिं जणे मे विस्संभो आसी। अज्जउत्तेण साहु णिवारिदो। (हं तस्मिन् जने मे विस्रम्भ आसीत्। आर्यपुत्रेण साधु निवारितः।)

**रामः**– वत्स ! लक्ष्मण ! कथं त्वया पूर्वमुपलक्षिता सा।

**लक्ष्मणः**– (सस्मितम्) सर्वत्र दाक्षिण्यात् दोषं न पश्यत्यार्यः। कथमौष्ण्यमग्नेश्छाद्यते।

रामः – सत्यमेतत्।

**दाक्षिण्यमृद्वी जनता शठानां वशवर्तिनी।**

**स्वयमुद्धर्तुकामानां लतेवोज्झितकण्टका ॥ १८ ॥**

सा खलु स्त्रीसामान्यान्नावमन्तव्या। दुष्करं खलु त्वया कृतम्।

(लक्ष्मणः अधोमुखस्तिष्ठति)

**सीता** – अज्जउत्त ! दाणिं वि रक्खसीं पेक्खामि विअ। (आर्यपुत्र। इदानीमपि राक्षसीं पश्यामीव।)

**रामः-**

**त्रिभुवनरिपुरस्या रावणः पूर्वजश्चे**

**दसुलभ इति नूनं विश्रमः कार्मुकस्य।**

**रजनिचरनिबद्धं प्रायशो वैरमेतद्**

**भवतु भुवनभूत्यै सर्वरक्षोवधेन ॥ १९ ॥**

**सीता** - अज्जउत्त। पेक्ख पेक्ख दिवसक्ख अपाडलेहिं किरणेहि - उद्धरिअ रक्खसीए लोहिदकद्दमं पाअवसिहराइ लिंपदि विअ भअवं सुज्जो (आर्यपुत्र | पश्य पश्य दिवसक्षयपाटलैः, किरणैरुद्धृत्य राक्षस्या लोहितकर्दमं पादपशिखराणि लिम्पतीव भगवान् सूर्यः।)

**रामः-** एष परिणतो दिवसः। वत्स| लक्ष्मण !

**खड्गं निधेहि शिथिलीकुरु कार्मुकज्या-**

**मङ्गैरपां विरजसामवगाहनार्द्रैः।**

**अन्तर्नियम्य मरुतः परिवर्त्य मन्तान्**

**सायन्तनं नियममद्य वयं चरामः ॥ २० ।।**

**लक्ष्मणः**– यदाज्ञापयत्यार्यः । (तथा करोति)

**राम-** एष एषः-

**रथचरणायुधस्य चरणेन हतो रभसा-**

**न्नभस इव च्युतो नमुचिरस्रकणैः क्षरितैः।**

**प्रतिनवबन्धुजीवकुसुमच्छविभिः सविता**

**शशिमुखि ! दिङ्मुखानि किरणैररुणीकुरुते॥ २१ ॥**

(निष्क्रान्ताः सर्वे)

इति श्रीशक्तिभद्रविरचिते चूडामणिनाटके द्वितीयोऽङ्कः।

## <u>व्याख्यानम्</u>

यं ध्यात्वा जगदीश्वरं त्रिनयनं गौरीपतिं शकरं,

रामेणापि च राक्षसेन्द्रविजये लब्धा प्रसिद्धिः परा।

यं ज्ञात्वा शिवतामुपैति परमां प्राज्ञो जनश्शाश्वतीं,

नित्यं रामपराय बन्धनभिदे देवाय तस्मै नमः ॥

अथ शूर्पणखा कामानलदग्घहृदया लक्ष्मणवचनप्रत्ययेन पर्णशालासान्निध्यमवाप्य तस्यागमनं प्रतीक्षमाणाऽप्यनागतं तमवलोक्य सनिर्वेदं दीर्घश्वासादिभिरनुभावैरुपलक्षिता ततः प्रतिनिवृत्य किमिदानीम्मम कर्त्तव्यमस्तीति चिरं विमृश्य अनन्तरकरणीयं कर्म निश्चिनोति – पुनरपि इति॥ इतः पूर्व रामेणापि सा निशाचरी वञ्चिताऽभूवदत आह् – पुनरपीति। तमेव रामम् = दयादाक्षिण्यादिगुणैः युक्तम् लक्ष्मणाग्रजम्, न लक्ष्मणवदतिरुक्षमिति। पतिभावे = भर्तृभाव निमित्तीकृत्य, यस्य वचनप्रत्ययेन = लक्ष्मणः त्वाम् स्वीकरिष्यति' इति वचने विश्वासेन, लक्ष्मणम् आसाद्य लक्ष्मणं प्राप्य, सरस्वती इव = शारदा इव, मूढसमृद्धम् = मोहेनाधिकम्, अकृतार्थैव = अलब्ध- मनोरथैव, निवृत्तास्मि = प्रत्यावृत्तास्मि। यथा शारदा मूढोऽयमिति ज्ञात्वा तस्मान्निवर्त्तते तथाऽहमपि कामसुखानभिज्ञम् लक्ष्मणम्मत्वा निष्फलैव निवृत्तास्मीति भावः। अकरुणः = विपिने एकाकिनी शरणागताहं तेन संकेत व्याजेन दूरीकृता अतो दयारहितः, अधार्मिकः = सत्यपालनाद्याचारशून्यः, अपुरुषा रसभावानभिज्ञत्वात् पौरुषहीनः, अदक्षिणः = प्रथमदर्शने वचनमात्रेणाव्यकृता भिनन्दः, अतो दाक्षिण्यरहितः, मनुष्यजन्तुः = यतोऽयं स्वदुर्भाग्यवशात् स्वयमुपनतं सुखं नाभिनन्दयत्यतो मनुष्यरूपेण जन्तुरेव। मन्दभाग्यया = मन्दं भाग्यं यस्याः तया, शल्यः = अत्र शल्यशब्दः पीडातिशयस्य लक्षकः, अतः शल्यसमुत्थदुःखमित्यर्थः। भागधेयानि = सौभाग्यानि, प्रत्यादिष्टास्मि = प्रत्याख्यातास्मि, यस्मात् त्रैलोक्यस्वामिनः रावणस्य सर्वाभिलाषपूरणैकसाधनभूता सहोदरी अहम् तेन प्रत्याख्याता अतः तस्य रामानुजस्य सौभाग्यमेतावदेव नाधिकम्, स्वल्पमेवे त्यर्थः। पूर्वजस्थ = पूर्वं जातः पूर्वजः तस्य = रामस्य सर्वम् = प्रत्याख्यान- वृत्तं निवेद्य पश्चाद् ज्ञास्यामीत्यर्थः।

सीतया सह रङ्गशालाप्रविष्टो रामः राक्षसावलोकनोत्कण्ठितः सन्ननेकाऽनेकविकटराक्ष-सव्याप्तत्वेन श्रुताम् पञ्चवटीतथाविधां दृष्ट्वा लङ्कामपि तथैव मन्यमानो दूरवर्त्तिवस्तूनां तथाकथितविस्मय- नीयत्वं प्रतिपादयति – शैलायामिभिरिति ॥ शैलायामिभिः अम्बुवाहनिवहच्छायैः त्रियामाचरैः पञ्चवटी सेव्या इति मे मतिः उद्वेलकौतूहला अभूत्, देवि ! सा इयम् चिरोचिताम् उद्यानयोग्याम् श्रियम् उपनयति, शैलाटवीसागराः श्रोतुः विस्मयनीयवस्तुविषयाः (भवन्ति) इत्यन्वयः। शैला- यामिभिः = पर्वतवद् विस्तृतैः पर्वताकारैरित्यर्थः, अम्बुवाहनिवहच्छायैः = अम्बुवाहानाम् = जलधराणाम् निवहः = समूहः, तस्य छाया इव छाया = शोभा येषाम् तैः = जलधरसमूहशोभैः, कृष्णवर्णैः, प्रतिक्षणं परिवर्तितशरीरैरिति वा, त्रियामाचरैः = निशाचरैः, पञ्चवटी = एतन्नामधेयाऽटवी, सेव्या= निवासयोग्या, इति, मे = मम (रामस्य) मतिः = बुद्धिः, उद्वेलकौतुहला = अतिशयकुतूहला, अभूत्, देवि ! = सीते !, सा= विस्मयनीयत्वेन श्रुतिपथमागता, इयम् = अतथात्वेन दृश्यमाना पञ्चवटी, चिरोचिताम् = चिरपरिचिताम् उद्यानयोग्याम् = उपवनोपयुक्ताम्, श्रियम् = शोभाम् उपनयति = प्रापयति, शैलाटवीसागराः = शैलाश्च अटव्यश्च सागराश्चेति शैलाटवीसागराः = पर्वतारण्यसमुद्राः, श्रोतुः = श्रावकस्य, विस्मयनीयवस्तुविषयाः = आश्चर्यकरवस्त्वाश्रयाः, भवन्ति। 'पर्वताकारमायाविनिशाचराश्रया पञ्चवटी' इति मया पूर्व श्रुतं न चात्र तथाविधं किमपि विस्मयनीयत्वेन दृष्टम्, प्रायः पर्वतादयो दूरत एव श्रावकस्य कौतुहलाश्रया भवन्तीति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

सीतापि स्वकुतूहलं प्रकाशयति – आर्यपुत्र। इति ॥ पश्चात् = वनवासानन्तरम्, वनान्तरप्रवृत्तानि आश्चर्याणि = वनमध्यघटितानि आश्चर्यकराणि अर्थान्तरराणि, पुनः पुनः = वारम्वारम्, कथयन्त्याः = निवेदयन्स्याः (मम) अन्तःपुरभित्यवासस्य = नित्यं शुद्धान्तनिवासस्य जनस्य, विस्मयम् उत्पादयितुम् = आश्चर्य जनयितुम् कुतूहलमस्ति = कौतुकमस्ति।

प्रत्याख्यान कारणं पृच्छति - किमिति ॥ किमिति = तव प्रत्याख्यानस्य किं कारणमित्यर्थः।

अथ शूर्पणखा लक्ष्मणकृतस्व प्रत्याख्यान कारणं निवेदयति - उपस्विधर्मेणेति।। तपस्विधर्मेण = तपोव्रतानाम् नियमवलम्ब्य, आर्यम् = रामम् उपचरतः = सेवमानस्य, मे = मम, किं त्वया समाधिभङ्गस्य = यमनियमादि - अङ्गसाध्योपास्यनिष्ठचित्तलयविनाशस्य, निमित्तभूतया = हेतुभूतया (प्रयोजनमिति शेषः)। तपोधनाssचारमवलम्ब्य गुरुमनुचरतो मम सविधे समाधिभङ्गकारणभूतायास्तव नास्तिकिमपि प्रयोजनमिति भावः।

अथ सीता रामानुरक्तायां शूर्पणखायां गुणग्राहकतां प्रतिपादयति - एषा खल्विति॥ आर्यपुत्रम् = स्वामिनं रामम्, अधिकृत्य = विषयीकृत्य, अवलम्ब्येत्यर्थः, उत्पन्नेन = जातेन, स्नेहेन = अनुरागेण, एषा खलु = शूर्पणखा, तपस्विनी = तपोधना, आत्मनः = स्वस्य, गुणपक्षपातम् = गुणग्राहकत्वम्, विभावयति प्रदर्शयति।

अथ रामः शूर्पणखाया आत्मपरिग्रहामहमवगत्य नैसर्गिकं गाम्भीर्यं प्रियम्वदत्वञ्च अपरित्यजन्नेव गम्भीरया वाचा प्रत्यादिशति भद्रे इति॥ अत्र व्यवसाय शब्दः व्यवसितवचनः। तवायं व्यवसायः = योऽयम्मया सह सम्वासः त्वया व्यवसितः सन् माम्प्रति प्रार्थ्यते सः मयापि = रामेणापि, प्रार्थनीयः = प्रार्थयितुं योग्यः।

यद्यपि त्वं सौन्दर्यादिगुणैः मम सम्वासयोग्यैव तथाप्यस्ति कश्चिदुपरोध इति मत्वाऽऽह - साक्षात्कृत्येति॥

सुवदने ! अहम् गुरोः आज्ञया अजात्मजेन मुनिना (सहितो भूत्वा) समित्समिद्धम् अनलम् साक्षात्कृत्य यस्याः दत्तम् हस्तम् आलम्बिषि साऽपि एषा अक्षरम् पदम् जिगमिषोः मे बन्धाय कल्पते (अतः) अयम् सन्नाहः, अतःपरम् त्वया चिन्त्यः चिन्त्यताम् इत्यन्वयः। हे सुवदने ! = हे सुमुखि !, अहम् = रामः, गुरोः = पितुः, आज्ञया = आदेशेन, अजात्मजेन मुनिना = वसिष्टेन (सहितो भूत्वा) समित्समिद्धम् अनलम् = समिद्भिः = एधैः (यागादौ हूयमानैः काष्ठविशेषैः) समिद्धः = प्रवृद्धः यः अनलः = वह्निः तम् = हूयमानकाष्ठविशेष-प्रज्वलिताग्निम्, साक्षात्कृत्य = साक्षित्वेन प्रमाणीकृत्य, यस्याः = सीतायाः, दत्तम् = कन्यापित्रा जनकेन तत्पुरोहितेन शतानन्देन वा प्रदत्तम, हस्तम् = पाणिम्, धर्मार्थम् = अग्निहोत्रादिना धर्ममुद्दिश्य, आलम्बिषि = अवलम्बितवान्, गृहीतवानित्यर्थः, साऽपि = पितुराज्ञया धर्मार्थ पत्नीत्वेन गृहीतापि, एषा = सीता, अक्षरम् = न क्षरतीति अक्षरम् = जन्मादिक्रियारहितम्, अविनाशि, नित्यमिति यावत्, पदम् = ब्रह्मप्राप्तिरूपमवस्थाविशेषम्, जिगमिषोः = प्राप्तुमिच्छतः, मे= मम, बन्धाय = अवरो- धाय, कल्पते = भवति, अतोऽयं सन्नाहः = धर्ममुद्दिश्य विवाहितापि सीता मम मोक्षप्राप्तौ बाधिका भवेदतः प्रत्यक्षदृश्यमानवनवासजटावल्कलादि - धारणात्मिका सन्नद्धता ('तैयारी' इति लोके) अवलम्बितेति शेषः, अतः परम् = यतो मदीयः अवस्थाविशेषः ईदृशः, अतः परम् = अत ऊर्ध्वम्, चिन्त्यः = विचारणीयः विषयः, अथवा ममातिरिक्तः अन्य एव कश्चिद् युवा, त्वया = भवत्या, चिन्त्यताम् = विचार्यताम्, अथवा ईदृशे अवस्थाविशेषे विद्यमानस्य ममापि कर्तव्यम् त्वयैव चिन्तनीयम्, मत्कृते यदुचितं तद् ब्रुहीति रामाशयः। शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

अथ राक्षसी रामोक्तिसूचितं प्रत्यादेशमवगम्य विक्षुब्धहृदयापि तं वशीकर्तुम् चेष्टमाना स्वाभिप्रायं प्रकटयति - यद्येवमिति ॥

व्यवसायः = भवत्सविधे प्राणत्यागात्मको निश्चयः, अपहस्तितः = परित्यक्तः, स्त्रीसमुदाचारः = स्त्रीणाम् = नारीणाम् समुदाचारः = शीलरक्षणाचारा, मर्यादाविशेष इति यावत्।

सनातनः = सदाभवः सनातनः = शाश्वतः। नारीणाम्प्रियं प्रति अभिसरणं नाम धर्मः सनातन इति रामः प्रतिपादयति – अभिसरणमिति॥ सुन्दरि ! अङ्गनानाम् अभिसरणम् अयुक्तम् इति (योऽयम्) तव वितर्कः (सः) मा स्म भूत्, ननु शम्भुजटामुहूर्त्तमालासरिदपि नदीनाम् पतिम् स्वयम् अगमत्, इत्यन्वयः। सुन्दरि ! = शोभने !, अङ्गनानाम् = रमणीनाम्, अभिसरणम् = प्रियमुद्दिश्य सङ्केतस्थानम्प्रति गमनम्, अयुक्तम् = अनुचितम्, इति = इत्येवं रूपम्, तव = भवस्याः, वितर्कः = विकल्पः, मा स्म भूत् = न भवतु, ननु, शम्भुजटामुहूर्त्तमाला = शम्भोः = शङ्करस्य जटा= सटा तस्याः मुहूर्त्तम् = क्षणं यावत् मालाभूता = दामभूता, सरि दपि = गङ्गापि, नदीनाम् = सरिताम्, पतिम् = भर्त्तारम्, सागरमिति यावत्, स्वयम् = आत्मना, अगमत् = अगच्छत्। स्पर्शमात्रेण पातकिनः पुनाना गङ्गा सुरलोकात् शम्भोर्जदावल्लीमाश्रित्य तेन मुहूर्त्तं लालितापि बहुपत्नीकमम्बुधिं स्वेच्छया प्राप्तवतीति लोके प्रथितमेवाऽतो रमणीनामभिसरणात्मको धर्मो लोकसम्मत एवेति भावः। पुष्पिताग्रावृत्तम्। तल्लक्षणं हि – "अयुजि न युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।" अर्थान्तरन्यासालङ्कारः ॥ ३ ॥

अथ स्वकार्यसिद्धये 'आर्यपादेषु' इत्यादिना लक्ष्मणसमीपगमनरूपं रामप्रस्ताव प्रकटरूपेण स्वीकृत्य पुनरपि लक्ष्मणकृतप्रत्यादेशं शङ्कमाना निशाचरी हार्दिकं दुरभिसन्धिम् प्रकटयति – भवतु इति।। यदि इदानीमपि = अधुनापि = पुनरपि तत्सविधे मम गमनानन्तरमपि, सः जनः = लक्ष्मणः, मामन्तरेण = मामुद्दिश्य प्रस्यादेशपरुषो भवेत् = प्रत्याख्यानकठिनो भवेत्, पश्चात् = प्रत्यादेशानन्तरम्, आत्मनः = स्वस्य, सहजाम् = स्वाभाविकीम्, प्रकृतिम् = स्वरूपम्, राक्षसीरूपामाकृतिमिति यावत्, प्रतिपत्स्ये = प्राप्स्यामि। पुनरपि लक्ष्मणेन प्रत्याख्याता सती मायारूपं परित्यज्य नैसर्गिक निशाचरीरूपं धारयिष्यामीति भावः।

शूर्पणखाविषयकं रामकृतप्रत्यादेशेन दुःख– मनुभवन्ती सीता कथयति – आर्यपुत्रेति॥ उत्कण्ठाभाजनं कृतः = उत्कण्ठाशब्दोऽत्र व्यसनवाची, अयं जनः व्यसनस्य भाजनम् = पात्रम् कृतः, त्वत्स्नेहव्यावृतायास्तस्या अतिचिन्तनीयं दशान्तरमालोच्य मम व्यसनाधिक्यं जायते इति सीताशयः।

अनर्गलः = अर्गलशब्दः श्रुतिस्मृतिसिद्ध– मर्यादालक्षकः तामतिक्रम्य इतस्ततः परिभ्रमणस्वभावः स्त्रीजनः = उन्मर्यादः स्त्रीसमाजः, कुटुम्बिनाम् = गृहस्थानाम्, संसर्गम् = साहचर्य्यम्, नार्हति = प्राप्तुं न शक्नोति।

प्रत्यादेशव्यपदेशः = प्रत्याख्यानार्थो व्याजः। लक्ष्मणसमीपप्रेषणात्मकेन छद्मना तस्याः प्रत्याख्यानं विहितमित्यर्थः।

चरणनलिन इति॥ हे तरुणि ! तव यानम् चरणनलिनसाध्यम्, आहार्य्यम् अम्भः, शयनम् अवनिपृष्ठम्, मण्डनम् स्नानमात्रम्, तथापि त्वम् अयोध्याम् पुरम् आवसन्ती इव मे चक्षुषी श्रिया हरसि इति चित्रम्, इत्यन्वयः| हे तरुणि = हे नव यौवने (यद्यपि) तव = सीतायाः, यानम् = गमनम्, चरणनलिनसाध्यम् = कमलवत्सुन्दरसुकुमाराभ्यां पादाभ्यां साध्यम्, आहार्य्यम् = भोज्यम्, अम्भः = जलमात्रम्, शयनम् = शय्या, अवनिपृष्ठम् = भूतलम्, मण्नम् = अलङ्कारः, प्रसाधनसाधनमिति यावत्, स्नानमात्रम् = मज्जनमात्रम्, (तथापि) त्वम् = सीता, अयोध्यां पुरम् = एतन्नाम्नीं नगरीम, आवसन्ती इव = निवसन्ती इव, मे = रामस्य चक्षुषी = नयने, श्रिया=

कन्या, हरसि = कर्षसि, इति, चित्रम् = आश्चर्यम्। यद्यपि पूर्वोक्तं सर्वमपि वस्तुजातं ग्लानिनिमित्तं तथापि त्वं स्व-स्वाभाविककान्त्या मम नेत्रयुगलं विषयान्तरेभ्यो निर्वर्त्त्य, अन्तःकरणेन सह आत्मतादात्म्यं नयसीति आश्चर्यमिति भावः। मालिनीवृत्तम्। तरलक्षणं हि "नन म य य युतेय म्मालिनी भोगिलोकैः"। उत्प्रेक्षा-लुप्तोपमयोः संसृष्टिः॥ ४॥

अथ सीता स्वयमेव आश्चर्यकारणं विमृशति- केन्नु - खल्विति॥ आर्यपुत्रः मम मण्डनविषयकम् अनसूयाऽनुग्रहं न जानाति इत्यर्थः। तव भर्तुरिति॥ इदमेव वरं सीतायै अनसूयया प्रदत्तम्, तच्चान्तिमेऽङ्के लङ्कायां सीताया अग्निप्रवेशबीजम्। पिशिताशने = पिशितम् = शुष्कमांसम् अशनम् = भोजनं यस्याः तत्सम्बोधने पिशिताशने राक्षसि इत्यर्थः।

निष्कोशेन = कोषबहिर्गतेन, निस्त्रिंशेन = खड्गेन।

लक्ष्मण! किमिद मिति॥ पुरोदृश्यमान- विलक्षणवस्तुस्वरूपजिज्ञासाविषयकमिदम्वाक्यम्। भीम- दंष्ट्रमिति॥ भीमदंष्ट्रम् अरुणोर्ध्वमूर्धजम् शैलवर्ष्मजलदो- दरछवि एतत् अवशम् रूपम् ताटकाम् हतवतः मे ततोऽपि भयावहम् (प्रतिभाति) इत्यन्वयः। भीमदंष्ट्रम् = विकटदशनम्, अरुणोर्ध्वमूर्धजम् = अरुणाः = रक्तवर्णाः ऊर्ध्वगताश्च मूर्धजाः = कचाः यस्मिन् तत् रक्तवर्णोर्ध्वगतकुन्तलमित्यर्थः, शैलवर्ष्म = शैल इव = पर्वत इव (कठोरं विस्तृतञ्च) वर्ष्म = शरीरं यस्य तत् पर्वताकारमिति यावत्, जलदोदरच्छवि = जलदस्य = पयोधरस्य यत् उदरम् = मध्यभागः तस्य छविरिव छविः = शोभा यस्य तत् अतिश्यामलमित्यर्थः, एतत् = पुरोदृश्यमानम्, अवशं रूपम् = रूपविशेषम् (ईर्ष्याक्रोधादिपरवशं रूपम्) ताटकाम् = एतन्नाम्नीं निशाचरीम्, हतवतः = प्राणान् हृतवतः, मे = मम ततोऽपि = ताटकाया अपि, भयावहम् = भयप्रदम् (प्रतिभाति)। ताटकापेक्षयाऽपि स्वविकटस्वरूपेणेयं भयावहेति भावः। रथोद्धता वृत्तम्। तल्लक्षणं हि - "रात्परैर्नरलगै रथोद्धता"। लुप्तोपमालङ्कारः ॥ ५ ॥

प्रवेपनम् : = कम्पनम्।

तापसपिशिताशनेति ॥ तापसानाम् = तपो- धनानाम्, पिशितानि = मांसानि, तेषाम् अशनेन = भक्षणेन जातः = समुत्पन्नः निर्वेदः = वैराग्यं यस्याः सा तापसपिशिताशनजातनिर्वेदा| उपायनम् = उपहारः। तपस्विमांसभक्षणे जातवैराग्यायाः क्षुधापीडितायाः ममकृते स्निग्धकुमारद्वयं भोज्यत्वेन स्वयमेव उपस्थितम् अतोऽनेन भक्ष्येण क्षुधां पूरयित्वा सीताम् आर्यरावणाय उपहाररूपेण दास्यामि, इति शूर्पणखाया आशयः।

व्याजृम्भते इति।। (एषा) जलधरोदरचुम्बिबाहुः भीमं व्याजृम्भते, क्षणनतोन्नतभूमिचक्रा आवर्त्तते वक्त्रं व्यादाय उद्घाटितार्गलकवाटपुटा पुरीव अस्मान् अभिधावति इत्यन्वयः| जलधरोदरचुम्बिबाहुः = पयोधरमध्यस्पर्शिभुजा, भीमं व्याजृम्भते = भयङ्करं यथा स्यात्तथा जृम्भां करोति, क्षणनतोन्नतभूमिचक्रा = प्रतिक्षणं पद्भ्याम् नतम् उन्नतञ्च भूमिचक्रं यस्याः सा तथाविधा भूत्वा, आवर्त्तते = परिवर्त्तते, (एवम्भूता सा) उद्घाटितार्गलकवाटपुटा = उद्घाटितम् अर्गलम् = कवाटनिरोधकयन्त्रम् ययोः ते कवाटपुटे यस्यां तथाविधा, पुरीव = नगरीव, अस्मान् = अस्माकमभिमुखीभूत्वा, भीमम् = भयङ्करम्, वक्त्रमू = मुखम् व्यादाय = विदीर्य, अभिधावति = वेगेन आगच्छति। वसन्ततिलकं वृत्तम्। उपमालङ्कारः ॥ ६॥

गगनमुत्पततीति ॥ (एषा) गगनम् उत्पति, क्षितिमण्डले भ्रमति, धावति, तिष्ठति, जृम्भते, अम्बरे असिवर्ष्माभिः नखमुखैः जलमुचाम् कुलम् शकली कुरुते इत्यन्वयः। (एषा निशाचरी) गगनम् = आकाशम् उत्पतति = ऊर्ध्वं गच्छति, क्षितिमण्डले = भूमण्डले, भ्रमति = इतस्ततः भ्रमणं करोति, धावति = अतिवेगेन चलति, तिष्ठति = स्थितिं करोति, जृम्भते = जृम्भां करोति

(जंभाई इति लोके) अम्बरे = आकाशे, असिवर्ष्माभिः = खड्गशरीरैः, नखमुखैः = नखाप्रभागैः, जलमुचाम् = पयोधराणाम्, कुलम् = समूहम् शकलीकरोति = खण्डशः करोति। पृथिव्यामाकाशे चैक- कालावच्छेदेनैव धावनजलधरखण्डनादिनानाव्यापारं करोतीति भावः। द्रुतविलम्बितवृत्तम्। तल्लक्षणं हि - "द्रुतविलम्बितमाह नभौ भरौ"। दीपकालंकारः ॥ ७ ॥

शून्यमन्तरेति ॥ हे अरविन्दलोचने ! (एषा) न राक्षसी (किन्तु) एतत् अपरम् अन्तः शून्यम् यन्त्रम्। अधुना ममायुधैः ईषत् लीढम् आर्त्तनादम् अवनौ पतिष्यति इत्यन्वयः| अरविन्दलोचने ! = कमलनयने !, (एषा) न राक्षसी = न निशाचरी (अपितु) एतत् = पुरोवर्ति, अपरम् = द्वितीयम्, अन्तः शून्यम् = सत्त्वबलरहितम् असारमित्यर्थः, यन्त्रम् = दार्वादिनिर्मितं चेतनव्यापारितभ्रमणादिविलासास्पदम् यन्त्रम् (मशीन इति लोके) अधुना = इदानीम् ममायुधैः= ममास्त्रैः, ईषत् लीढम् = किञ्चिद्ग्रसितम् खण्डितमिस्यर्थः, आर्त्तनादम् = आर्त्त = दुःखविधुरः नादः = ध्वनिः यस्मिन् पतने (तथा भूत्वा) अवनौ = पृथिव्याम्, पतिष्यति = आगमिष्यति। एषा निशाचरी साम्प्रतमेव मम शस्त्रप्रहारैः विनश्यत्यतो नास्ति त्वत्कृते भयावसर इति भयविह्वलां सीताम्प्रति रामस्य सान्त्वना वचनम्| रथोद्धतावृत्तम्। अपह्नुत्यलङ्कारः ॥ ८ ॥

आः त्वामिति ॥ आः इति कोपसूचकम् अव्ययम् अद्य = इदानीमेव, त्वाम् = शूर्पणखाम्, विहङ्गेभ्यः = गृध्रकाकादिपक्षिभ्यः, विभज्नामि = विभज्य ददामि।

इमं तावदिति ॥ इमम् = लक्ष्मणम्, कठोरहृदयम् = कठिनान्तःकरणम्, एकान्ते = रहसि। प्रथमम् एकान्ते एनं नीत्वा वशीकरिष्यामि, तत्रापि यद्ययं पूर्ववदेव कठोर- हृदयः स्यात्तदा निर्विघ्नमेनं हत्वा क्षुत्पीडामपनेष्यामि, पश्चात् रामं प्रत्यपि इममेव दण्डप्रयोगं करिष्यामीति शूर्पणखाया गूढाशयः।

मुनयो नेति ॥ राक्षसि ! कृतागसि वयम् न मुनयः, इदं धनुः धृतम्, संरम्भं त्यज, नः शिलीमुखाः राक्षसेषु सततं करुणाविमुखाः (सन्ति) इत्यन्वयः| राक्षसि ! = निशाचरि ! कृतागसि = कृतापरराधे, कृतापराधंजनमुद्दिश्य वयं न मुनयः = वयं न क्षमाशीलाः तपस्विनः, इदम् = मत्समीपवर्त्ति, धनुः = शरासनम्, धृतम् = गृहीतम्, संरम्भम् = क्षोभम्, त्यज = जहीहि, नः = अस्माकम्, शिलीमुखाः = बाणाः, राक्षसेषु = निशाचरेषु, सतम् = निरन्तरम्, करुणाविमुखाः = दयापराङ्मुखाः पतन्तीति शेषः। यथा तपोभङ्गभीरवः मुनयः लोकैः कृतमपराधं क्षमन्ते न तथा वयं स्वदपराधं क्षन्तुं शक्नुमः, सर्वेष्वेव राक्षसजातीयेषु वद्धवैराः वयं त्वादृशां कृतापराधानां निग्रहाय निष्करुणबाणसन्नद्धं धनुः धृतवन्तः, अतोऽलोभेणेति भावः। सुन्दरी वृत्तम्। तल्लक्षणं हि - अयुजो यदि सौ जगौ युजोः सभराल्गौ यदि सुन्दरी तदा| यमकाऽलङ्कारः ॥ ९ ॥

साध्वसेनेति ॥ हे हरिणमुग्ध लोचने ! (यतः) राक्षसी भुजगृहीतलक्ष्मणा भूत्वा वार्मुचाम् वर्त्म तूर्णमुत्पतति (अतः) धैर्यम् आस्थिता साध्वसेन सह मामू मुञ्च इत्यन्वयः। हरिणमुग्धलोचने ! = मृगवत्सुन्दरनयने (भयप्रसङ्गात्) राक्षसी = निशाचरी, भुजगृहीतलक्ष्मणा = भुजाभ्यां गृहीतः लक्ष्मणः यया तथा भूस्वा, वार्मुचाम् = जलदानाम् वर्म = मार्गम्, नभनि इत्यर्थः, तूर्णमुत्पतति = वेगेनार्ध्वं गच्छति (अतः) धैयमास्थिना = धृतिमास्थिता धैर्यमवलम्ब्येति यावत्, साध्वसेन = त्रासेन सह, माम् = रामम् मुञ्च = परित्यज। नास्त्यवसरो भयस्य| विपन्नो लक्ष्मणोऽतस्तस्कृते मम साहाय्यमपेक्षितम्। रथोद्धतावृत्तम्। सहोक्त्य लङ्कारः ।। १० ।।

धिगहमिति || वसुधामात्रगोचरम् मानुषं जन्म अहम् धिक (करोमीति शेषः) पश्यतः मम राक्षसी लक्ष्मणं हृत्वा तिरोऽभूदित्यन्वयः| वसुधामानगोचरम् = पृथिवीमात्रविषयम्, मानुषं जन्म = मनुष्यजन्म, अहम् = रामः, धिक = अत्यधिकं निन्दामि, मम पश्यतः = पश्यन्तम्मामनादृत्य, राक्षसी, लक्ष्मणं हृत्वा = ममानुज मपहृत्य, तिरोऽभूत् = अदृश्याऽभूत्। गृहीतलक्ष्मणां राक्षसीं हन्तुं शक्ता अपि तस्या आकाशोत्पतनकारणात् गगनमार्गगमनासमर्था कृयं किं कर्तव्यविमूढाः स्मः, अतोऽतिकुत्सितमिदम्मनुष्यजन्मेति भावः। अनुष्टुब् वृन्तम् ॥ ११ ॥

अथ रामो दूरादेव राक्षस्याः रक्तप्रवाहमालोक्य अन्यथा सम्भावयन्नाह – जगतीधरेति॥ जगतीधरधातुसान्द्रम् सरितः अम्भः काननान्तम् सर्पति किन्नु, उत्पातपयोधरोदरेभ्यः च्युतम् तरुणारुणकान्ति लोहितं किन्नु इत्यन्वयः। जगतीधरधातुसान्द्रम् = पर्वतस्थगैरिकैः अत्यधिकं कलुषितम्, अतिरक्तमिति यावत्, सरितः = उन्नतशिखराग्निः सरन्त्या नद्याः, अम्भः = जलम्, काननान्तम् = पर्वतमधोऽधोवनमध्यम्, सर्पति किन्नु = प्रवहति किन्नु ? उत्पातपयोधरोदरेभ्यः = उत्पातपयोधराणाम् = जगद्विनाशसूचकमेधानाम् उदरेभ्यः = मध्यभागेभ्य, च्युतम् = स्खलितम् पतितमित्यर्थः, तरुणारुणकान्ति = बालादित्यसमानशोभम्, लोहितम् रूधिरम् किन्नु! लक्ष्मणखड्गेनोच्छिन्नकर्ण– नासिकायाश्शूर्पणखायाः प्रवहद्रुधिरं विलोक्य तत्र पर्वतस्थगैरिकैः कलुषीकृतमम्भस्त्वं सन्दियते। कालभारिणी वृत्तम्। तल्लक्षणं हि – विषमे ससजा यदा गुरूचेत्, समरा येन तु कालभारिणीयम्। सन्देहाऽलंकारः॥१२ ॥

सानुक्रोशम् = अनुक्रोशेन सह यथा स्यात्तथा। सकरुणमित्यर्थः। स्त्रीव्यपदेशिनीम् = स्त्री इति व्यपदेशः शब्दमात्रम् अस्याम् अस्तीति स्त्रीव्यपदेशिनी ताम्, स्त्री इति शब्दमात्रवाच्याम् प्रति प्रथमम् उद्यतास्त्रम् = समुन्नतायुधम्, माम् = लक्ष्मणम्, धिक् = स्वात्मानं कुत्सयामि।

नेवमनुचितमित्यभिप्रायेणाह– अथवेति॥ इदम् = मदीयं कर्म अनुशयस्य = पश्चातापस्य, इयं हि नाम्ना स्त्री न तु कर्मणा तथापि एनां प्रति मम शस्त्रप्रहारो निन्दाया एव विषयः। अथवा भ्रात्राऽभिलषितमेव कर्म मया कृतमतो नास्ति चिन्ताऽवसर इति भावः।

स्वकर्मण औचित्यं समर्थयन्नाह – दृष्टवेति॥ तस्थाः दौरात्म्यम् दृष्टवा, भ्रातुः च निश्चितम् ज्ञात्वा, निशाचर्याः कर्णनासिके कथञ्चित् अस्त्रम् न्यस्त मित्यन्वयः। तस्याः = राक्षस्याः, दौरात्म्यम् = दुष्टभावम्, दृष्ट्वा = अवलोक्य, भ्रातुः च = रामस्य निश्चितम् = निश्चयम्, ज्ञात्वा = अवगत्य निशाचर्याः = राक्षस्याः, कर्णनासिके कर्णौ च नासिका च तस्मिन् कर्णनासिके, कथञ्चित् = येन केन प्रकारेण (स्त्रीत्वात्) अस्त्रम् = आयुधम्, न्यस्तम् = स्थापितम्। अनुष्टुब्वृत्तम् ॥ १३ ॥

प्रहृष्टमना रामो लक्ष्मणं समालिङ्गय आनन्दविह्वलः सन् स्वहृदयमेव सम्बोधयन्नाह – ममच्छ्वसिहांति हे चेतः। अधुना त्वम् समुच्वसिहि, लक्ष्मणः कुशली। येन अहम् वनेऽपि अयोध्याम् आवसन् इव रेमे इत्यन्वयः। हे चेतः = हे हृदय, अधुना = इदानीम् समुच्छ्वसिहि = श्वासं गृहाण, लक्ष्मणः = एतन्नामको समानुजः, कुशली = सकुशलः, येन = लक्ष्मणेन (यं प्राप्येति यावत्।) अहम् = रामः, वनेऽपि = काननेऽपि, अयोध्याम् = साकेतम् आवसन् इव = निवसन् इव, रेमे = रमणं करोमि। लक्ष्मणप्रभावादेव विपिनेऽपि मया साकेतनिवाससुखमनुभूयते। अनुष्टब्वृत्तम्। उत्प्रेक्षाऽलङ्कारः ॥ १४ ॥

तापसव्याजप्रतिच्छन्नयोः = तापसानाम् = तपोधनानाम् व्याजेन = छद्मना, प्रतिच्छन्नयोः समाच्छन्नयोः (मनुष्ययोः) अविनयात् = चापल्यात्, माम् = शूर्पणखाम्, परित्रायस्व = रक्ष। अनेन वचसा राक्षसी रामलक्ष्मणयोः तथाकथित तापसवेषत्वमारोपयति।

अथ रामश्शूर्पणखाया दृष्टपूर्वमेव रूपं वर्णयति - सन्ध्यारुणेति ॥ (एषा राक्षसी) सरसलोहितताम्रमूर्तिः सन्दिश्यते, (उत्तिष्ठन्ती) सन्ध्यारुणा सलिल वाहपरम्परा इव, (भवति) (आसीना) धातुरसधूसरिता शैलस्य भित्तिः इव, (दृश्यते) (शयाना) बालातपप्रणयिनी तमालवीथी इव (दृश्यते) इस्यन्वयः। एषा पुरो दृश्यमाना निशाचरी सरसलोहितताम्रमूर्तिः = सरसेन = अत्यन्तं द्रवीभूतेन लोहितताम्रमूर्तिः = ताम्रा = ताम्रवर्णा मूर्तिः = आकृतिः यस्याः तथा भूता संदृश्यते = समवलोक्यते। (एवं भूता सा उत्तिष्ठन्ती) सन्ध्यारुणा = सायंरक्ता, सलिलवाहपरम्परा इव = सलिलवाहानाम् = मेघानाम् परम्परा इव = पङ्क्ति इव भवतीति शेषः। (आसीना सती) धातुरसधूसरिता = धातुरसेन = गैरिकद्रवेण, धूसरिता = सम्पृक्ता, शैलस्य = पर्वतस्य, भित्तिः इव = कुड्यम् इव (दृश्यते) (शयाना एषा) बालातपप्रणयिनी = नवातपस्निग्धा तमालवीथी इव = तमालश्रेणी इव (दृश्यते) उपमात्रयेण तस्या अवस्थान्तरं प्रदर्श्यते। वसन्ततिलकं वृत्तम्। उपमाऽलङ्कारः ॥ १५ ॥

कुत्सनीयम् = निन्दायोग्यम्, कर्म = स्त्री विषय शस्त्रप्रहाररूपं कार्यम्, परिच्छिनन्ति = जानाति।

रामो लक्ष्मणकृत शूर्पणखाकर्णनासिकच्छेदन- स्यौचित्यं समर्थयते - युक्तं कृतमित्यादिना। सैषा शूर्पणखेति ॥ सा एषा शूर्पणखा नाम दण्डके वने वसन्ती खरदूषणयोः ज्येष्ठा रावणस्य कनीयसी इति श्रूयते इत्यग्रिमादन्वयः। या शूर्पणखा नाम राक्षसी श्रूयते सा एषा इत्यर्थः। दण्डके वने = एतन्नामके विपिने वसन्ती = निवसन्ती, खरदूषणयोः = एतन्नामकयोः राक्षसयोः, ज्येष्ठा = अग्रजा, रावणस्य एतन्नामकस्य राक्षसराजस्य, कनीयसी = अनुजा कनिष्ठेत्यर्थः, श्रूयते = श्रुतिपथमायाति, मुनिवचनाच्छ्रुतपूर्वेयमित्यर्थः। अनुष्टुब्वृत्तम् ॥ १६ ॥

अपोह = दूर गच्छ।

अथ निष्कान्तायां राक्षस्यां सीता समाश्वास्याऽऽह - अद्येति ॥ अद्य = साम्प्रतं राक्षसीगमनानन्तरम्, उच्छ्वसिताऽस्मि = सनिश्वासाऽस्मि। अथवा राक्षसीभिः = निशाचरीभिः, प्रतिभये = भयप्रदे, वनप्रदेशे = काननप्रान्ते, लावण्यवती = सौन्दर्यवती, सुकुमारगात्रा = सुकोमलशरीरा, सीमन्तिनी = रमणी, कथमिव = केन प्रकारेण वर्तते = (एकाकिनी) विद्यते।

सीतया पृष्टो रामश्शूर्पणखावृत्तान्तं निवेदयति-वक्त्रेणेति॥ स्फुरिताऽधरेण वक्त्रेण, शफरप्रस्पन्दिना चक्षुषा, स्तननम्रितेन मध्येन, पृथुलेन आरोहचक्रेण च (सह वर्त्तमानया) यया लीलया सव्रीडं चकितम् पदे पदशतं न्यस्तम्, सा रक्षसामू द्विषः विधेः शक्त्या तव भयकारणम् जाता इत्यन्वयः। स्फुरिताधरेण = स्फुरितः = चञ्चलः, अधरः = ओष्ठः यस्मिन् तेन वक्त्रेण = मुखेन, (सह वर्त्तमानया यथा इत्यस्य सर्वत्रान्वयः) शफरप्रस्पन्दिना = शफरवत् = मीनवत् प्रस्पन्दितुम् = प्रस्फुरितुम् शीलम् अस्य तथाविधेन चक्षुषा = नेत्रेण, स्तननम्रितेन = स्तनाभ्याम् = कुचाभ्याम् नम्रितेन = नम्रीभूतेन (भाराधिक्यात्) मध्येन = मध्यभागेन कटि- प्रदेशेनेत्यर्थः, पृथुलेन = विपुलेन, आरोहचकेण= जघनमण्डलेन च, सह वर्त्तमानया यया = शूर्पणखया, सव्रीडम् = सलज्जम्, चकितम् = साश्चर्यं यथा स्यात्तथा, पदे = पदप्रमाणप्रदेशे, पदशतम् = पदानाम् = पदन्यासानाम् शतम्, लीलया = विलासपूर्वकम्, न्यस्तम् = कृतम्, सा = स्वरूपप्राप्ता शूर्पणखा, रक्षसाम् = निशाचराणाम्, द्विषः = शत्रोः, विधेः = विधातुः, शक्त्या = प्रभावेण, तव = सीतायाः, भयकारणम् = भीतिहेतुः, जाता = अभूत्। ललितसुकुमारवेषया यया सव्रीडं लीलया वयमवलोकिताः सैव राक्षसविनाशहेतोर्विधेः प्रभावेण तव भयदा सञ्जाता। शूर्पणखामाध्यमेन

राक्षसैः सह अस्माकं वंरभावमुत्पाद्यास्मद्द्वारा विधिना राक्षसविनाशप्रसङ्गः समानीत इति भावः। शार्दूलविक्रीडितं वृत्तम्। लुप्तोपमा- उलङ्कारः ॥ १७ ॥

हमिति || हम् इति अनुतापकार्यभूतो वाग्रपोऽनुतापः। तस्मिञ्जने मे विनम्भः विश्वासः आसीत् यत् तत् कष्टम्। आर्यपुत्रेण स अनः = राक्षसीरूपः निवारितः = अवरोधितः इति यत् तत् साधु इति योजना अत्र द्रष्टव्या।

सर्वत्र दाक्षिण्यादिति॥ सर्वत्र = सर्वस्मिन्स्थाने, मित्रे रिपौ च, दाक्षिण्यात् = दक्षिणस्य भावः दाक्षिण्यं तस्मात् = अनुकूलतागुणकारणात्। दाक्षिण्यगुणादेव राक्षस्याः प्रत्यादेशः साक्षान्न कृतः न तु तस्याः दुष्टाचरणज्ञानाभावात्। अग्नेः = अनलस्य, औष्ण्यम् = उष्णता, कथम् = केन प्रकारेण छाधते = आच्छाद्यते। परन्तु दोषः आच्छन्नः स्थातुं न सम्भवति। यतः आर्यस्य एतत् दाक्षिण्यं नैसर्गिकमत - एव विदितदौगम्याया राक्षस्याः साक्षात्प्रत्याख्यानाभावे मत्समीपप्रेषणे वा नानौ- चिस्यमितिलक्ष्मणस्याशयः।

दुर्जनं प्रतिः विहितं दाक्षिण्यमपि दोषत्वमावहति - इत्यत आह - सत्यमिति॥ तदेव समर्थयते - दाक्षिण्यमृद्वीति॥ दाक्षिण्यमृद्वी जनता स्वयम् शठानाम् उद्धर्त्तुकामानाम् उज्झितकण्टका लता इव वशवर्तिना (भवति) इत्यन्वयः। दाक्षिण्य मृद्धी = दाक्षिण्यगुणेन सरला, जनता = जनसमूहः, शठानाम् = दुर्जनानाम, स्वयमेव = आत्मनैव, उद्धर्तुकामानाम् = पश्वादिबन्धनार्थं लतोद्धारणार्थमुद्यतानां पुरुषाणाम्, उज्झितकण्टका = स्वभावतः कण्टकरहिता, लता इव = वल्ली इव, वशवर्त्तिनी = वशङ्गता भवतीति शेषः। यथा कण्टकरहिता लता उद्धर्तुकामानां स्वयं वशङ्गता भवति तथैव स्वभावतः सरलो जनसमूहः स्वयमेव दुष्टानां वशवर्त्ती भवतीति भावः। अनुष्टुबवृत्तम्। उपमालङ्कारः॥१८ ॥

दाक्षिण्याभावेऽपि तस्याः प्रत्याख्यानं दुष्करमेवेत्याशयेनाह - सा खलु इति॥ खलु शब्दोऽत्र प्रसिद्धवाची, तेन अरण्यरमणीयस्तस्याः सौन्दर्यादिकं महद्वैशिष्टयं प्रसिद्धत्वेन दर्शयति। एषा या काचन, इति स्त्रीसामान्यबुद्ध्या = नारीसामान्यज्ञानेन त्वया अवमानिता न खलु सा लोकोत्तरसौन्दर्यादिगुणैस्ताहगव- मननयोग्येत्याशयः। अत एवम्भूतायास्तस्याः त्वया कृतः प्रत्यादेशो दुष्कर इति भावः।

इदानीं शूर्पणखावरूप्यकरणमेव पूर्वप्रतिज्ञातस्य सकलनिशाचरवधस्य परमं द्वारम्मन्यमानो राम आह - त्रिभुवनरिपुरिति त्रिभुवनरिपुः रावणः अस्याः पूर्वजः चेत् (तर्हि) कार्मुकस्य विश्रमः असुलभः इति नूनम्, एतत् वैरम् प्रायशः रजनिचरनिबद्धम् (अतः) सर्वरक्षोवधेन भुवनभूत्यै (एतद् वैरम्) भवतु इत्यन्वयः| त्रिभुवनरिपुः = सर्वलोकपीडनात् त्रिलोकीशत्रुः, रावणः = दशकन्धरः, अस्याः = उच्छिन्नकर्णनासिकायाः शूर्पणखायाः, पूर्वजः = अग्रजः, चेत् = यदि (तर्हि) कार्मुकस्य = शरासनस्य, विश्रमः = विश्रामः, असुलभः = कठिनः, इति नूनम् = निश्चितम् तेन सह नैरन्सर्येण युद्धमनिवार्यमिति व्यज्यते, एतद् वैरम् = शूर्पणखा वैरूप्यहेतुकः शत्रुभावः, प्रायशः = प्रायः, रजनिचरनिबद्धम् = राक्षसजातिसम्बद्धम् (अतः) सर्वरक्षावधेन = सकलराक्षसविनाशेन, (हेतुना) भुवनभूत्यै = लोककल्याणाय, भवतु = अस्तु। स्वभगिनीवैरुप्येण वात्सल्यवशारसञ्जतक्रोधो रावणो मया सहावश्यं युद्धं करिष्यत्यतो नास्ति मम शरासनस्य विश्रामावसरः, किन्तु तेन सह इयमेव शत्रुता सर्वराक्षसविनाशकारिणी भूता सती लोकाभ्युदयहेतुका भविष्यतीति भावः। मालिनीवृत्तम्॥१९॥

अथ सीता अस्ताचलगामिनं सूर्यमवलोक्य कौतुकाशयं द्योतयति – आर्यपुत्र ! पश्येति ॥ भगवान् सूर्यः = भुवनभास्करो रविः, दिवसक्षयपाटलेः = दिनावसानाद्धेतोः अतिरक्तैः, किरणैः = रश्मिभिः, राक्षस्याः लोहितकर्दमम् = रक्तपङ्कम्, उद्धृत्य = हस्ते कृत्वा, पादपशिखराणि =

वृत्ताग्रभागान्, लिम्पति इव = लेपनं करोति इव। अत्र राक्षस्याः रक्तकर्दमम् पादपाग्रभागलेपन–साधनत्वेनोत्प्रेक्षितम्।

अथ राम आसन्नसान्ध्यवेलामालोक्य लक्ष्मणसीताभ्यां साकं सायन्तनविहितं कर्म चिकीर्षुः लक्ष्मणं प्रति शत्रुविषयसन्नाहमोचनाय कथयति– खड्गमिति। (लक्ष्मण !) खडगं निधेहि, कामुकज्यां शिथिलीकुरु, विरजसाम् अपाम् अवगाहजार्द्रैः अङ्गैः (सहिताः) वयम् मरुतः अन्तर्नियम्य, मन्त्रान् परिवर्त्य, अद्य सायन्तनं नियमं चरामः इत्यन्वयः। लक्ष्मण ! खड्गम् = असिम्, निधेहि = नीचैः, स्थापय, कार्मुकज्याम् = धनुर्मौर्वीम्, शिथिलीकुरु = उत्तरितां कुरु, विरजसापू = विगतधूलीनाम्, अपाम् = जलानाम्, अवगाहनार्द्रैः = अवगाहनाद्धेतोः आर्द्रै = सिक्तैः, अङ्गैः = अवयवः (सहिताः) वयम् = रामादयः, मरुतः = प्राणवायूनू, अन्तर्नियम्य = अन्तर्मुखीकृत्य, मन्त्रान् = गायत्र्यादीन्, परिवर्त्य = आवृत्तिपूर्वकं जस्वा, अद्य = इदानीम्, सायन्तनम् = सायङ्कालेऽवश्यकर्त्तव्यत्वेन विहितम्, नियमम् = सन्ध्यावन्दनादिकं कर्म, चरामः = अनुतिष्ठामः। वसन्ततिलकं वृत्तम् ॥ २० ॥

अथ राममुखेन कविः सन्ध्यावर्णनमवलम्ब्य अङ्कं समापयति – एष एष – रथचरणायुषस्येति ॥ हे शशिमुखि, सविता चरणायुधस्य चरणेन हतः रभसात् नभमः च्युतः नमुचिः इव चरितैः अस्त्रकणैः प्रतिनवबन्धुज्जीवकुसुमच्छविभिः किरणैः दिङ्मुखानि अरुणीकुरुते इत्यन्वयः। शशिमुखि ! = चन्द्रवदने !, सविता = सूर्यः, रथचणायुधस्य = विष्णोः, चरणेन = पादेन, हतः = प्रक्षिप्तः, रभसात् = वेगात्, नभसः = आकाशात्, च्युतः = स्खलितः, नमुचिः इव = एतन्नामकराक्षस इव, पतनसमये परितः क्षरितैः = प्रसृतैः, अस्रकणैः = रुधिरविन्दुभिः, प्रतिनवबन्धुजीव– कुसुमच्छविभिः = प्रतिनवानाम् = अभिनवानाम् बन्धुजीवकुसुमानाम् = बन्धूकपुष्पाणाम्, "रक्तकस्तु बन्धूको बन्धुजीवकः" इत्यमरः, छविरिव छविः = शोभा येषाम् तैः अतिरक्तैः, किरणैः = रश्मिभिः, दिङ्मुखानि = आशामुखानि, अरुणीकुरुते = रक्तीकरोति। यथा देवासुरसंग्रामे विष्णोः सुदर्शनचक्रेणोच्छिन्नशिराः नमुचिर्ग– गनात् पतितः सन् स्वशोणितकणैः ककुबानानि अरुणीचकार तथैवाधुना अस्ताचलचूडावलम्बी भास्करो बन्धूकपुष्पशोभैरश्मिभिर्दिशामुखानि रक्तीकरोतीति भावः। नर्दटकं वृत्तम्। तल्लक्षणं हि– यदि भवतो नजौ भजजला गुरुनर्दटकम्| पूर्णोपमाऽलङ्कारः ॥ २१ ॥

निष्क्रान्ताः = सर्वेऽपि रङ्गशालातः बहिर्गताः।

॥ इति आश्चर्यचूडामणे रमाटीकायां द्वितीयोऽङ्कः ॥

---

## तृतीयोऽङ्कः

(ततः प्रविशति श्रमवानृषिकुमारः)

**ऋषिः** – तिष्ठतु चिराव दिवसकरान्वयो यं विभूषयता रामेण खरदूषणकर्णधारां यातुधानकेतुमतीं जनस्थानतो यमस्थानवर्तिनीं कृतवता कृताः खलु मद्विधानामपि स्वैरसञ्चारक्षमा वनभूमयः। साम्प्रतं नूनं रामाश्रयाद् राक्षसजीवितरसज्ञा मृत्युजिह्वा लङ्कामपि लेढि।

(किंचिद्गत्वा) तत् क्व नु खलु तीर्थयात्राश्रमं विगमयामि। (परिक्रम्यावलोक्य) अत्रासन्नेनाश्रमेण भवितव्यम्। तथा हि-

**दर्भैः सैकतमण्डलानि सरितः श्यामानि मन्त्रास्तृतै-**

**रभ्यासात् कलमाह शाखिनि शुकी वाक्यानि वैखानसैः।**

**ऊधो मातुरपास्य मां प्रति जटाचीराजिनप्रत्ययाद्**

**नीवाराञ्जलिभिर्भृता मुनिसुतैरायान्ति बाला मृगाः॥१ ॥**

अत्र न शृणोमि स्वाध्यायम्। (ध्यायन्) न पश्यामि होमधूमम्। भवतु, प्रविश्य ज्ञास्ये। (प्रविश्यावलोक्य ) इदमाश्रमपदमचिरोत्सन्नमिव दृश्यते। तथा हि-

**विसृजति हुतगन्धं वेदिरास्तीर्णदर्भा**

**न जहति बलिभूमौ षट्पदाः सौहृदय्यम्।**

**इदमपि तरुशाखाचक्रवाले विषक्तं**

**द्विगुणयति पिशङ्गं वल्कलं पल्लवानाम् ॥ २॥**

अत्र हि कश्चिद् विद्यते चेदाह्वयामि। अहमतिथिः कोऽत्र भोः। (नेपथ्ये) इत इतः स्वागतमतिथये।

ऋषिः –न शून्यमिव।

(ततः प्रविशति यात्रासम्भारव्यापृतो वृद्धतापसः)

**वृद्धः** - इत इतः स्वागतम तिथये ।

**ऋषिः**- तपोधन ! भवन्मात्रावशेषं वहवाभोगमाश्रममहं पश्यामि।

**वृद्धः**- अयं तावत् पौलस्त्यबन्धोर्मारीचस्याश्रमः।

**ऋषिः** –श्रूयते स कौशिकसुतेभ्यो रामशरोच्छिष्ट इति। किं स एव।

**वृद्धः**— अथ किम्। अस्ति रावणभगिनी शूर्पणखा।

**ऋषिः** - तिष्ठ, तपोवने रामशासनात् सञ्चरतो लक्ष्मणस्य मुखादेव श्रुतं शूर्पणखाविरूपकरणं खरदूषणवधश्च, ममापूर्वो मारीचवृत्तान्त एव।

**वृद्धः** - ततः सक्रोधो रावणः मारीचस्याश्रममागतवान् |

**ऋषिः** - ततस्ततः ।

**वृद्धः** - ततः "त्वं मृगरूपेण रामं विलोभ्य दूरीकुरुष्व, तावदहं सीतां स्वीकरिष्यामि" इति बहुशस्तेन स निर्बद्धः।

**ऋषिः** - ततस्ततः ।

वृद्धः— ततस्तदानीं रामगौरवं बहुधा व्याहृत्य मुहूर्तं तूष्णीं समपद्यत स मारीचः।

ऋषिः – सदृशमनुष्ठानमस्य| ततस्ततः।

वृद्धः – ततः सक्रोधो रावणः

**रचयन् भ्रुकुटीः प्रहस्य कोशा-**

**दुदहासीदसिमुन्मयूखरेखम्।**

**विषमीभवति स्म यस्य धारा-**

**सममैरावतदन्तिदन्तकोशैः ॥ ३ ॥**

ऋषिः – तत्र न विस्मयः। ततस्ततः।

वृद्धः— ततः सद्यः प्राणभयान्नु पूर्ववैरस्मरणान्नु स रावणविधेयतां प्रतिपन्नः।

ऋषिः– ध्रुवमभिजनानुरूपमनुष्ठानम्। कुतः,

**असतां सहजो भावश्छन्नः केनापि हेतुना।**

**संस्कार इव बीजानां फलेन सह जायते ॥ ४ ॥**

ततस्ततः।

वृदः– ततस्तस्मादितो रावणदूषितादुद्विग्ना निरगच्छन्नियमिनः। दृश्यते ननु त्वयापि मे गमनत्वरा|

ऋषिः– यद्येवं साधयतु भवान्। अहमितो गच्छामि|

वृद्धः– चाढम् ।

(निकान्तौ)

विष्कम्भकः।

(ततः प्रविशति रामः सीतया सह)

रामः– (निमित्तं सूचयन्) देवि ! अयमद्य

**आक्रान्ताः किन्नु बालो भरत इति परैरुत्तराः कोसला मे**

**स्वर्गं शोकातिभारान्मम जनकसुते ! किन्नु याता जनन्यः।**

**रक्षोभिश्छन्नमन्यैः खरवधरभसाद् वर्तते किन्नु माया**

**वामो वामाक्षि ! बाहुः स्फुरति तव शिखाबन्धनस्यैकबन्धुः ॥५॥**

**सीता** – अज्ज उत्त ! णं तवो एव्व संति अमङ्गलस्स | (आर्यपुत्र ! ननु तप एव शान्तिरमङ्गलस्य।)

(ततः प्रविशति मारीचः)

मारीचः – (सचिन्तम्)

**बन्धुस्नेहो नु पापस्य जन्मनः प्रभुता नु मे।**

**अपहस्तितसद्वृत्तं यन्मयेदमनुष्ठितम्** ॥ ६ ॥

अथवा किं बहुना।

**रामाभिधानस्य परस्य पुंसः**

**शरव्यमापाद्य शरीरमेतत्।**

**रक्षांसि सर्वाणि यमस्य लोकं**

**प्रविश्य पूर्वं प्रतिपालयामि** ॥ ७ ॥

तत् क्व नु खलु रामाश्रमः। यत्र सपत्नीकं रामं विचित्रमृगरूपेण विलोभयामि। (निष्कान्तः)

(ततः प्रविशति लक्ष्मणः कवचधरः)

लक्ष्मण;– "खरदूषणवधादुद्धृतकण्टकं जनस्थानमासीत्। अतो यथास्वं युष्माभिराश्रमपदानि सनाथीक्रियन्ताम्" इत्यार्यशासनात् विज्ञापितानां मुनिवृषभाणामनुग्रहाल्लब्धं कवचमकालेऽपि धारयामि। अपि च तैर्दत्तमार्याभ्यामलङ्करणीयम्–

**वहामि मायापिशुनं रिपूणां**

**शरीरयोगे सति धार्यमाणम्।**

**आश्चर्यभूतं मणिमंशुमाला–**

**गूढं सरत्नं च कराङ्गुलीयम्** ॥ ८ ॥

यावदार्यमुपसर्पामि। (उपेत्य) जयत्वार्यः।

**रामः** – (विलोक्य) दिष्ट्या लब्धानुग्रहो लक्ष्मणः। लक्ष्मण ! किं दृष्टस्त्वया स वन्द्यो जनः।

**लक्ष्मणः**– दृष्टः प्रत्येकं समूहतश्च। यथोक्तं विज्ञापितश्च।

**रामः** – (आसनादुत्थाय) किमाज्ञापयन्ति परापरविदः।

**लक्ष्मणः** – आर्य ! श्रूयताम्।

**"क्षतजकणिकापातात् सन्ध्याघनच्छवि रक्षसां**

**नृवर ! सलिलं गोदावर्या न नो नियमक्षमम्।**

**विषमिततला देवी विश्वम्भरा च समन्ततो**

**धरणिधरसङ्काशैस्तेषां कलेवरसञ्चायैः ॥ ९ ॥**

ततः कतिपयाहमत्रस्था एव वयं भद्रमुखमाशीर्भिर्वर्धयाम" इति।

**रामः-** अयमनिर्बन्धविषयो राशिः। (उपविशति)

**लक्ष्मणः-** प्रसीदत्वार्यः। (दर्शयत्या- श्चर्यचूडामणिमद्भुताङ्गुलीयकं च)

**रामः** –( दृष्ट्वा सविस्मयम्) आश्चर्यमाश्चर्यम्।

**सीता–** अच्चरं अच्चरं। (आश्चर्यमाचर्यम्।)

**रामः-** किमाह फलं स वन्द्यो जनः।

**लक्ष्मणः-** आये !

**मणिमंशु के सरितमङ्गुलीयकं**

**कलधौतसिद्धमपि धारयन्ति ये।**

**समवाप्य तामवशमाशु मायिनः**

**प्रकृतिं व्रजन्ति सहसा क्षपाचराः ॥ १० ॥**

इति। प्रसीदत्वार्यः न महर्षिशासनमुपेक्षणीयम्।

(पुनरुपनयति)

**रामः—** लक्ष्मण ! कवचस्य किमाह फलमसाधारणसुखार्थी वर्गः।

**लक्ष्मणः-** शरेभ्यो मर्माणि रक्षतीति।

**रामः** – यद्येवम्, आनय प्रतिगृह्णामि सिद्धार्थानां प्रीतिलताकुसुमम्।

(आदाय चूडामणिं सीतायाः शिखापाशे बद्ध्वा आत्मनः कराङ्गुलिमङ्गुलीयेन योजयति)

**सीता –** (ससंभ्रममवलोक्य) अज्जउत्त ! किं एदं अपरं अच्चरिअं। ( आर्यपुत्र ! किमेतदपरमाश्चर्यम् । )

**रामः-** लक्ष्मण ! पश्य पश्य रूपपरिवर्तनं वनान्तरस्य।

**लक्ष्मणः-** आर्य ! पश्यामि।

**कस्य किन्नु कुतस्त्यन्नु केनेदं दीप्यते वनम्।**

**अनभ्रविद्युदापातपरीतैरिव पादपैः ॥ ११ ॥**

(नेपथ्ये मुर्मुराशब्दः क्रियते। सर्वे ससम्भ्रमं विलोकयन्ति)

रामः-

**पथि जलमुचामुत्सर्पिण्या रुचा गतिविभ्रमा-**

**दनिमिषपतेरातन्वानं शरासनमद्भुतम्।**

**रजतचरणं रत्नग्रीवं हिरण्मयविग्रहं**

**तरुणि ! तरुणं वीक्षस्वारान्मृगं मृगलोचने !॥१२ ॥**

**सीता–** अज्जउत्त ! अब्भुददंसणबहुरसो खु वणणिवासो। (आर्यपुत्र ! अद्भुतदर्शनबहुरसः खलु वननिवासः।)

**रामः** – देवि ! किमस्मिन्नस्त्यादरः।

**सीता** – अजउत्त ! जस्स उज्जाणे अअं मिओ पडिवसदि, तस्स कि अपराहि इद्धीहि। (आर्यपुत्र ! यस्योद्यानेऽयं मृगः प्रतिवसति, तस्य किमपराभिः ऋद्धिभिः।)

**रामः–** ममाप्येष एव मनोरथः।

**सीता** – अवि णाम अअं मिओ अज्जउत्तहत्थन्भासं गच्छे। (अपि – नामायं मृगः आर्यपुत्रहस्ताभ्याशं गच्छेत्।)

**रामः–** यदि सजीवो न गृह्येत, ततः सावयवेनास्य चर्मणा वा रत्नातिशयभाजनं भविष्यामः।

**लक्ष्मणः** – आर्य ! अपि नामेयं राक्षसी माया न स्यात्।

**रामः** -अस्मिन्नुभयथापि यत्नः कर्तव्यः।

**परमार्थमृगोऽयं चेत् सिद्ध्यत्यस्या मनोरथः।**

**परीक्ष्यो व्यक्तमस्माभिरत्र मायामृगो यदि ॥१३ ॥**

**लक्ष्मणः**– प्रसीदत्वार्यः। (प्रस्थातुमिच्छति)

**रामः** – तिष्ठ, ननु रक्षणं देव्यास्तवाधिकारः |अपि च,

**अभिगम्य मुनीन् वने वने विनिवृत्तस्य विदूरवर्तिनः।**

**श्रमवारि ललाटमण्डले तव बध्नाति कुमार जालकम् ॥१४॥**

**लक्ष्मणः** – भवतु, ननु यथोक्तानुष्ठानं गुरुजनानुवृत्तिः।

**रामः–** लक्ष्मण ! धनुस्तावदानय, यावदयं न दूरीभवति।

**लक्ष्मणः–** यदाज्ञापयत्यार्यः। (धनुरुपनयति)

**रामः** – (धनुगृहीत्वा निष्क्रान्तः)

**लक्ष्मणः–** हन्त ! न स्वन्तोऽयमारम्भः। अयमयं मृगः,

**मरतकमयीं ग्रीवां साचीकरोति पुनः पुनः**

**तृणमभिनवं जिह्वाग्रेण स्पृशन्निव धावति।**

**भ्रमति परितो वृक्षानुच्चैरधोऽपि च दृश्यते**

**नमयति धनुः कोपादार्ये तिरोभवति स्थले ॥१५ ॥**

हा ! हन्त चक्षुषोर्न गतिस्ततः परम्।

**सीता–** हं णअणगोअरं अदिक्कन्दो अजउत्तो। (हं नयनगोचरमतिक्रान्तः आर्यपुत्रः) [ततः प्रविशति रावणो रथेन शूर्पणखया सूतेन च]

**रावणः–**

**मयि जीवति मानुषादवाप्ता विपदं मे सहजा शुचं जहातु।**

**अपमृद्य पतिं हरामि सीतां तुरगान् सूत ! जवेन चोदय त्वम् ॥१६॥**

**सूतः** – यदाज्ञापयत्यायुष्मान्। ( रथं योदयति )

**शूर्पणखा** – अज्ज ! मा मा संरंभक्कमेण । कदत्थिदमहेन्दबिक कमस्स अउजस्स कंहं सो माणुसो बिसओ भवे। जह उब्वेषण सा जीविअं ण परित्तजति तह सीदं हत्थे करिस्सामो। णं सा तस्स पाणा। (आर्य ! मा मा संरम्भक्रमेण। कदर्थितमहेन्द्रविक्रमस्यार्यस्य कथं स मानुषो विषयो भवेत्। यथोद्वेगेन सा जीवितं न परित्यजति तथा सीतां हस्ते करिष्यामः। ननु सा तस्य प्राणाः।)

**सूतः** – (आत्मगतम्) हताः स्त्रियः पापे कर्मणि पण्डितानतिशेरते।

**रावणः** – (मुहूर्त ध्यात्वा) युक्तमभिहितमनया| सा सीता नाम,

**युधि सरभसं हत्वा रामं बलाम्मयि गृह्णति**

**स्वयमनुचिता भर्तुः शोकादसून् न किमुज्झति।**

**अपि च मनुजं हन्तुं रामं स्पृशन्ति किमायुधं**

**त्रिदशविजयश्लाघापात्रीकृता मम वाहवः ॥ १७ ॥**

सूतः – आयुष्मन् !

**तनुभिः सवेपथुभिरश्रुवर्षिभि–**

**र्नयनैर्मनोभिरनवस्थितैरमी।**

**अतिशायिनोऽपि हरितां स्खलन्ति ते**

**रथवाजिनो नभसि हेतुना विना ॥ १८ ॥**

**रावणः–** सूत ! यातव्या रामपर्णशाला न कैलासः।

**सूतः** – आयुष्मन्नधिकारनिरपराद्धोऽहम्, अतः परमायुष्मानेव प्रमाणम्। एष मुञ्चामि (आत्मगतम्) प्रथमं साध्वाचारं पश्चात् प्रग्रहम्। (चोदयति। सर्वे रथवेगं निरूपयन्ति) [प्रकाशम्] आयुष्मन् ! पश्यतु रथवेगम्–

**तोयोद्गारि कदम्बकं जलमुचामायाममापद्यते**

**घण्टाः स्तम्भितशृङ्खलाश्चपलतामुज्झन्ति मूकैर्मुखैः।**

**कर्णान्ते जपतीव चामरमिदं संस्तम्भितं वायुना**

**तूर्णं त्वामुपसर्पतीव पुरतो यातव्यमिच्छावशात् ॥१९ ॥**

**शूर्पणखा –** सच्चं एव्व सूदो मंतेदि। अज्ज ! आअदम्ह रामतपो वणं (सत्यमेव सूतो मन्त्रयते। आर्य। आगताः स्मो रामतपोवनम्।)

**रावणः**– क च ते व्यसनमूलस्य रामस्य प्राणसमा|

**शूर्पणखा** – णं एसा सा। (नम्वेषा सा। अङ्गुल्या र्दिशति]

**रावणः— (**सीतां विलोक्य सविस्मयम्) इयं सा त्रैलोक्यसुन्दरी सीता नाम | अहो ! चित्रमहो! चित्रम् |।

**इन्द्राणीमहमप्सरोभिरनयं कारागृहे गण्यतां**

**संहारो जयता दिशो दश मया स्त्रीणां कृतः पुष्पके**

**कैलासोद्धरणेऽपि वेपथुमतीमद्राक्षमद्रेः सुतां**

**दृष्टं तासु न रूपमीदृशमहो ! चक्षुश्चिरात् सार्थकम्॥ २०॥**

**(**सङ्घल्पपर्याकुलो भूत्वा) सम्प्रति हि,

**पानाद् रूपरसायनस्य बहुधा सन्तर्पयन्ती मनो**

**जाता नेत्रपरम्परा फलवती धीरेतरेयं मम।**

**अस्याः पल्लवकोमलां तनुमिमामालिङ्गय कृत्स्ना– महं**

**निर्वेक्ष्यामि कदा नु विंशतिममून् वीरव्रणाङ्कान् भुजान्॥ २१ ॥**

**शूर्पणखा –** (आत्मगतम्) फलिदो मे कामो। (फलितो मे कामः।)

**रावणः** – (लक्ष्मणं विलोक्य) अयमपरः कः।

**क्वचिततनुः पृष्टावापी दृढज्यशरासनो**

निभृतमभितस्तिष्ठन् सीतामयं कतमो युवा।

**शुर्पणखा –** (कर्णे) एव्वं बिअ। (एवमिव।)

**रावणः–**

हहह! शमयाञ्चक्रे रामः शरैः किल ताटका–

मसिफलमयं प्राप्तस्त्वां प्रत्यहो ! बलिनो नराः॥२२॥

(नेपथ्ये मर्मराशब्दः क्रियते)

(नेपथ्ये) अहो ! जवविशेषः।

**सीता–** अज्ज वि दाव अज्जउत्तेण अणुगच्छीअदि सो मिओ। (अद्यापि तावदार्यपुत्रेण अनुगम्यते स मृगः।)

**रावणः** - कस्यायं स्वरः।

**शूर्पणखा –** अज्ज ! तस्स रामस्स |(आर्य ! तस्य रामस्य।)

**रावणः–** (परावृत्यावलोक्य) अयं तपस्वी रामः। (इति मोहमुपगतः)

**सूतः** – (आत्मगतम्) सत्यं मारीचवचः। रामो नाम,

**न पुमान् पुण्डरीकाक्षो न च मुग्धेन्दुशेखरः। आविर्भूतमयोध्यायामेकं रक्षोघ्नमौषधम् ॥** २३ ॥

इति।

**रावणः–** (सूतं विलोक्य) सूत ! भीत इव त्वमाकारेण।

**सूतः** – आयुष्मन् ! सत्यं भीत एवाहम्। सम्प्रति वयं मनुष्याः रामो राक्षस इव।

**शूर्पणखा** – अज्ज ! इअं से आइदि आहरणेण जोलदा कह विअ सोहदि। (आर्य ! इयमस्या आकृतिराभरणेन ज्वलता कथमिव शोभते।)

**रावणः** – किमाभरणैरस्याः। पश्य

**यस्य नैसर्गिकी शोभा तन्न संस्कारमर्हति।**

**कः कलां शशिनो मार्ष्टि कौस्तुभः केन रज्यते॥२४॥**

**सूतः** – आयुष्मन् ! किञ्चिद् वक्तुकामोऽस्मि ।

**रावणः** – कथय कस्ते परिहारः ।

सूतः –

**इमां गम्भीरचारित्रां पश्यामि पतिदेवताम्।**

**रावणः** – कथं त्वमवगच्छसि।

**सूतः** –

**यदनेन वने धीरा रमते बन्धुनिःस्पृहा ॥ २५ ॥**

**रावणः**– मन्दात्मन् ! ननु स्त्रीणां विशेषानुपलभ्य सन्तोषिणी बुद्धिः| पश्य–

**मरतकतटे मन्दाकिन्या मदङ्कनिषादिनी**

**कनकनलिनोद्गन्धीन् स्वर्गानिलान् प्रतिगृह्णती। भयपरवशे दत्तापाङ्गा महेन्द्रपरिग्रहे**

**मनुजमवधूयैषा कामं मया सह रंस्यते ॥ २६ ॥**

**सीता – (**निमित्तं सूचयन्ती) कुमार ! आसण्णं विअ असोहणंभावि दक्खिणा दाणि मे अक्खी मन्तेदि। (कुमार! आसन्नमिव अशोभनं भावि दक्षिणमिदानीं मे अक्षि मन्त्रयते।)

**लक्ष्मणः**– आर्ये !

**दायादसाधारणवस्तुवन्ध्यं**

**वनान्तमस्माकमुपाश्रितानाम्।**

**अशोभनं नाम किमव्यवस्था**

**यत्र श्रियस्तत्र ननु द्विषन्तः ॥ २७ ॥**

**सीता**— कुमार ! इसिपदिणीणं वदणादो सुदं मए अस्थि विस्सुदो विंसदिभुओ तुम्हेहिं हृदाणं खरदूसणाणं बादेत्ति । (कुमार ! ऋषिपत्नीनां वदनात् श्रुतं मयास्ति विश्रुतो विंशतिभुजो युवाभ्यां हृतयोः खरदूषणयोर्भ्रातेति।)

**रावणः**– दिष्ट्याहमनया श्रुतपूर्वः।

**लक्ष्मणः** – आर्ये ! अलमस्मादुद्वेगेन।

**रावणः** – किं नु खलु वक्ष्यति।

**लक्ष्मणः** – न बाहवः प्रमाणं पौरुषस्य |पश्य–

**येन सोऽयमपि रावणो जितः तं सहस्रभुजमर्जुनं मुनिः।**

**होमसाधनविधानकर्मणा व्यच्छिनत् परशुनेव शास्त्रिनम् ॥ २८ ॥**

**रावणः** – स्मर मनुष्य ! तवेदं वचनम्।

(नेपथ्ये) हा ! लक्ष्मण ! |

**सीता**– हे अज्ज उत्तस्स बिअ सरो। (हमार्यपुत्रस्येव स्वरः।)

**लक्ष्मणः** – आर्ये ! किमार्तस्वरमार्यः करोति। **सीता**– तुवं किं तक्केसि। (त्वं किं तर्कयसि।)

**लक्ष्मणः**– मायेति।

**रावणः**– अहो ! धृष्टः खल्वेषः।

**सीता-** बालिश ! तदो वि रक्खिदव्वो। ( बालिश ! ततोऽपि रक्षितव्यः।

**लक्ष्मणः-** कथं रक्ष्यो रक्षति । -

(नेपथ्ये ) किं विलम्बसे।

**सीता-** खला ! भादुणा आपण्णस्स अक्कन्दिदं उवेक्खमाणं तुमं कहं भअबदी पुहुवी सहेदि। (खल| भ्रातुरापन्नस्याक्रन्दितमुपेक्षमाणं त्वां कथं भगवती पृथ्वी सहते !)

**लक्ष्यणः**—आर्ये ! किं त्वथा तथैवेति निश्चितम्।

(नेपथ्ये) किं न शृणोषि लक्ष्मण !

सीता- सुणाहि लक्खण ! किं ण तुराअसि । हद्धि, अणन्तरगामिणी इत्थिआणं लच्छी। ण हु अहं । एवं तं एन्च | (शृणु लक्ष्मण | किं न त्वरसे। हा! धिक्, अनन्तरगामिनी स्त्रीणां लक्ष्मीः। न खल्बहम्। एवं तमेव।

**लक्ष्मणः**- (कर्णौ पिधाय) शान्तं पापं शान्तं पापम्|

**अपि मां विजल्पसि गभीरधियां**

**प्रथमा सती यदविचार्य चला।**

**तदुपस्थिता तव विपन्नियतं**

**परिवर्तते प्रकृतिरापदि हि ॥ २९ ॥**

**रावणः-** मूढ ! त्वं न जानीषे सम्पदुपस्थिता वनवासपरिक्लिष्टायाः) (नेपथ्ये ) हा ! इतोऽस्मि।

**सीता-** मुक्ख ! सुणोहि लक्खण ! अहं तब पुरदो मरिस्सं । पच्चाणिरासो दाणि भादुणो सभासं गमिस्ससि। (मूर्ख ! शृणु लक्ष्मण ! अहं तव पुरतो मरिष्ये। पश्चान्निराश इदानीं भ्रातुः सकाशं गमिष्यसि।)

**लक्ष्मणः-**

**अविवेकमनावेक्ष्यमदाक्षिण्यमनूर्जितम्।**

**घिगहं जन्म नारीणां यन्मामेवं प्रभावले ॥ ३० ॥**

**सीता** - तुवं दाव साहु होहि। (त्वं तावत् साधुर्भव।)

**लक्ष्मणः-**

**मायाविधेयवपुषां नववैभानां**

**विश्रामवेश्मनि वने रजनीचराणाम्।**

**आज्ञां गुरोरगणयन्नविवेकलोला-'**

**मेकाकिनीं कथमहं भवतीं त्यजेदम् ॥ ३१ ॥**

**सीता-** समाही रवखदि इत्थिभाअणं ण भाणा । (समाधी रक्षति स्त्रीजनं न बाणाः।)

**लक्ष्मणः-** देवा ज्ञास्यन्ति देवाः साक्षिणः।

**सीता-** होदव्वम्। (भवितव्यम्।)

**लक्ष्मणः-** (प्रणम्य) नमस्तुभ्यम्। (निष्क्रान्तः)

**शूर्पणखा-** अज्ज ! पेक्ख पेक्ख। (आर्य। पश्य पश्य।)

**सीता** - अवि णाम अज्जउत्तेण लक्खणो सङ्गमिस्सदि। (अपि नामार्यपुत्रेण लक्ष्मणः सङ्गंस्यते।)

(नेपथ्ये) सीते! त्वमपि मामुपेक्षसे।

**सीता-** हं, अघण्णा खु अहं अज्जवन्तं सरेण अण्णेसामि। (प्रतिष्ठते) (हम्, अधन्या खल्वहं आर्यपुत्रं स्वरेण अन्वेषयामि।)

**शूर्पणखा -** अज्ज ! पेक्ख पेक्ख अवणीदअंत रअणं सअं एव्व गच्छंतं। (आर्य | पश्य पश्य अपनीतयन्तृकं रत्नं स्वयमेव गच्छत्।)

**रावणः** –नायमुपेक्षाकालः। रामरूपेणैनामर्धपथे प्रतिबध्नामि।

**शूर्पणखा** - सुट्टु अज्जो भणादि। अहं वि दाव रामं सीदारूवेण णिवुत्तिपहे विलंबइस्सम्। (सुष्टु आर्यो भणति। अहमपि तावद्रामं सीतारूपेण निवृत्तिपथे विलम्बयिष्ये।)

**रावणः-** बाढम् ।

**शूर्पणखा-** इदो परं किं मए कत्तव्वं। (इतः परं किं मया कर्तव्यम्।)

[ निष्कान्ता ]

**सूतः** - आयुष्मन् ! किं मयेदानीं कर्तव्यम्।

**रावणः** - (कर्णे) एवमिव।

**सूतः** - यदाज्ञापयत्यायुष्मान् । (आत्मगतम्) अहो! बलवान् भर्तृ पिण्डः। इदमपि मया कर्तव्यमासीत्।

(रावणो रथादवतीर्य रामरूपेण सीतायाः पुरतस्तिष्ठति)

**सीता-** हं, अज्जउत्तो। जेदु अब्जउत्तो। (हम्, आर्यपुत्रः |जयत्वार्यपुत्रः।)

**रावणः** - देवि ! इत इतः।

**मायाबलेन बलिनां क्षणदाचराणां**

**जिह्वातले करतलोदरि ! वर्तमानाम् ।**

**त्वां लक्ष्मणः कथमुपेक्षितवान् कथं त्व-**

**मित्थं गतासि मृदुना चरणद्वयेन ॥ ३२ ॥**

**सीता-** हं, अधण्णाए मए उपालद्धो कुमारो किं ति मन्तेदि। (हम्, अधन्यथा मयोपालब्धः कुमारः किमिति मन्त्रयते।)

**रावणः** - नूनं विप्रलब्धासि मायामृगस्वरेण।

**सीता** - अजउत्त ! कहिं सो माआमिओ। (आर्यपुत्र ! कुत्र स मायामृगः।)

**रावणः** - पथि विप्रतिपन्नः स्वयमेवागमिष्यति।

(नेपथ्ये) अयमयमागच्छामि।

**सीता** — हं, अज्जउत्तस्स विअ सरो। (हम्, आर्यपुत्रस्येव स्वरः।)

**रावणः**- मन्ये पूर्वमपि स्वरसादृश्येन वञ्चितासि।

**सीता-** णं तेण कुमारो वि मए उपालद्धो। (ननु तेन कुमारोऽपि मयोपालब्धः।)

(रावणः सूतं वीक्षते सूतोऽपि लक्ष्मणरूपेण रथमसन्दिग्धं गृहीत्वा रावणमुपसर्पति)

**सूतः** - प्रसीदत्वार्यः। रथमारोहत्वार्यः सपत्नीकः। **रावणः** - लक्ष्मण ! किमिदम्।

**सूतः** - आर्य ! समाधिचक्षुषा भरतस्य परचक्रभयमुपनतं दृष्ट्वा तूर्णं युष्माभिरभिगन्तव्यमिति तपसा रथं निर्माय मह्यं दत्त्वा वनान्तरेष्वन्त- र्हितस्तपस्विजनः।

**सीता** - (आत्मगतम्) जुज्जइ। णं पुव्वं वि से हत्थे दिण्णं परं अच्चरिअचूडामणी अब्भुदङ्गुलीअअं अ। (युज्यते। ननु पूर्वमप्यस्य हस्ते दत्ते आश्चर्यचूडामणिः अद्भुताङ्गुलीयकं च।)

**रावणः**- देवि ! कस्तवाभिप्रायः।

**सीता-** णं मए वि इच्छिदव्वो भरदस्स वेसणणासो बन्दणं गुरु अणस्स अ। (ननु मयाप्येष्टव्यो भरतस्य व्यसननाशो वन्दनं गुरुजनस्य च)

**रावणः** - लक्ष्मण ! प्रथमं देवीमारोहय रथम्।

**सूतः** - यदाज्ञापयत्यार्यः। (रथमारोहयति)

**सीता-** दिट्ठिआ रक्खसवंचणादो मोइदा भविअ गच्छामो | (दिष्ट्या राक्षसवञ्चनान्मोचिता भूत्वा गच्छामः।) [ सहर्षमारोहति ]

**रावणः** — प्रसन्ना देवी, लक्ष्मण ! तूर्णं चोदयाश्वान्।

**सूतः** - यदाज्ञापयत्यार्यः।

**रावणः** - (आत्मगतम्) राम इति।

**मयि बुद्ध्याप्यसन्दिग्धामिमां न स्प्रष्टुमुत्सहे।**

**अहो ! तत्पूर्वदृष्टानां कष्टः स्त्रीणां समागमः॥३३॥**

(ततः प्रविशति रामः सीतारूपधारिण्या शूर्पणखया सह)

**रामः**– देवि ! स खलु जाल्मो राक्षसो ममेषुपत्तनानन्तरमेव मे रूपं गृहीत्वा पतितः। ततस्तमुपेदय तव वृत्तान्त परिज्ञानार्थं तूर्ण निवृत्तोऽस्मि।

**शूर्पणखा** – (आत्मगतम्) अघं दे देवित्तणम्। (अघं ते देवी त्वम्।)

**सीता** – (आकाशे रथस्था) चिराअ खु णो पिअसहीं वणस्थली विस खु डिजअ गन्तव्वं। (चिराय खलु नः प्रियसखीं वनस्थलीं विसृज्य गन्तव्यम्।)

**रावणः**– देवि ! कृतमनेन। ननु द्रक्ष्यसि नन्दनातिशायिनीं नगरो द्यानश्रियमेव।

**सीता** – (अधो विलोक्य) तह । हं, अज्जउत्तो। (तथा । हम्, श्चार्यपुत्रः।)

**रामः**– आकाशे सीताया इव स्वरः । ( इत्युदीक्षते)

**शूर्पणखा** – अज्जउत्त ! पेक्ख पेक्ख तव पडिकिदिं इस्थिअं अ ममाइदिं आदरिसे विअ पेक्खामि। (आर्यपुत्र ! पश्य पश्य तव प्रतिकृतिं स्त्रियं च ममाकृतिमादर्श इव पश्यामि।)

**रामः**– सत्यं सीता परपुरुषगोचरे न तिष्ठति। ध्रुवमियं वञ्चनासीता मायारामपार्श्वे। यथा सोऽहं न भवामि तथा सीतापि न भवति ।

**सीता**– हं, अघण्णा अहं अजउत्तं परमत्थं ण जाणामि। (हम्, अधन्याहम् आर्यपुत्रं परमार्थं न जानामि।)

**रावणः**– मुग्धे ! मुनीनामतिसन्धानार्थं मम रूपेण राक्षसाः सञ्चरन्ति।

**सीता** – सच्चं एव्व एदं। कुदो अज्जउत्तस्स इत्थिआसम्बन्धो। जह सा अहं ण होमि तह अज्जउत्तो वि सोण होइ । (सत्यमेवैतत्।) कुत आर्यपुत्रस्य स्त्रीसम्बन्धः। यथा साहं न भवामि तथार्यपुत्रोऽपि स न भवति।

**रावणः**– प्रसन्ना देवी, लक्ष्मण ! तूर्णं चोदयाश्वान् |

**सूतः** – यदाज्ञापयत्यार्यः।

(निष्क्रान्तो रावणः सीतां गृहीत्वा सूतेन च)

**शूर्पणखा** – (विषादं रूपयति । स्वगतम्) को णु खु मे गमणस्स उपाओ । ( को नु खलु मे गमनस्योपायः।)

**रामः**– देवि !

**किं निःश्वासैर्ग्लपयसि जपापाटलं दन्तवासो**

**नेत्राभ्यां कि सृजसि कुचयोरन्नबिन्दूनजस्रम्।**

**विक्षिप्ताङ्गी विलपसि कथं तिष्ठसि ध्यानमूका**

**धीरे ! धैर्यं तव सह मया निर्गतं निर्गतेन ॥३४ ॥**

**शूर्पणखा** - अजउत्त ! तव वेसणस्स अहं बीजं संवृत्तत्ति पेक्खामि (आर्यपुत्र | तव व्यसनस्याहं बीजं संतेति पश्यामि।)

रामः — मा मैवम्, कं न वशीकरोति स मायामृगः। किं नु खलु नाद्यापि निवृत्तो लक्ष्मणः।

**शूर्पणखा–** अहं वि तं एव्व तक्केमि। (अहमपि तदेव तर्कयामि।)

**रामः**– तस्य रूपपरिवर्तनेन कुमारं विप्रलब्धमिव पश्यामि। देवि! किं शक्नोषि मामनुगन्तुं यावदहं लक्ष्मणमन्विच्छामि।

**शूर्पणखा**– कहं वि अहं अणुगमिस्सं। भीदं ह्मि रक्खसवंचणादो। (कथमप्यहमनुगमिष्यामि। भीतास्मि राक्षसवञ्चनात्।)

**रामः** - देवि ! इत इतः। (उभौ परिकामतः)

(नेपथ्ये)

**सकामा भव कैकयि ! कौसल्ये ! न गतिस्तव |**

**यनिशाचरबाणेन सुतस्ते मर्मणि क्षतः ॥ ३५ ॥**

**रामः**– हन्त ! तदेव संवृत्तम्।

(पुनर्नेपथ्ये )

**सत्यवादिनि ! धर्मिष्ठे ! पुत्रि सागरवाससः।**

**अमङ्गलानां नारीणां कथं त्वं देवि |गण्यसे।।३६।।**

**रामः**– यावदयमात्मपरित्यागं न करोति तावदेनमुपसर्पामि। (ततः प्रविशति बाणोद्धरणव्यापृतो लक्ष्मणः रामरूपप्रच्छन्नो मारीचश्च)

**लक्ष्मणः–** (सकरुणम्) आर्य ! गुरुविधेय ! त्वदायत्तं मे जीवितं हरसि।

**रामः**– (स्मितं कृत्वा) लक्ष्मण !

**मुञ्च मायागतं दुःखं पश्य मां तव पूर्वजम्।** लक्ष्मणः– (विलोक्य सक्रोधम्) आ राक्षस !

**पूर्वजं चापि मे हत्वा मामप्यभिगतोऽसि किम्॥३७॥**

तिष्ठ तिष्ठ क यास्यसि (खड्गमुत्कोशयति)

**रामः–** (उपेत्य) लक्ष्मण ! पश्य पश्य |(इत्यमुलीचं दर्शयति)

**लक्ष्मणः–** (विलोक्य सलज्जमात्मगतम्) नेदं राक्षसा जानन्ति |

(अधोमुखस्तिष्ठति)

**रामः-** लक्ष्मण ! पश्य फल मङ्गुलीयकस्य। (मारीचं पादेनोद्धृत्य विक्षिपति मारीचः स्वरूपमेव गृह्णाति)

**लक्ष्मणः** - आर्य ! पश्यामि ।

**प्रकृतिं प्रपद्य सहजां तवोद्धत**

**श्चरणेन तामरसपाटलत्विषा।**

**नभसो जवेन सह संभृतैर्घनैः**

**पतति क्षितौ पतनचूर्णिताचलः ॥ ३८ ॥**

**शूर्पणखा – (**सशोकमात्मगतम्) हं, मणुस्सा खु बलवन्तो । हा! हदो गुरु मारीओ (हम्, मनुष्याः खलु बलवन्तः । हा! इतो गुरुर्मारीचः) [ रोदिति ]

**लक्ष्मणः–** अस्य दर्शनादेव नः प्रत्ययकारणमासीद् अङ्गुलीयकं राक्षससंशये रूपव्यक्तिहेतुरिति।

**शूर्पणखा –** को णु खु मे गमणस्स उपाओ। (को नु खलु मे गमनस्योपायः।) (विषादं रूपयति)

**रामः-** देवि ! किमद्यापि शोकं न मुञ्चसि ।

**(**इति अश्रुसंमार्जनं करोति। शूर्पणखायाः स्वरूपमेवासीत्)

**शूर्पणखा** - हं, अवसिदं म्हि। (हम्, अवसितास्मि।)

**रामः**- लक्ष्मण ! किमिदम्।

**लक्ष्मणः**- आर्य ! इदमिदमस्याः,

**नीलोत्पलाकृतिमपास्य रथाङ्गरूप-**

**मापद्यते नयनयुग्ममियं तनुश्च।**

**आलूननासिकतया विवृतान्तमूलै-**

**र्दन्तैः सरिद्विमथितेव सितैर्मृणालैः ॥ ३९ ॥**

आस्त्वया कृतमिदं व्यसनम् । (खड्गमुत्कोशयति)

**शूर्पणखा -** (सभयम्) अज्ज ! सरणं सरणं। (आर्य| शरणं शरणम्।) (रामस्य पादयोः पतति)

**रामः**- (लक्ष्मणं वारयित्वा) शूर्पणखे ! कथय परमार्थम्। अभयं ते दत्तम्।

**शुर्पणखा –** (आकारसंवरणं कृत्वा कर्णे) अज्ज ! एव्वं विअ। (आर्य ! एवमिव।)

**रामः**- शूर्पणखे ! तव निष्क्रयार्थं भ्रातुरन्तिकं मम सन्देशमुपनय|

**शूर्पणखा-** आणवेदु दाणिं साणुक्कोसो भट्टा। (आज्ञापयत्विदानी सानुक्रोशो भट्टा।)

**रामः** - शृणु,

**नयनविषये मायासीतां विदर्श्य विलोभनं**

**मम धृतवता मिथ्या रूपं विधाय च लक्ष्मणम् ।**

**त्वरितगतिना सद्यः सीता त्वया न तु वञ्चिता**

**नियतविधवाचारा दाराश्चिरं तव वञ्चिताः ॥ ४० ॥**

इति ।

**लक्ष्मणः–** शूर्पणखे ! इदमपि मद्वचो ब्रूहि।

**अपि बन्धुषु नार्थिता वरं किमुताराातिषु तां दधाम्यहम्।**

**युधि रावण ! मे सबान्धवो मुनये देहि मुहूर्तदर्शनम् ॥ ४१ ॥**

**शूर्पणखा —** भादुणो मे कलहो उच्छवो। (भ्रातुर्मे कलहः उत्सवः।)

**लक्ष्मणः-** आः अपेहि।

**शूर्पणखा** - एसा खं उज्वदिदं ह्मि। (एषा खमुत्पतितास्मि।)

(निष्क्रान्ता)

**रामः-** लक्ष्मण ! वञ्चिता वयम् ।

**कनकहरिणः क्वेयं भूमिः क्व चेत्यविचारयन्**

**अपि निशितधी रामो रामावचः प्रतिपन्नवान् ।**

**इति कृतधियामासं हास्यः कृतं कृतचिन्तया**

**प्रभवति कुतोऽनर्थः प्रज्ञा न चेदपथोन्मुखी॥ ४२ ॥**

**लक्ष्मणः-** आर्य ! अविलम्बितमिदानीं यत्नः कर्तव्यः।

**रामः-** बाढम् |गच्छामतः ।

**लक्ष्मणः** – यदाज्ञापयत्यार्यः। इत इतः।

(निष्क्रान्ती)

**इति शक्तिभद्रविरचिते चूडामणिनाटके तृतीयोऽङ्कः ।**

## व्याख्यानम्

रामस्य दास्यपदवीमधिगत्य नित्यं,

योऽलङ्करोति भुवनं रघुवंशनामा।

यत्पादपद्मकलिका भ्रमरीकरोति,

चेतः स मे विजयते प्रथमो गुरूणाम् ॥

अथ कवी रसदृष्टया नीरसं शास्त्रदृष्ट्या चानुचितं खरदूषणादिवधवस्तुजातं विष्कम्भकेन सूचयति। मुनिकुमारवृद्धतापसरूपमध्यमपात्राभ्यां प्रयोजितोऽयं विष्कम्भकः शुद्ध इति ज्ञेयम्।

अथाधीतसकलशास्त्रः कश्चिन्मुनिकुमारो विषयनिर्लिप्तो भूत्वा तीर्थानि सेवमानो मध्येमार्ग रामकृत खरदूषणादिवधं विज्ञाय भ्रमणपरिश्रान्तोऽप्यानन्दितो भूत्वा सूर्यकुलाशीर्वादप्रदानपूर्वकं रामं प्रशंसति - तिष्ठतु चिरायेति॥ दिवसकरान्वयः = सूर्यकुलम्, चिराय = बहुकालं यावत्, तिष्ठतु = मिरुषद्रवमवतिष्ठताम्, यम् = दिवसकरान्वयम्, विभूषयता = अलङ्कुर्वता, रामेण = दशरथापत्येन पुरुषोत्तमेन, खरदूषणकर्णधाराम् = खरदूषणौ कर्णधारौ = नायकौ पक्षे-नायिको यस्याः ताम्, यातुधानकेतुमतीम् = राक्षससेनाम् (सेनायाः केतुना निस्ययोगात्) पक्षे-पोतम्, पोतस्यापि कूपकेन नित्ययोगात् केतुमतीशब्दाभिधेयत्वम्। सेनाम्प्रति खरदूषण-योनियन्त्रित्वात् कर्णधारत्वारोपः। जनस्थानतः = जनस्थानाख्यारण्यविशेषात्, यमस्थानवर्त्तिनीम् = मृत्युलोकनिवासिनीम्, कृतवता = विदधता, मद्विधानाम् अपि = अस्मत्सदृशानामपि (कौमारे वयसि स्थितानाम्) वनभूमयः = काननप्रदेशाः, स्वैरसञ्चारक्षमाः = स्वेच्छया विचरणयोग्याः, कृताः = सम्पादिताः। रामस्य प्रभावेणैव वयमप्युच्छिन्नराक्षसकुलेऽस्मिन् विपिने यथेच्छं भ्रमणशीलाः सञ्जाता इति भावः। साम्प्रतम् = अधुना, नूनम् = अवश्यम्, रामाश्रयात् = लोकोत्तरगुण- सम्पन्नस्य रामस्याश्रयणात्, राक्षसजीवितरसज्ञा = राक्षसानाम् = निशाचराणाम् जीवितरसम् = जीवनानन्दस्वादनम् अनुभवन्ती, मृत्युजिह्वा = अन्तकरसना, लङ्कामपि = रावणस्य राजधानीभूतां स्वर्णपुरीमपि, लेढि = स्वादविषयं करिष्यति। विगमयामि = दूरीकरोमि। अत्र = नदीतीरे, आसन्नेन = समीपस्थेन। अत्रत्यो ग्रन्थप्रसङ्गः सर्वराक्षसवधोत्साहभूतस्य बीजस्य खरदूषणवधेनावान्तरप्रयोजनेन विच्छेदे प्रसक्ते तस्याऽविच्छेदाय नाटककृता विन्दुरूप- द्वितीयार्थप्रकृतत्वेनोपन्यस्तः।

आश्रमं सम्भावयन्नाह – दर्भैरिति।। सरितः सैकतमण्डलानि मन्त्रास्तृतैः दर्भैः श्यामानि, शाखिनि (स्थिता) शुकी वैखानसैः (सह) अभ्यासात् वाक्यानि कलमाह, मुनिसुतैः नीवाराञ्जलिभिः भृताः बालाः मृगाः मातुः ऊघोऽपास्य जटाचीराजिनप्रत्ययात् माम्प्रति आयान्ति इत्यन्वयः। सरितः = नद्याः, सैकतमण्डलानि = बालुकामयप्रदेशसमूहाः, मन्त्रास्तृतैः = यज्ञसम्पादनाय मन्त्रपूर्वकं विस्तृतैः, दर्भैः = कुशैः, श्यामानि = कृष्णानि (प्रतीयन्ते) शाखिनि = पादपे (स्थिता) शुकी = कीराङ्गना, वैखानसैः = वानप्रस्थाश्रमे विद्यमानैः मुनिमिः, (सह) अभ्यासात् = असकृषदुच्चारणात् पौनःपुन्येनावर्त्तनादिति यावत्, वाक्यानि = पदसमूहान्, कलमाह = उच्चारयति, मुनिसुतैः = ऋषिकुमारैः, नीवाराञ्जलिभिः = नीवारसंज्ञकतपोवनधान्यविशेषैः पूरित- करपुटैः, भृताः = उपलालिताः, बालाः = वयसः अल्पत्वेन स्वयं तृणादिभक्षणायोग्याः, मृगाः = हरिणादयः, मातुः = जनन्याः, ऊधः = स्तनभारम्, अपास्य = उत्सृज्य, जटाचीराजिनप्रत्ययात् = सटाचीवरमृगचर्मभिः (कृतात्) विश्वासात्, माम्प्रति = मुनिकुमारं मामुद्दिश्य, आयान्ति = आगच्छन्ति। मुनिकुमारकृतोपलालनातिशयसमुत्पन्नस्नेह विशेषेण मातुः स्रवत्क्षीरमपि स्तनमुत्सृज्य पूर्वविश्वासकारणात् अयमपि मुनिकुमार इति मत्वा माम्प्रत्यागच्छन्ति वन्या हरिणादय इति भावः। शार्दूलविक्रीडितं वृत्तम्। स्वभावोक्त्यलङ्कारः ॥ १ ॥

स्वाध्यायम् = वेदाध्ययनम्। होमधूमम् = यज्ञाग्निप्रदत्तहोमद्रव्यसमुत्पन्न धूमम्। अचिरोत्सन्नम् = अचिरेण = इदानीमेव उत्सन्नम् = विनष्टम्।

आश्रमस्योत्सन्नत्वमेव समर्थयते - विसृजतोति ॥ (इयम्) आस्तीर्णदर्भा वेदिः हुतगन्धं विसृजति, वलिभूमौ षट्पदाः सौहृदय्यं न जहति, तरुशाखाचक्रवाले विषकम् इदम् वल्कलम् अपि पल्लवानाम् पिशङ्गम् द्विगुणयति इत्यन्वयः। इयं पुरोदृश्यमाना, आस्तीर्णदर्भा = आकीर्णकुशा, वेदिः = यज्ञार्थं परिष्कृता भूमिः, वेदिकेति यावत्, हुतगन्धम् = हवनद्रव्योत्पन्नसुगन्धिम्, विसृजति = परित्यजति (प्रसङ्गात् बिस्तारयति) षट्पदाः = भ्रमराः, बलिभूमौ यज्ञशालायाम्, सौहृदय्यम् = सौहार्दम् हृदयसौख्यमिति यावत्, न जहति = न त्यजन्ति, वल्यर्थचन्दनपुष्पपरिमलादिसम्भूतानन्दमनुभवन्तीत्यर्थः, तरुशाखाचक्रवाले = पादपशाखासमूहे, विषक्तम् = अवस्थितम्, संलग्नमित्यर्थः, इदम् = परिदृश्यमानम्, वल्कलमपि = मुनिचीवरभूतमहीरुहत्वगपि, पल्लवानाम् = किसलयानाम्, पिशङ्गम् = पिङ्गलं कपिलवर्णमित्यर्थः, द्विगुणयति = द्विगुणी। करोति। वल्कलगतस्य कपिलवर्णस्य किसलयेषु संक्रमणात् द्विगुणत्वमुक्तम्। मालिनीवृत्तम् ॥ २ ॥

स्वागतम् = शोभनम् आगतम् = आगमनम् स्वागतम्| अतिथये = न विद्यते तिथिः यस्य, सः, यस्यागमनस्य न काचिन्निश्चिता तिथिर्भवति, अनिश्चित रूपेण यस्मिन् कस्मिन् दिने व आगच्छति सोऽतिथिः = लोकेऽभ्यागत इत्युच्यते।

न शून्यमिति ॥ अस्ति कश्चिदिति शेषः।

यात्रासम्भारण्यापृतः = यात्रार्थ दण्डासनकमण्डल्वादिसामग्रीसमुद्वहनव्यस्तः, वृद्धतापसः रङ्गशालायां प्रवेशं नाटयति।

तपोधन ! = व्रतमेव धनं यस्य तत्सम्बोधने। भवन्मानावशेषम् = भवन्मात्रम् = भवानेव अवशेषः = अवशिष्टो यस्मिन्। बह्वाभोगम् = बहुः = अधिकः, आभोगः = परिपूर्णता यस्मिन्, एतादृशम् आश्रमम् = तपोवनम्, अहमवलोकयामि।

पौलस्त्यबन्धोः = पुलस्तस्य अपत्यं पुमान् पौलस्त्यः = रावणप्रभृतिराक्षसवर्गः स बन्धुः = स्वजनः यस्य तस्य मारीचस्य = एतन्नामकराक्षसस्य, अयमाश्र- मोऽस्तीति शेषः।

रामशरोच्छिष्टः = रामस्य = कौशिकयज्ञप्रसङ्गे दशरथसूनोः शरैः,= वाणैः उच्छिष्टः = उच्छिष्टवदुपेचितः दूरं प्रक्षिप्त इत्यर्थः।

शूर्पणखाविरूपकरणम् = शूर्पणखावैरुप्यकर्मेति वृत्तम्। अपूर्वः = अज्ञातस्वान्नूतनः। शूर्पणखावृत्तान्तो मया लक्ष्मणमुखादेव श्रुतः, इदानीम् मारीचेतिवृत्तमेव त्वया वक्तव्यमस्तीति भावः।

मारीचमुखात् रामगौरवपरं वाक्यं श्रुत्वा क्रुद्धः सन् रावणः कोशात् चन्द्रहासमाकर्षति। रचयन्निति ॥ (रावणः) प्रहस्य भ्रुकुटीः रचयन् कोशात् उन्मयूखरेखम् असिम् उदहासीत्| यस्य धारा ऐरावतदन्तिदन्तकोशैः समम् विषमीभवति स्म इत्यन्वयः (रावणः) प्रहस्य = अट्टहासं कृत्वा, भ्रुकुटीः रचयन् = कुटिलाः दृष्टीः विदधत्, कोशात् = खड्गविधानात्, उन्मयूखरेखम् = उद्गता मयूखरेखा = किरणपंक्तिः यस्मात् तम् = उद्गतरश्मिजालम्, असिम् = चन्द्रहासाख्यं, खड्गम् उदहासीत् = उद्धृतवान्, रावणः स्वकीयादेशपालने शिथिलं मारीचं चन्द्रहासेन हन्तुमुद्यतोऽभूदित्यर्थः, यस्य = चन्द्रहासस्य, धारा, ऐरावत दन्तिदन्त कोशैः = ऐरावतनामकस्येन्द्रगजस्य दन्तकोशैः = चतुर्भिरपि दन्तसमूहैः, विषमीभवति स्म = विप्रतिपद्यते स्म, निम्नोन्नता भवति स्मेत्यर्थः। कालभारिणी वृत्तम् ॥ ३ ॥

रावणविधेयतां प्रतिपन्नः = स्वभागिनेयस्य रावणस्य कार्य कर्त्तमुद्यतोऽभूत्। अभिजनानुरूपम् = दुष्टजनमनोऽनुकूलम् अनुष्ठानम् अथवा अभिजनः = कुलम् तदनुकूलम्, राक्षसकुलानुरूपमेतदनुष्ठानमित्यर्थः। तदेव समर्थयति - असतामिति ॥ असताम् सहजो भावः केनापि हेतुना छन्नः बीजानाम् संस्कार इव फलेन सह जायते इत्यन्वयः। असताम् = जास्या दुर्जनानाम्, सहजः = सहजातः, भावः = परपीडावञ्चनाद्यभिरुचिः, केनापि हेतुना = भयादिकारणेन, छन्नः = तिरोहितः, बीजानाम् = धान्यबीजानाम्, संस्कार इव = दृष्टरूपत्वात् स्त्रभावत एव अनभिव्यक्तः इव, फलेन = वञ्चनमरणादिरूपपरमफलेन, पक्षे व्रीह्याादिना सह जायते = अभिव्यज्यते। यथा धान्यबीजानां संस्कारः स्वभावत एव अनभिव्यक्तः सन्नङ्कुरादिकार्या कुर्वाणो व्रीह्यादिफलेन सहावगम्यते तथैव दुष्टानां नैसर्गिकः परहिंसावञ्चनादिको भावस्तिरोहितः सन् प्रवञ्चनमरणादिना सहाभिष्यज्यते इति भावः। अनुष्टुप् वृत्तम्। उपमाहारः ॥ ३ ॥

साधयतु = शीघ्रं गच्छतु।

रामः सीतया सह रङ्गशाळां प्रविश्य अनिष्टसूचकं वामबाहुस्कुरणादिकभिनयन्नाह- आकान्ता इति ॥ जनकसुते ! बालः भरतः इति मे उत्तराः कोशलाः परैः आक्रान्ताः किन्तु, शोकातिभारात् मम जनन्यः स्वर्ग याताः किन्नु, अन्यैः रक्षोभिः खरवधरभसात, छन्नम्, मया वर्त्तते किन्नु, वामाक्षि ! तव शिखाबन्वनस्यैकहेतुः वामो बाहुः स्फुरति इत्यन्वयः। जनकसुते ! = जनकतनये !, बालः भरतः इति = अशक्तः कैकेयीसुत इति तं परिभूय, मे = मम, उत्तराः कोशलाः = उत्तरादिग्वर्त्तिकोशलाख्यप्रदेशाः, परैः = शत्रुभिः, आक्रान्ताः किन्नु = आक्रमण विषयीभूताः किन्नु, शोकातिभारात् = भर्तृवियोगात्, अस्मद्विप्रवासजन्य शोकाधिषयाच्च, मम जनन्यः = मम कौशल्यादयो मातरः, स्वर्गम् = दिवम्, याताः = गताः, किन्नु, अन्यैः रक्षोभिः = साक्षादस्मान् परिभवितुमसमर्थैः राक्षसैः, खरवधरभसात् = खरदूषणादिहननजन्यक्रोधात् छन्नम् = परोक्षीभूय क्रियमाणा इति शेषः, माया = छलना किन्नु, वामाक्षि ! तव = भवत्याः, शिखाबन्धनस्यैकबन्धुः = शिखाबन्धनस्य = केशकलापस्य एकबन्धुः = प्रधानभूतः सहायः वामो बाहुः = दक्षिणेतरो भुजः, स्फुरति = स्पन्दते। मम वामभुजस्य स्फुरणं पूर्वोत्तमनिष्टजातं सूचयतीत्यर्थः। स्रग्धरा वृत्तम्। सन्देहालङ्कारः ॥ ५ ॥

अथ मारीचोऽनिच्छन्नपि विधिबलाद् रावणनियोगं स्वीकृत्य रामं वञ्चयितुमुद्यतः सानुतापं वदति - बन्धुस्नेह इति ॥ मया यद् अपहस्तितसद्वृत्तम् इदम् अनुष्ठितम् तत् मे बन्धुस्नेहो नु, मे पापस्य जन्मनः प्रभुता नु इत्यन्वयः मया = मारीचेन, यद्, अपहस्तितसद्वृत्तम् = अपहस्तितम् = हस्तात्परित्यक्तम् सद्वृत्तम् = शिष्टाचारः यस्मिन् तत्, इदम् = रामवञ्चनात्मकं कर्म, अनुष्ठितम् = अनुष्ठीयते, वर्त्तमाने निष्ठाप्रत्ययः, तत्, बन्धुस्नेहः = स्वजनानुरागः, नु = किन्नु, (अथवा) मे = मम, पापस्य = निन्दितस्य, जन्मनः = उत्पत्तेः, कुलस्य वा, प्रभुता = शक्तिः, नु = किन्नु। पूर्वं मया किमपि तपोऽनुष्ठानात्मकं सद्वृत्तमङ्गीकृतं तदिदानीं बन्धुस्नेहेन पापजातिसम्बन्धेन वा रामवञ्चनात्मकेन निन्दितकर्मणा परित्यक्तमिति वितर्कस्याशयः। अनुष्टुब् वृत्तम्। सन्देहालङ्कारः ॥ ६ ॥

प्रस्तुतस्य कर्मणः श्रेयस्करत्वमवगम्य तस्य श्रेयो- हेतुत्वं प्रतिपादयति - रामाभि धानस्येति (अहम्) एतत् शरीरम् रामाभिधानस्य परस्य पुंसः शरव्यम् आपाद्य पूर्वम् यमस्य लोकम् प्रविश्य सर्वाणि रक्षांसि प्रतिपालयामि इत्यन्वयः। अहम् = मारीचः, एतत् = साक्षाद् विद्यमानम्, शरीरम् = स्वकायम्, रामाभिधानस्य = राम इति नामधेयस्य, परस्य पुंसः = पुरुषोत्तमस्य श्रीनारायणस्य शरव्यम्= लक्ष्यम, आपादय् = प्रतिपाद्य, पूर्वम् = प्रथमम्, यमस्य = धर्मराजस्य, लोकम्, प्रविश्य = प्रवेशं कृत्वा, सर्वाणि = सकलानि, रक्षांसि = राक्षसान्,

प्रतिपालयामि = प्रतीक्षां करोमि। मम नाशानन्तरं सर्वे एव राक्षसा रामशरासनशरव्या भवब्यन्तीत्यर्थः। उपजातिवृत्तम् ॥ ७ ॥

न केवलं राममेवापि तु सीतामपि स्वकपटवेषेण विलोभयाभ्यत आह्- सपत्नीकमिति ॥

उद्‌धृतकण्टकम् = उद्‌धृतम् = उत्पाटितम्, कण्टकम् = कण्टकवद् विद्यमानम् राक्षसकुलम् यस्मात् एतादृशं जनस्थानम् = एतन्नामधेयं वनम्। अकालेऽपि = युद्धकाले एव कवचधारणस्यौचित्यमिति मन्यमान आह् अकाले इति।

आर्याभ्याम् = आर्यायै आर्याय च दत्तम् अलङ्करणीयम् ताभ्याम्।

वहामीति ॥ धार्यमाणम् रिपूणाम् शरीरयोगे सति मायापिशुनम् अंशुमालागूढम् सरत्नम् आश्चर्यभूतम् मणिम् कराङ्गुलीयम् च वहामीत्यन्वयः। धार्यमाणमू अलङ्क्रियमाणम्, रिपूणाम् = शत्रूणाम् शरीरयोगे सति = गात्रसंस्पर्शे सति (तेषाम्) मायापिशुनम् = कपटसूचकम् (मायेयमिति ज्ञानस्य कारणभूतम्) अंशुमालागूढम् = अंशुमालाभिः = रश्मिसमूहैः, गूढम् = छन्नम्, सरत्नम् = रत्नसहितम्, आश्चर्यभूतम् = विस्मयोत्पादनक्षमम्, मणिम् = चूडामणिम्, कराङ्गुलीयम् च = अङ्गुरीयकम् च, वहामि = धारयामि। मुनिश्रेष्ठैरार्याभ्यां प्रदत्तं राक्षसमायानि- वर्तकमाश्चर्यभूतं चूडामण्यङ्गुलीयाख्यं रत्नखचितं भूषणद्वयमुद्वहामीति भावः। उपजातिवृत्तम् । दीपकाऽलङ्कारः ॥ ८ ॥

परापरविद इति || परापरविदः = परम् = उत्कृष्टम् परं ब्रह्म, अपरम् = कार्यब्रह्म, तदुभयं विदन्ति = जानन्ति इति परापरविदः सूक्ष्मतत्वदर्शिन इत्यर्थः।

ऋषेराज्ञापनप्रकारं लक्ष्मणो निवेदयति - क्षतजेति॥ हे नृवर ! रक्षसाम् क्षतजकणिकापातात् सन्ध्याधनच्छवि गोदावर्याः सलिलम् नः नियमक्षमं न, देवी विश्वम्भरा धरणिधरसङ्काशैः तेषाम् कलेवरसञ्चयैः समन्ततः विषमिततला (विद्यते) इत्यन्वयः। हे नृवर ! हे नरश्रेष्ठ!, रक्षसाम् = मायिनाम्, क्षतजकणिकापातात् = रुधिरविन्दुचरणात्, सन्ध्याघनच्छवि = संध्याघनस्य = सायंतनमेघस्य छविः इव छविः शोभा यस्य तत् गोदावर्याः = एतन्नामिकायाः नद्याः, सलिलम् = जलम् राक्षसरक्तसम्पृक्तञ्जलमित्यर्थः, नः = अस्माकम्, नियम- क्षमम् = सन्ध्यावन्दनब्रह्मयज्ञतर्पणादियोग्यम्, (न = नास्ति, शोणितसम्मिश्रणतया दूषितत्वात्। अनेन रामस्य प्रशंसाऽपि व्यज्यते। देवी = भगवती, विश्वम्भरा = वसुन्धरा, धरणिधरसङ्काशैः = पर्वतसदृशैः, तेषाम् = राक्षसानाम्, कलेवरसञ्चयैः = शरीरसमूहः, समन्ततः = समन्तात् (सर्वस्याम् दिशि इति यावत्) विषमिततला = सञ्जातनिम्नोन्नतस्वरूपा विद्यते। हरिणीवृत्तम्। तल्लक्षणं हि- "रसयुगहयेर्न्सौ म्रौ स्लौ गो यदा हरिणी सदा"। उपमाऽलंकारः ॥ ९ ॥

अथ रामो मुनीनां स्वातंत्र्यमनुभवन्नाह- अयमिति॥ अत्र राशिशब्दः समूहवाची, निर्बन्धविषयः = न कस्यचिदपि बन्धनस्य विषयः। ऋषयः सर्वथा स्वतन्त्रा भवन्तीत्यर्थः।

अथ लक्ष्मण आभूषणधारणफलं कथयति - मणिमंशुकेसरितमिति ॥ ये अंशुकेसरितम् मणिम् कलधौतसिद्धम् अङ्गुलीयकम् अपि धारयन्ति, मायिनः अपाचराः तान् आशु अवशम् प्रकृतिम् व्रजन्तीति अन्वयः। ये (पुरुषाः) अंशुकेसरितम् अंशवः = रश्मय एव केसराः = किञ्जलकाः "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः, सञ्जाता अस्य इति अंशुकेसरितम् (तथाभूतम्) मणिम् = चूडामणिम्, कलधौतसिद्धम् = कलधौतेन = सुवर्णेन सिद्धम् = सिद्धिमुपगतम् सुवर्णनिर्मितमित्यर्थः, अङ्गुलीयम् = मुद्रिकाम्, अपि = च, धारयन्ति = भूषणत्वेन स्वीकुर्वन्ति, मायिनः = वचनपराः, मायया रूपान्तरं प्रतिपन्ना वा, उपाचराः = निशाचराः, तान् =

मण्यङ्गुलीयधारिणः पुरुषान्, समवाप्य = संस्पृश्य, आशु = तत्क्षणमेव, अवशम् = बलात्, प्रकृतिम् = स्वरूपम्, व्रजन्ति = गच्छन्ति। एतद्रत्नद्वयसंस्व र्शेन मायारूपं प्रतिपन्ना राक्षसा अचिरमेव स्वरूपं प्राप्नुवन्तीति भावः। मन्जु भाषिणी वृत्तम्। तल्लक्षणम् = सजसा जगौ भवति मन्जुभाषिणी ॥ १० ॥

असाधारणेति ॥ न साधारणम् असाधारणम् = अलौकिकम् सुखम् अर्थयते इति असाधारणसुखार्थी, नित्यानन्दान्वेषक इत्यर्थः।

सिद्धार्थानामिति ॥ सिद्धः = प्राप्तः अर्थः = मोक्षरूपः परमपुरुषार्थः यैः ते सिद्धार्थाः तेषाम् लब्धपरमपुरुषार्थानाम्। प्रीतिलताकुसुमम् = प्रीतिः = प्रेम एव लता = वल्ली तस्याः कुसुमम् = कुसुमरूपेण विद्यमानमाभूषणम् ।

अथ लक्ष्मणः परिवर्त्तितरूपं रामदर्शितं वनं समर्थयन्नाह - कस्य किन्नु इति ॥ अनभ्रविद्युदापातपरीतैः इव पादपैः (सहितम्) इदम् वनम् कस्य केन कुतस्त्यम् किन्नु दीप्यते इत्यन्वयः। अनभ्र- विद्युदापातपरीतैरिव = अनभ्रविद्युतः = धनरहित- चपलायाः आपातः = सम्पातः तेन परीतैरिव = अनुलिप्तैरिव, पादपैः = महीरुहैः (सहितम्) इदम् = पुरदृहश्यमानम्, वनम् = विपिनम् कस्य = दावाग्निसौदामिन्यादीनामन्यतमस्य कतमस्य, केन = तेजोविशेषेण, कुतस्त्यम् = कोदिशमुद्दिश्य, किन्नु = कथं नु, दीप्यते = प्रकाश्यते। अनुष्टब् वृत्तम्। उत्प्रेक्षा लंकारः ॥ ११ ॥

अथ रामो नेपथ्ये मुर्मुराशब्दमाकर्ण्य तदनुसारेण दृष्टमृगः सीतायै तं गुणवर्णनपूर्वकं दर्शयति – पथि जलमुचामिति ॥ तरुणि ! मृगलोचने ! गतिविभ्रमात् जलमुचाम् पथि उत्सर्पिण्या रुचा अनिमिषपतेः अद्भुतम् शरासनम् आतन्वानम् रजतचरणम् रत्नग्रीवम् हिरण्मयविग्रहम् आरात् तरुणम् मृगम् वीक्षस्व इत्य न्वयः| तरुणि ! पूर्णयौवने !, मृगलोचने ! = हरिणनयने !, गतिविभ्रमात् = गमनविलासात्, जलमुचाम्= मेघानाम्, पथि = मार्गे (अन्तरिक्षे इस्यर्थः) उत्सर्पिण्या ऊर्ध्वं प्रसरन्त्या, रुचा = कान्त्या, अनिमिषपतेः = इन्द्रस्य, अद्भुतम् = विलक्षणम्, शरासनम् = धनुः, आतन्वानम् (मृगं वीक्षस्व इत्यग्रिमेणान्वयः) = विडम्बयन्तम्, रजतचरणम् = रजतमयौ = रूप्यमयौ, चरणौ = पादौ यस्य तम् रूप्यमयपादम्, रत्नग्रीवम् = अत्र रत्नशब्देन मरकतरत्नमभिप्रेतम्, अतः मरकतमयी ग्रीवा यस्य तम् = मरकतमयग्रीवम् हिरण्मयविग्रहम् = सुवर्णमयदेहम्, आरात् = दूरे स्थितम्, तरुणम् = युवानम् यौवनोदयेन रमणीयदर्शनमित्यर्थः, मृगम् = हरिणम्, वीक्षस्व = पश्य। ईदृशसुन्दरसुवर्णमृगदर्शने त्वयाऽऽदरो विधेयः, रमणीयवस्तुनः सर्वथा दर्शनीयस्वादिति भावः। हरिणी वृत्तम् ॥ १२ ॥

रामो मृगं प्रति लक्ष्मणस्य राक्षसकृतमायाशङ्कां समालोचयन्नाह - परमार्थमृग इति। अयम् परमार्थमृगः चेत्, अस्याः मनोरथः सिद्ध्यति, यदि मायामृगः (तर्हि) अत्र अस्माभिः व्यक्तम् परीचयः (मृग इति शेषः) इत्यन्वयः। अयम् = पुरोदृश्यमानः, परमार्थमृगः = वास्तविकहरिणः, चेत् = यदि, (तदा) अस्याः = सीतायाः, मनोरथः = अभिलाषः, सिद्ध्यति = सफलीभवति, यदि मायामृगः = कपटहरिणः (तर्हि) अत्र = अस्मिन् विषये, अस्माभिः, व्यक्तम् = स्पष्टतया, परीक्ष्यः = परीक्षाविषयीकर्तव्यः, तत्वतः ज्ञातव्यः कोऽयमिति, उभयथाऽप्यनुसरणीय एवेति भावः। अनुष्टुब् वृत्तम्॥१३ ॥

अथ रामो मायामृगग्रहणार्थमुद्यतं लक्ष्मणं निवारयन्नाह - अभिगम्येति ॥

कुमार ! विदूरवर्त्तिनः मुनीन् वने वने अभिगम्य विनिवृत्तस्य तव ललाटमण्डले श्रमवारि जालकम् बध्नाति, इत्यन्वयः। कुमार ! = वत्स, विदूरवर्त्तिनः = इतोऽत्यन्तं दूरे

वर्त्तमानानू, मुनीन् = तपोधनान्, वने वने = प्रतिवनम्, अभिगम्य = प्रत्येकं प्राप्य, (सर्वेषां समीपं क्रमेण गत्वेति यावत्) विनिवृत्तस्य = परावृत्तस्य, तव = लक्ष्मणस्य, ललाटमण्डले = भालप्रदेशे, श्रमवारि = स्वेदजलम्, (साम्प्रतम्) जालकम् = कोरकम्, बिन्दुधारामिस्यर्थः, बध्नाति = करोति। तव भालप्रदेशे मार्गश्रमजनिताः स्वेदबिन्दवोऽधुनावि कोरकाऽऽकारेण परि

लक्ष्यन्ते, अतस्त्वाम्मृगग्रहण कर्मणि न क्लेशयामीत्यर्थः। सुन्दरीवृत्तम् ॥ १४ ॥

अथ लक्ष्मणो धनुर्गृहीत्वा मायामृगमनुसरन्तं रामं विलोक्य सविषादमाह – हन्तेति ॥ न स्वन्तः = न विद्यते सु = शोभनः अन्तः = परिणामः यस्येति विग्रहः।

लक्ष्मणो मायामृगस्य चेष्टाविशेषान् प्रदर्शयति – मरतकमयीमिति। (अयम्मृगः, इति उपरिष्टाद् ग्राह्यम्) मरतकमयीम् ग्रीवाम् पुनः पुनः साचीकरोति, अभिनवम् तृणम् जिह्वाग्रेण स्पृशन् इव धावति, आर्ये (ग्रहणार्थं प्रयतमाने) वृक्षान् परितो भ्रमति, (आर्ये ग्रहणार्थं प्रयतमाने) अधोऽपि उच्चैः दृश्यते, आर्ये कोपात् धनुः नमयति (सति) स्थले तिरोभवति इत्यन्वयः। अयम्मृगः, मरतकमयीम् = मरकतमणिनिर्मिताम्, ग्रीवाम् = कन्धराम्, पुनः पुनः = वारम्बारम्, साचीकरोति = तिर्यक्करोति, अनुगच्छन्तम् आर्य पुनः पुनरीक्षते इति भावः, अभिनवम् = नूतनम्, तृणम् = घासम्, जिह्वाग्रेण = रसनाग्रभागेन, स्पृशन् इव = = स्पर्श कुर्वन् इव, धावति = त्वरितं गच्छति, आर्ये ग्रहणार्थं प्रयतमाने सति वृक्षान् = पादपान्, परितः = सर्वतः, भ्रमति = भ्रमणं करोति, अधःस्थितस्य अस्य मृगस्य ग्रहणार्थं प्रयतमाने आर्ये उच्चैः = उपरिभागे, दृश्यते = अवलोक्यते, ग्रहणे प्रयासवैफल्यजनितात् कोपात् = रोषात्, आर्ये तस्य निग्रहार्थं धनुः = शरासनम्, नमयति (सति) = सन्दधाने सति, धनुषि शरसन्धाने कृते सति, स्थले = भूमौ सिरोभवति = तत्क्षणे छन्नो भवति। विलक्षणोऽयं मृगः स्वचापल्यात् स्वकीया विविधाश्चेष्टाः प्रदर्शयन्नार्य सर्वथा विस्मयपथं समानीय क्लेशयतीति भावः। हरिणीवृत्तम्। स्वभावोक्त्यलङ्कारः ॥ १५ ॥

अथ रावणः सीताहरणकार्ये स्वल्पमपि कालविलम्बमसहमानः सूतं सनिर्वेदं रथचोदनाय नियुंक्ते – मयि जीवतीति ॥ सूत ! (एषा) मे सहजा मयि जीवति मे मानुषात् विपदम् अवाप्ता, (एषा) शुचम् जहातु, पतिम् अपमृद्य सीताम् हरामि (अहमिति शेषः) (अतः) त्वम् जवेन तुरगान् चोदय इत्यन्वयः। सूत ! = सारथे !, (एषा) मे = मम, सहजा = साक्षात् सहोदरी, मयि जीवति = मयि विद्यमाने, मानुषात् = साधारणजनात्, विपदम् = कर्णनासिकच्छेदरूपां विपत्तिम्, अवाप्ता = प्राप्ता, साम्प्रतम् एषा प्रतिक्रियाविधानात् अपमानहेतुकाम् शुचम् = दुःखम्, जहातु = त्यजतु, प्रतिक्रियास्वरूपमाह– अपमृद्येति। पतिम् = स्वामिनम्, अन्तरं राममिति यावत्, अपमृद्य = संग्रामे निहत्य, सीताम् = एतन्नाग्रीं रामप्रियाम्, हरामि = हरणं करोमि, (अतः) स्वम् = सूतः, जवेन = वेगेन, तुरगान् = अश्वान्, चोदय = प्रेरय। साधारणमानवेन रामेण मम सहोदरी कर्णनासिकच्छे –दनद्वारा बलात्तिरस्कृता, तस्य भार्याऽपहरणद्वारा मयाऽपि तत्प्रतीकारोऽवश्यं विधेयोऽतस्त्वयाऽपि वेगेन वाजिनः प्रेरयितव्या इति भावः| कालभारिणीवृत्तम् ॥ १६॥

अथ रामेऽनुरक्तहृदया शूर्पणखा तं वशीकर्तुकामा निमित्तान्तरेण निषेधति – आर्य ! मा मेति ॥ संरम्भस्य = क्रोधस्य, क्रमः = प्राप्तिः, तेन संरम्भकमेण अलमित्यर्थः। कदर्थितमहेन्द्रविक्रमस्य = कदर्शितः = निन्दितः महेन्द्रस्य = वासवस्य विक्रमः = पराक्रमः येन तस्य तिरस्कृतसुरेन्द्रपराक्रमस्य|

अथ रावणः शूर्पणखाप्रतिपादितराम - वधनिषेधं समर्थयन्नाह - युधि सरमसमिति ॥ युधि सरभसम् रामम् हथ्वा मयि बलात् सीताम् गृह्णति (सति) अनुचिता सा भर्त्तुः शोकात् स्वयम् असून् किं न उज्झति, अपि च त्रिदशविजयश्लाघापात्रीकृताः मम बाहवः मनुजम् रामम् हन्तुम् किम् आयुधम् स्पृशन्ति ? इत्यन्वयः| युधि = संग्रामे, सरभसम् = सक्रोधम्, रामम् = सीतापतिम्, हत्वा = निहस्य, बलात् = हठात्, मयि = रावणे, सीताम् = जनकपुत्रीम् गृहति = अपहरति सति (सा) भर्त्तुः = पत्युः, शोकात् = पतिहननजनितदुःखात्, अनुचिता असञ्जातमत्परिचया, स्वयमेव = आत्मनैव असून् = प्राणान्, किं नोज्झति ? = किं न त्यजति, अर्थात् उज्झिष्यत्येवेति काक्वा व्यज्यते। अपिच = किञ्च, त्रिदशविजयश्लाघापात्रीकृताः = देवविजयप्रशंसा- भाजनीभूताः, मम = विदितविक्रमस्य लङ्काधिपतेः, बाहवः = भुजाः, मनुजम् = मानवम्, रामम् = रामाख्यं जनम्, हन्तुम् = विनाशयितुम् किम्, आयुधम् = शस्त्रम्, स्पृशन्ति? = गृह्णन्ति, नः स्पृशन्तीत्यर्थः। संग्रामे रामस्य हननात् जीवित सीताहरणमेव शङ्कितम्, अयञ्च अमरविजयप्रशंसाभाजनीभूता मम बाहवो मनुष्ययोनि भ्रष्टराज्यं रामं हन्तुमायुधग्रहणे नैवोद्यताः सन्ति अत उभयथापि रामवधो नोचित इति भावः। हरिणीवृत्तम् ॥ १७ ॥

अथ सूतोऽनिष्टसूचकानालोक्य सीताहरणाद्रावणं निवर्त्तयितुं निवेदयति - तनुभिरिति ॥ आयुष्मन् ! ते अमी हरिताम् अतिशायिनः अपि रथवाजिनः हेतुना विना सवेपथुभिः तनुभिः, अश्रुवर्षिभिः नयनैः, अनवस्थितैः मनोभिः नभसि स्खलन्ति इत्यन्वयः। आयुष्मन् ! = दीर्घजीविन्, ते = भवतः, अमी= एते, हरिताम् = सूर्याश्वानाम्, अतिशायिनोऽपि = अश्वगुणैः तानतिक्रम्य वर्तमाना अपि, रथवाजिनः = स्यन्दननियुक्ततुरगाः, हेतुना विना = कारणेन विना, सवेपथुभिः = सकम्पैः तनुभिः = शरीरावयवैः, अश्रुवर्षिभिः = नयनजलस्रवद्भिः, नयनेः = लोचनैः, अनवस्थितैः = अस्थिरैः, मनोभिः = चेतोभिः (उपलक्षिता भूत्वा) नभसि = अन्तरिक्षे, समतलेऽप्याकाशमार्गे इत्यर्थः, स्खलन्ति = परिपतन्ति। कारणाभावेऽपि तवाश्वानां स्खलनमवश्यमनिष्टसूचक मस्तीति भावः। मन्जु भाषिणी वृत्तम्। विभावनाऽलङ्कारः ॥ १८ ॥

अधिकार निरपराद्धोऽहमिति ॥ अनिष्टज्ञापन- मात्रम्ममाधिकारः, कृतञ्च मया तदिति अधिकारे निरपराद्धः। विज्ञापनानन्तरं प्रवर्त्तने निवर्त्तने वा भवत एव अधिकारो न ममेति भावः। साध्वाचारम् = साधूनाम् = शिष्टानाम् आचारः = आचरणं व्यवहारो वा तम् साध्वाचारम्। अथवा साधुः = शोभनः आचारः इति साध्वाचारः तम्। अत्र पापकर्मानुष्ठाने रावणस्याऽ- साहाय्यमेव साध्वाचारः, स इदानीं तस्य सहायभूतेन मया परित्यज्यते इति गूढाशयः।

सूतो रथवेगं रावणाय निवेदयति - तोयोद्गारि इति ॥ जलमुचाम् कदम्बकम् तोयोद्गारि (भूत्वा) आयामम् आपद्यते (अश्वानाम्) स्तम्भितशृङ्खला घण्टाः मूकैः मुखैः चपलताम् उज्झन्ति, वायुना संस्तम्भितम् इदम् चामरम कर्णान्ते जपति इव, पुरतः यातव्यम् इच्छावशात् तूर्णम् स्वाम् उपसर्पति इवेत्यन्वयः, जलमुचाम् = पयोगर्भाणाम्, कदम्बकम् = वृन्दम् समूह इत्यर्थः, तोयोद्गारि = जलवर्षि, (भूस्वा) आयामम् = दैर्घ्यम्, विपुलतामित्यर्थः, आपद्यते = प्राप्नोति (तथा अश्वानाम्) स्तम्भितशृङ्खलाः = रथवेगेन स्तम्भिताः = स्तब्धीकृताः आधारभूताः शृङ्खलाः = निगडाः यासाम् ताः

घण्टाः = कण्ठालङ्कारभूताः घटिकाः, मूकैः उपरतस्वनैः, मुखैः = आननैः, चपलताम् = कम्पनम्, उज्झन्ति = त्यजन्ति, वायुना = पवनेन, संस्तम्भितं = सम्यक् स्थिरीभूतम्, कर्णान्ते श्रोत्रसमीपे, जपति इव = किमपि रहस्यं मन्त्रयते इव, तथा, पुरतः = अग्रतः, यातव्यम् =

गन्तव्यस्थानम्, इच्छावशात् = अभिलाषाघीनात्, तूर्णम् = शीघ्रम् त्वाम् = रावणम्, उपसर्पति इव = समीप मागच्छति इव। शार्दूलविक्रीडितं वृत्तम्। क्रियोत्प्रेक्षालङ्कारः ॥ १९ ॥

अथ रावणः सीतां दृष्ट्वा तस्यां त्रैलोक्यसुन्दरीत्वमुपपादयति - इन्द्राणीमिति ॥ अहम् अप्सरोभिः (सह) इन्द्राणीम् कारागृहे गण्यताम् अनयम्, दश दिशो जयता मया स्त्रीणाम् पुष्पके संहारः कृतः, कैलासोद्धरणे अद्रेः वेपथुमतीम् सुताम् अपि अद्राक्षम, तासु ईदृशम् रूपम् न दृष्टम्, अहो, चिरात् चक्षुः सार्थकम् (जात मिति शेषः) इत्यन्वयः। अहम् = रावणः, अप्सरोभिः = स्वर्वेश्याभिः, सह, इन्द्राणीम् = इन्द्रपानीम् शचीम् कारागृहे = बन्धनालये, गण्यताम् = दृश्यताम्, अनयम् = आनीतवान्, दशदिशः = भुवनमण्डलानि, जयता = विजयं कुर्वता, मया = रावणेन, स्त्रीणाम् = रमणीनाम्, पुष्पके = पुष्पकविमाने, संहारः = सम्भूय हरणम्, कृतः = सम्पादितः, कैलासोद्धरणे = कैलासनामधेयनगाधिरा- जोस्थापनसमये, अद्रेः = पर्वतस्य, वेपथुमतीम् = सकम्पाम्, सुताम् = तनयाम्, जगद्वन्द्यां पार्वतीमित्यर्थः, अद्राक्षम् = अपश्यम्, तासु = पूर्वोक्तासु त्रैलोक्यनिवासिनीषु वनितासु, ईदृशं रूपम् = एतादृक् सौन्दर्यविशिष्टं स्वरूपम्, न दृष्टम् = नावलोकितम् (मयेति शेषः) अहो, इति विस्मयमिश्रितप्रसन्नतासू- चकमव्ययम्, चक्षुः = नयनम्, चिरात् = बहुकालानन्तरम्, सार्थकम् = सफलम् जातमिति शेषः। जन्मकालत एवेदृशरूपदर्शनाभावाल्लोचनस्य साफल्यमिदानीम- वाप्तमिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

अभिलाषानन्तरं कामिनां संकल्पो जायतेऽतो रावणः संकल्पण्याकुलो भूत्वा सीताशरीरालिङ्गनेन स्वभुजानां सौख्यकल्पनां करोति - अनादिति ॥ रूपरसा- यनस्य बहुधा पानात् मनः सन्तर्पयन्ती मम इयम् धीरतरा नेत्रपरम्परा फलवती जाता, अहम् अस्याः पक्लवकोमलाम्, कृत्स्नाम् तनुम् आलिङ्ग्य वीरव्रणाङ्कान् विंशतिभुजान् कदा नु तिर्वोचयामि इत्यन्वयः। रूपरसायनस्य = रूपम् = सौन्दर्यम् तदेव रसायनम् = रससारः तस्य, बहुधा = बहुकृत्वः, पानात् = आस्वादनात्, मनः = अन्तःकरणम्, सन्तर्पयन्ती = नितरां सन्तोषं प्रयच्छन्ती, मम= रावणस्य, इयम्, धीरतरा = स्थिरतरा, नेत्रपरम्परा = लोचनसन्ततिः, फलवती = सफला, जाता = अभूत्, बहूनां लोचनानां सकृदेव लाभफलं मया प्राप्तमित्यर्थः। अहम् = रावणः, अस्याः = सीतायाः, पल्लवकोमलाम् = किसलयवत्सुकुमाराम्, कृत्स्नाम् = सम्पूर्णाम्, तनुम् = देहलताम्, आलिङ्गय = परिरभ्य, वीरव्रणाङ्कान् = शूरव्रणचिह्नितान्, अमूनू = एतान्, विंशतिभुजान् = विंशतिसंख्यकबाहून्, कदा नु = कस्मिन् समये, निर्वेक्ष्यामि = सुखयिष्यामि। एतादृशः कः शोभनकालो यमवलम्ब्य त्रैलोक्यसुन्दरी इयम् मदालिङ्गनविषया भविष्यतीति भावः। शार्दूलविक्रीडितं वृत्तम्। लुप्तोपमाऽलङ्कारः || २१ ।।

अथ रावणो लक्ष्मणं दृष्ट्वा विकल्पयति- कवचिततनुरिति ॥ कवचिततनुः पृष्ठावापी दृडज्यशरासनः सीताम् अभितः निभृतम् तिष्ठन् अयम् कतमः युवा, हहह, (अस्याग्रजः) रामः शरैः ताटकाम् शमयाञ्चक्रे किल, अयम् त्वाम् प्रति असिफलम् प्राप्तः, अहो, बलिनो नराः इत्यन्वयः| कवचिततनुः = कवचिता = सञ्जातकवचा, अथवा कवचेन आवृता तनुः = देहः यस्य, कवचावृतशरीरः, पृष्ठावापी = आवपन्ति अस्मिन् शरा इति आवापः = इषुधिः, पृष्ठे आवापः अस्ति अस्य इति पृष्ठावापी इषुधिसन्नद्धपृष्ठः, ज्यशरासनः = हड = कठिना = ज्या = मौर्वी यस्य तत्तथाभूतम् शरासनम् = धनुः यस्य = मौवधनुष्कः, सीताम् = जानकीम, अभितः = समीपे, निभुतं तिष्ठन् = एकान्त भावेन वर्त्तमानः, अयं कतमः = कः, युवा=तरुणः, अस्तीति शेषः। वीरवेषं परिकल्प्य रामप्रियां रचन् कोऽयं युवेति वितर्कः। शूर्पणखामुखाएलचमणोऽयमिति ज्ञात्वा सोपहासमाह हहह इति। हहह इति अपहास सूचकमव्ययम्, तच्चान्त्राऽस्याजन्यम्, रामः = अस्था प्रजः, पुरा = अतः पूर्वम्, शरः = बहुभिः बाणैः, ताटकाम् = एतन्नाम्नीमासन्नमरणां वृद्धां

राक्षसीम, शमयाञ्चके किल= इतवान् किल, अयम् = लक्ष्मणः, स्वाम्प्रति = भवती प्रति, असिफलम् = कर्णनासिकच्छेदन रूपं खड्गधारणफलम् प्राप्तः लब्धवान्, अहो बलिनो नराः = अहो पराक्रमशालिनो मानुषाः, अन्न काका उभयोः स्त्रीगोचरपराक्रमयोदौंवख्यमेव व्यज्यते। हरिणीवृत्तम्। व्याजस्तुतिर लङ्कारः ॥ २२ ॥

अथ सूतो रामं दृष्ट्वा मारीचवचः सत्यं मन्यमानस्तस्य वचनप्रकारं दर्शयति न पुमानिति ॥ रामः न पुमान्, न पुण्डरीकाक्षः, न मुग्धेन्दुशेखरः, (अपितु) अयोध्यायाम् एकम् रक्षोघ्नम् औषधम् आविर्भूतम् इत्यन्वयः। रामः = मनुष्य रूपेण वर्त्तमानो दशरथसुतः, न पुमान् = न मनुष्यः, न पुण्डरीकाक्षः = न नारायणः, न मुग्धेन्दुशेखरः = न शङ्करः, (अपितु) अयोध्यायाम् = एतन्नाम्न्यां नगर्य्याम्, एकम्, रक्षोघ्नम् = राक्षसविनाशकम्, औषधम् = भेषजम् आविर्भूतम् = समुत्पन्नम्। लोके रामो नाम देवो विष्णुः शङ्करो वाऽवतीर्ण इति प्रसिद्धम्। अहं तु तं राक्षसकुलविनाश- हेतुकमौषधविशेषम्मन्ये इति भावः। अपहुयलङ्कारः ॥ २३ ॥ अनुष्टववृत्तम्।

सम्प्रति वयमिति ॥ मनुष्याणां कृते राक्षसा भयदाः साम्प्रतं त्वस्माकं कृते मनुष्या एव भयदाः सञ्जाता अतो रामस्य राक्षसत्वम्, अस्माकञ्च मनुष्यत्वमायातमित्यर्थः।

रावणः सीतायाः सहजसौन्दर्य प्रतिपादयति –यस्येति ॥ यस्य शोभा नैसर्‌गिकी तत् संस्कारम् नार्हति, शशिनः कलाम् कः मार्‌ष्टि, कौस्तुभः केन रज्यते इत्यन्वयः। यस्य = वस्तुनः, शोभा = सौन्दर्यम्, नैसर्गिकी = स्वाभाविकी, तत् = वस्तु, संस्कारम् = प्रसाधनम्, नार्हति, प्राकृतिकशोभस्य संस्कारापेक्षा नास्तीत्यर्थः। शशिनः = चन्द्रमसः, कलाम् = ज्योत्स्नाम्, कः मार्‌ष्टि = कः संशोधयति न कोऽपीत्यर्थः। कौस्तुभः = एतन्नामको मणिः, केन = साधनविशेषेण, रज्यते = रक्तः क्रियते न केनापीत्यर्थः। यथोभयोः स्वाभाविकं वैशिष्ट्यं न किमपि साधनमपेक्षते तथैव सहजसुन्दरी सीताऽपि न अलङ्कारान्तरमपेक्षते इति भावः। अनुष्टुब् वृत्तम्। दृष्टान्ताऽलङ्कारः ॥ २४ ॥

अथ सूतः सीतायाश्चारित्र्यं स्तौति – इमामिति ॥ इमाम् गम्भीरचारित्राम् पतिदेवताम् पश्यामि (अहमिति शेषः) कथमिति जिज्ञासायामाह – यदनेनेति, यत् अनेन बन्धुनिःस्पृहा। धीरा (भूत्वा) वने रमते इत्यन्वयः। इमाम् = पुरोदृश्य मानाम्, गम्भीरचारित्राम् = गम्भीरम् = अपरिच्छेद्यम् अनन्यपतिव्रतासाधारणमिति यावत्, चारित्रम् = शीलम् यस्याः ताम् = असाधारणशीलाम्, पतिदेवताम् = पतिः एव देवता यस्याः ताम् = सर्वथा स्वामिन्यनुरक्ताम्, पश्यामि = अवलोकयामि पतिव्रतात्वेन तां जानामीत्यर्थः, पतिव्रतात्वेन = कथं ज्ञायते इति जिज्ञासायामाह – यदनेनेति, यत् = यस्मात्, अनेन = अनेन प्रकारेण निश्शकतया, बन्धुनिः स्पृहाः = स्वजनसहायमनपेक्षमाणा, धीरा (भूत्वा) = धैर्यमवाप्य, वने = विपिने, रमते = एकाकिनी एव इतस्ततो भ्रमति, अत एव अस्याः पतिव्रतावे नास्ति सन्देहावसर इति भावः। अनुष्टुव् वृत्तम्। काव्यलिङ्गमलङ्कारः ॥ २५ ॥

रावणः स्त्रीस्वभावं प्रकाशयति – नन्विति॥ स्त्रीणाम् = नारीणाम् बुद्धिः = मतिः, विशेषान् = पूर्वमनुभूतभावापेक्षयाऽत्यन्तं विशिष्टान् भावान् उपलभ्य = अनुभूय, सन्तोषिणी ननु = परितोषकारिणी ननु, प्रसिद्धार्थे ननु शब्दः। यतो हि नारीणामेष स्वभावः, अतो रामापेक्षया मम वैशिष्ट्यमनुभूयेयमपि अचिरमेव वश- ङ्गता भविष्यतीति भावः।

एतदेव समर्थयते – मरतकतटे इति।। मन्दाकिन्याः मरतकतटे मदङ्कनिषादिनी कनकनलिनोद्गन्धीन् स्वर्गानिलान् प्रतिगृह्णती भयपरवशे महेन्द्रपरिग्रहे दत्ताऽपाङ्गा एषा मनुजम् अवधूय मया सह कामम् रंस्यते इत्यन्वयः| मन्दाकिन्याः = स्वर्गङ्गायाः, मरतकतटे = हरिम्मणिमयतीरे, मदङ्कनिषादिनी = मम क्रोडशायिनी, कनकनलिनोद्गन्धीन् = स्वर्णकमलोद्गन्धीन्, स्वर्गानिलान् = दिवो वायून्, प्रतिगृह्णती = सेवमाना, भयपरवशे = भयाऽऽक्रान्ते, महेन्द्रपरिग्रहे सुरेन्द्रनारीजने, दत्तापानाङ्गा = प्रदत्तनेत्रप्रान्ता, एषा = पुरोवर्त्तमाना सीता, मनुजम् = मानुषं रामम् अवधूय = अवमत्य, रामगतानुरागं तिरस्कृत्येत्यर्थः, मया सह = रामापेक्षया विशिष्टेन लङ्केश्वरेण सह, कामम् = यथेच्छम्, रंस्यते = रमणं करिष्यते। यदा मया सह सा स्वर्गसुखमनुभविष्यति तदा नूनमेव साधारणं मानुषं रामे विहाय मय्यनुरक्ता भविष्यतीति भावः। हरिणी वृत्तम् ॥ २६ ॥

अथ सीता दक्षिणाक्षिस्फुरणेनानिष्टं सूचयति – कुमार ! इति ॥ कुमार ! इदा नीम्मे दक्षिणम् = वामेतरम् अक्षि = लोचनम्, स्फुरणद्वारा भावि = आगामि, अशोभनम् = अनिष्टम्, आसन्नम् इव = समीपवर्त्ति इव, मन्त्रयते= सूचयति।

(लक्ष्मणोऽनिष्टं खण्डयन्नाह – आर्ये ! दायादेति || दायादसाधारणवस्तुवन्ध्यम् वनान्तम् उपाश्रितानाम् अस्माकम् किम् अशोभनम् नाम अव्यवस्था, यत्र श्रियः तत्र द्विषन्तः ननु, इत्यन्वयः। दायादसाधारणवस्तुबन्ध्यम् = दायादानाम् = बन्धूनाम् "दायादौ सुतबान्धवौ" इत्यमरः, साधारणम् = सामान्यम्, यद्वस्तु = राज्यधनादि तेन बन्ध्यम् = रहितम् = बन्धुजनसामान्यराज्य- धनादिशून्यम्, वनान्तम् = वनमध्यम्, उपाश्रितानाम् = समाश्रितानाम्, अस्माकम् = वनवासिनाम्, किम् अशोभनम् = किम् अशुभम्, अव्यवस्था = उत्पातावस्था, यत्र = यस्मिन् स्थाने, श्रियः = लक्ष्म्यः, तत्र = तस्मिन् स्थाने, द्विषन्तः = शत्रवः, ननु, भवन्तीत्यर्थः।

वयं हि राज्यश्रयादिकमनपेक्षमाणास्तापसभावेन विपिने निवसामोऽतो नास्त्यत्रानिष्टशङ्का। चञ्चला श्रीर्यत्र विद्यते तत्रैव तस्या मर्यादाभावाच्छत्रूणामाशङ्का। अत्र निर्मर्यादायाः श्रिया अप्राधान्यात् कुतो रिपुसम्भावनेति भावः। उपजाति वृत्तम्। अर्थान्तरन्यासालङ्कारः ॥ २७ ॥

लक्ष्मणो बाहुबाहुल्यस्य पराक्रमप्रमाणत्वं खण्डयति – न बाइव इति ॥ पौरुषस्य पराक्रम शक्ते, बाह्वः = भुजाः, न प्रमाणम् = न नियामकम् भुजानां बहुत्वं न शौर्यनियामकम् मित्यर्थः। एतदेवोदाहरणेन प्रतिपादय – येन सोऽयमिति ॥ येन सः अयमपि रावणः जितः तम् सहस्रभुजम् अर्जुनम् मुनिः होमसाधनविधानकर्मणा परशुना शाखिनम् इव व्यच्छिनत् इत्यन्वयः। येन रावणेन इन्द्रादयो देवास्तिरस्कृताः, सोऽयम् = विंशतिभुजः, रावणः = दशकन्धरः, येन = सहस्रभुजेन कार्त्तवीर्येण, जितः = पराजितः, तम् = रावणजितम्, सहस्रभुजम् = सहस्रसंख्यक बाहुम्, अर्जुनम् = कार्तवीर्यम्, मुनिः = परशुरामः, होमसाधनविधानकर्मणा = = होमस्यसाधनं समिदादि तस्य विधानम् = मन्त्रपूर्वकं छेदनादिसंस्कार- करणं तदेव कर्म = व्यापारो यस्य तेन परशुना = कुठारेण, शाखिनमिव = वृक्षमिव, व्यछिनत् = अखण्डयत्। सहस्रभुजोऽपि ससैन्योऽप्यर्जुनो यतः परशुमात्रेण मुनिना जितोऽतः पराक्रमशक्तेर्नियामकं भुजानां बाहुल्यं नास्त्येवेति भावः। रथोद्धता वृत्तम् । उपमाडलङ्कारः ॥ २८ ॥

अनन्तरगामिनीति ॥ स्त्रीणाम् = नारीणामध्ये लक्ष्मीरेव अनन्तरगामिनी = एकं परित्यज्य अपरानुरागिणी अस्तीति भावः। न खलु अहम् = अहं तु तमेव एकं राममनुगच्छामि अतो रामवधानन्तरं मत्प्राप्तिविषयकस्तवाभिलाषो वृथैवेति भावः।

अथ लक्ष्मणः सीतामनोभावं खण्डयन्नाह - अपि मामिति ॥ गभीरधियाम् प्रथमा सती चला (भूत्वा) अविचार्य माम् अपि (स्वम्) विजल्पसि यत् तत् तव विपत् नियतम् उपस्थिता, हि आपदि प्रकृतिः परिवर्त्तते इत्यन्वयः। गभीरधियाम् - गभीरा = सत्वविनय- धैर्यादिगुणैरपरिच्छेद्या धीः = बुद्धिवृत्तिः = यासाम् तासाम् अरुन्धत्यनुसूयादीनाम्, प्रथमा सती = स्वगुणैस्ताभ्योऽधिका भवन्ती, (साम्प्रतम्) चला = अस्थिरचित्ता (भूत्वा) अविचार्य = आर्यस्य परशुरामादिविजयशालिपराक्रमं स्मृतिपथाद् दूरीकृत्य माम् अपि = निरन्तरगुरुचरणसेवातरपरमपि लक्ष्मणम्, विजल्पसि = अधिक्षिपसि, यत् = यस्मात्, तत् = तस्मात्, तव = भवत्याः, विपत् = विपत्तिः, नियतम् = निश्चितम्, उपस्थिता = आसन्ना जाता, हि = यतः, आपदि = आसन्नायां विपत्तौ, प्रकृतिः = स्वभावः, परिवर्तते = अन्यथा भवति। अत्र हेतौ 'हि' शब्दप्रयोगः। सततराम- चरनसेवापरायणे मय्यपि यदि तव विश्वासो नास्ति तर्हि काचिद् विपत्तिरासन्ना एवेति भावः। प्रमिताक्षरा बृत्तम्। तल्लक्षणं हि -"प्रमिताक्षरा सजससै कथिता"। अर्थान्तरन्यासालङ्कारः ॥ २९ ॥

अथ लक्ष्मणः सीतायाः परुषवचनमाकर्ण्य सनिर्वेदमाह - अविवेकमिति ।। अविवेकम् अनावेक्ष्यम् अदाक्षिण्यम् अनूर्जितम् एवम् (वचः) माम् यत् प्रभावले (अतः) नारीणाम् जन्म अहम् धिक् इत्यन्वयः। अविवेकम् = उचिताऽनुचितविचाररहितम्, अनावेक्ष्यम् = अदूरदर्शित्वम्, अदाक्षिण्यम् = दाक्षिण्यहीनम्, अनूर्जितम् = सत्वबलरहितम्, एवं वचः, माम् = विवेकादिगुणयुतं लक्ष्मणम्, प्रभावसे = अस्यर्थम् अपलपसि, (अतः) नारीणाम् = स्त्रीणाम्, जन्म = जातिम्, अहं धिक् = अहं निन्दामि। अनेन सीताहृदस्य विवेकादिशून्यत्वं चापलत्वं च दर्शितम्। अनुष्टुम् बृत्तम् ॥ ३० ॥

अथ सीता "त्वम् तावत् साधुर्भव" इत्यत्र साधु शब्देन विपरीतलक्षणया लक्ष्मणस्य अविचारित्वं बोधयति।

अथ लक्ष्मणो भ्रातृजायापरुषवचनश्रवणसमुत्पन्न- निर्वेदेन गमनक्रियाम्प्रति दोलायमानहृदय आह-मायाविधेयेति ॥ मायाविधेयवपुषाम् नववैरभाजाम् रजनी- चराणाम् विश्रामवेश्मनि वने गुरोः आज्ञाम् अगनयन् अविवेकलोलाम् एकाकिनीम् भवतीम् अहम् कथम् त्यजेयम् इत्यन्वयः। मायाविधेयवपुषाम् = मावाज्ञाः विधेयम् = अधीनम्, वपुः = शरीरम् येषाम् तेषाम् कपटाधीनदेहानाम्, नववैरभाजाम् = खरदूषणादिवधोत्पन्नशत्रुभावेन छिद्रान्वेषिणाम्, रजनीचराणाम् = निशाचराणाम्, विश्रामवेश्मनि = निवासगृहे, वने = कानने, गुरोः = आर्थरामस्य, आज्ञाम् = आदेशम्, अगणयन् = अविचारयन्, अविवेकलोलाम् = अविवेकेन = विवेकशून्यत्वेन, लोलाम् = अस्थिरचित्ताम्, एकाकिनीम् = सहायान्तररहिताम्, भवतीम् = त्वाम्, अहम् = लक्ष्मणः, कथम् = केन प्रकारेण, त्यजेयम् = जह्याम्, परित्यागं कुर्यामित्यर्थः। राक्षसबहुले कान्तारे आत्ममात्रसहायां त्वां परित्यज्य गुरोर्निदेशमन्तरा इतोऽन्यन्त्र मम गमनं नोचितमिति भावः। वसन्ततिलकं

बृत्तम् ॥ ३१ ॥

समाधिरिति ॥ अत्र समाधिशब्दश्चित्तस्य स्थैर्यं लक्ष्यति। स्त्रीणां पातिव्रत्य रक्षणं तासां चित्तस्थैर्यमेव करोति नायुधामीत्यर्थः।

अपनीतयन्तुकमिति ॥ अपनीतयन्तृकम् = अपनीतः = दूरीभूतः यन्ता = रक्षकः यस्मात् तत्। इदं हि रत्नस्य विशेषणम्।

अथ दशमुखो मायया रामरूषमाश्रित्य सीतां प्रतारयति - मायाबलेनेति ॥ करतलोदरि ! मायावलेन बलिनाम् क्षणदाचराणाम् जिह्वातले वर्त्तमानाम् त्वाम् लक्ष्मणः कथम् उपेक्षितवान्, त्वम् कथम् मृदुना चरणद्वयेन इत्थम् गतासि इस्यन्वयः। करतलोदरि ! = कृशोदरि!, मायाबलेन - छुलनाप्रभावेण, बलिनाम् = सत्ववताम्, क्षणदाचराणाम् = रक्षसाम्, जिह्वातले = रसनातले, वर्त्तमानाम् = विद्यमानाम्, त्वाम् = भवतीम्, लक्ष्मणः = तव रक्षकत्वेन नियुक्तो ममानुजः, कथम् = केन प्रकारेण, उपेक्षितवान् = त्यक्तवान्, त्वम् (अपि) = सीता (अपि), मृदुना = कोमलेन, चरणद्वयेन = पादयुगलेन, कथम् इत्थम् = कथम् अनेन प्रकारेण एकाकिनी एव, गतासि = निर्गतासि, पर्णशालातो बहिर्भूतासीत्यर्थः। लक्ष्मणोपेक्षिताया अपि तव पर्णशालायामेवावस्थानं समुचितमासीदिति भावः। वसन्ततिलकं वृत्तम् ॥ ३२ ॥

अथ सूतो रावणसङ्केतेन लक्ष्मणरूपमासाद्य रथं गृहीत्वा सीताप्रबोधनाय तत्प्राप्तिकारणं छद्मना प्रतिपादयति - समाधिचक्षुषेति ॥ तपस्विजनः = तपः कर्मणि निरतो मुनिवर्गः, समाधिचक्षुषा = दिव्यनेत्रेण, भरतस्य परचक्रभयम् = शत्रुराज्यविपदम्, उपनतम् = समागतम्, दृष्ट्वा तूर्णम् = त्वरिततरम्, युष्माभिः = रामादिभिः, अभिगन्तव्यम् = अभिगमनीयम्, इति तपसा = तपोबलेन, रथम् = स्यन्दनम्, निर्माय = विरचय्य, मह्यम् = लक्ष्मणाय दत्वा, वनान्तरेषु = अन्यवनेषु, अन्तर्हितः = तिरोऽभूत्।

अथ रावणश्छलेन सीतामात्मवशङ्गतामवलोक्य मदनपरवशो भूत्वा सीतालिङ्गनसमुत्सुकोऽपि तस्याः पातिवत्यप्रभावेण स्तब्धव्यापारः सन् स्वयमेव विमृशति - मयि बुद्ध्येति।। अहम् (अधुना) मयि राम इति बुद्ध्या असन्दिग्धाम् अपि इमाम् स्प्रष्टुम् न उत्सहे, अहो, तत्पूर्वदृष्टानाम् स्त्रीणाम् समागमः कष्टः इत्यन्वयः। अहम् = रामरूपेण विद्यमानोऽपि, मयि = रावणे, राम इति बुद्ध्या = 'अयम् रामः' इति मंद्र्रोचरेण ज्ञानेन, असन्दिग्धाम् अपि = सन्देहरहिताम् अपि, इमाम् = पुरोवर्तिनीं सीताम्, स्प्रष्टुम् = स्पर्शं कर्तुम्, न उत्सहे

उत्साहं न करोमि, तत् = तस्मात्, पूर्वदृष्टानाम् = प्रथमसाक्षात्कृतानाम्, स्त्रीणाम् = रमणीनाम्, समागमः = सङ्गमः, कष्टः = दुःखावहः भवतीति शेषः। यद्यपीयं मां रामं जानाति तथापि प्राथम्येन दर्शनादस्याः सङ्गमसुखे नोत्साह इति भावः। अनुष्टुव् वृत्तम् ॥ ३३ ॥

रावणः शङ्काकुलां सीतां दृष्ट्वा एवं प्रबोधयति- मुग्धे ! मुनीनामिति ॥ अतिसन्धानार्थम् = वञ्चनार्थम्, मम रूपेण = रामस्य रूपेण, सञ्चरन्ति = यथेच्छ विचरन्ति ।

अथ रामः सीतारूपेण विद्यमानायाः शूर्पणखाया विषादनिमित्तं विमृशति - किं निःश्वासैरिति ॥ धीरे ! (त्वम्) जपापाटलम् दन्तवासः निःश्वासैः किं ग्लपयसि, नेत्राभ्याम् कुचयोः अस्रबिन्दून् अजस्रम् किं सृजसि, विक्षिप्ताङ्गी (भूत्वा) किं विलपसि, ध्यानमूका कथं तिष्ठसि, निर्गतेन मया सह तव धैर्यम् निर्गतम् कथमिति शेषः। इत्यन्वयः। धीरे ! = स्वभावतो धैर्यगुणसम्पन्ने, (त्वम्) जपापाटकम् = जपापुष्पवदतिरक्तम्, दन्तवासः = अधरम्, निःश्वासैः = निःश्वासमारुतैः, किम् = किमर्थम्, ग्लपयसि = मलिनयसि, नेत्राभ्याम् = लोचनाभ्याम्, कुचयोः = स्तनयोः अस्रबिन्दून् = अश्रुजलकणिकाः, अजस्रम् = निरन्तरम्, किम्, सृजसि = उत्पादयसि विक्षिप्ताङ्गी = विवशकरचरणाद्यवयवा (भूत्वा) किम्, विलपसि = परिदेवनं करोषि, ध्यानमूका = ध्यानेन = चिन्तया मूका = स्तिमितोर्ध्वनयना, किम्, तिष्ठसि = वर्त्तसे, निर्गतेन = मृगग्रहणार्थं बहिर्गतेन, मया सह = रामेण सह, तव = सीतायाः, धैर्यम् = धीरता, कथम्, निर्गतम् = बहिर्भूतम्। मम निर्गमनानन्तरं तव धैर्यविनाशे किं कारणमिति भावः। मन्दाक्रान्ता वृत्तम्। तल्लक्षणं हि - मन्दाक्रान्ताऽम्बुधिरसनगैर्भो भनौ तौ गयुग्मम्। सहोक्त्यलङ्कारः ॥ ३४ ॥

अथ लक्ष्मणो राघवं सम्बोध्य विलपति - सकामेति ॥ कैकेयि ! (इदानीं त्वम्) सकामा भव, कौशल्ये। तव गतिः न, यत् निशाचरबाणेन ते सुतः मर्मणि क्षतः इत्यन्वयः। कैकेयि ! = भरतमातः !, (इदानीं स्वम्) सकामा भव = सफलमनोरथा भव, कौशल्ये ! = राममातः !, तव = भवत्याः, गतिः = उपायः, न = नास्ति यत् = यस्मात् ते = तव, सुतः = पुत्रः, निशाचरबाणेन = रजनीचरशरेण, मर्मणि = मर्मस्थले, क्षतः = पीडितः, कथाशेषताङ्गत इत्यर्थः। अनुष्टुब् वृत्तम्। काव्यलिङ्गमलङ्कारः ॥ ३५ ॥

पुनरपि सीतावैधव्यमनुस्मृत्य शोकाकुलहृदयस्तां सम्बोध्य विलपति - सत्यवादिनीति।। सत्यवादिनि ! धर्मिष्ठे !, सागरवाससः पुत्रि ! देवि ! त्वम् अमङ्गलानाम् नारीणाम् (मध्ये) कथम् गण्यसे इत्यन्वयः। सत्यवादिनि! = यथार्थवचने !, धर्मिष्ठे= भर्तृशुश्रूषारूपधर्मकर्मनिरते, सागरवाससः = भगवत्या वसुन्धरायाः, पुत्रि = तनये !, (एवम्भूका स्वम्) अमङ्गलानाम् = अशुभसूचकानाम्, विधवानाम्, नारीणाम् = स्त्रीणाम् (मध्ये) कथम् = केन प्रकारेण, गण्यसे = गणिता क्रियसे। वैधव्यकारणाभावेऽपि कथं स्वं विधवात्वं यास्यसीति भावः। अनुष्टुबू वृत्तम् ॥ ३६ ॥

अथ सौमित्रिर्विपन्नं रामं दृष्ट्वा विलपति - गुरुविधेय इति ॥ गुरुविधेयः = गुरुतरं विधेयम् = पुत्रोत्पादनादिकर्त्तव्यं यस्य स गुरुविधेयः तत्सम्बोधने। पित्रादि ऋणत्रयमनपाकृत्य साम्प्रतं तव गमनं नोचितमिति भावः। त्वदायत्तम् = त्वदधीनम्। यतो मम जीवनं तवाधीनमतस्त्वयि जीवस्येव मया जीवितव्यं, नान्यथेत्यभिप्रायः ।

अथ रामो लक्ष्मणस्य भ्रान्तिमपनुदति- मुञ्च मायेति ॥ मायागतम् दुःखम् मुञ्च, तव पूर्वजम् माम् पश्य, इति रामवाक्यम्, मध्ये एव लक्ष्मणोऽधिक्षिपन्नाह - पूर्वजमिति ॥ मे पूर्वजम् अपि हत्वा माम् अपि च किम् अभिगवोऽसि इत्यन्वयः। लक्ष्मण ! मायागतम् = कपटशरीरहेतुकम्, दुःखम् = खेदम्, मुञ्च = त्यज, तव = भवतः, पूर्वजम् = अग्रजम्, माम् = रामम् पश्य = अवलोकय, न खलु तवाग्रजो रामो विपन्नः, अपितु मायाशरीरो मृग एव विपन्नः, अतो नास्ति शोकस्यावसर इति रामाशयः ।

लक्ष्मणो रामं राक्षसम्मन्यमानः सक्रोधमाह - पूर्वजमिति ॥ मे = मम, पूर्वजम् = अग्रजम् ज्येष्ठ भ्रातरमित्यर्थः, हत्वा = निहत्य, माम् अपि = लक्ष्मणमपि, अभिगतोऽसि = प्राप्तोऽसि (हन्तुम् इति शेषः)। अनुष्टुब वृत्तम् ॥ ३७ ॥

अथ लक्ष्मणो मारीचस्य वास्तविकं स्वरूपं दृष्ट्वा सविस्मयमाह-प्रकृतिमिति॥ तामरसपाटलत्विषा तव चरणेन उद्धृतः सहजाम् प्रकृतिम् प्रपद्य सम्भृतः धनैः सह जवेन नभसः पतनचूर्णिताचलः क्षितौ पतति इत्यन्वयः। तामरसपाटलत्विषा = तामरससमानशोभेन, तव = लोकोत्तरपराक्रमस्य भवतः, चरणेन = पादेन, उद्धृतः = उत्क्षिप्तः (सन्) सहजाम् = स्वाभाविकीम्, प्रकृतिम् = स्वरूपम्, राक्षसरूपमित्यर्थः, प्रपद्य = आसाद्य, सम्प्राप्येति यावत्, सम्भृतैः = तत्कालोत्पन्नैः, घनैः = मेघैः, सह, जवेन = वेगेन, नभसः = आकाशात्, पतनचूर्णिताचलः = पतनेन = स्खलनेन चूर्णितः = शकलीकृतः अचलः = पर्वतः येन तथाविधो भूत्वा क्षितौ = पृथिव्याम्, पतति = आगच्छति। भवच्चरणोद्धरणकाले एव वेगेन मेघमार्गमासाद्य ततो धरण्यां निपततीति भावः। मन्जुभाषिणोवृत्तम्। सहोक्तिरलङ्कारः ॥ ३८ ॥

अथ लक्ष्मणो रामाङ्गुलीयकस्पर्शेन राक्षस्याः स्वरूपप्राप्तिप्रकारमवलोक्याह - नीलोत्पलेति ॥ 'अस्याः' इत्युपरिष्टाग्राह्यम् । (अस्याः) नयनयुग्मम् नीलोत्पला कृतिम् अपास्य रथाङ्गरूपम् आपद्यते, इयम् तनुश्च आलूननासिकतया विवृतान्तमूलैः दन्तैः (उपलचिता सती)

सितैः मृणालैः विमथिता सरित् इव (दृश्यते इति शेषः) इत्यन्वयः। अस्याः शूर्पणखायाः, नयनयुग्मम् = लोचन युगलम्, नीलोत्पलाकृतिम् = नीलकमलवन्मनोहराकारम्, अपास्य = दूरीकृत्य, रथाङ्गरूपम् = रथाङ्गस्य = स्यन्दनावयवस्य रूपम् = विपुलाकारम्, आपद्यते = प्राप्नोति, अस्याः, इयम् = पुरोदृश्यमाना, तनुःच = शरीरश्च, आलूननासिकतया = आमूलम् लूना = उच्छिन्ना नासिका यस्याः सा आलूननासिका तस्याः भावः तया = आमूलोच्छिन्न नासिकतया, विवृतान्तमूलैः = विवृतः = बहिर्भूतः अन्तः = अग्रम् मूलञ्च येषाम् तथाभूतैः, दन्तैः = दशनैः (उपलक्षिता सती) सितैः = शुभ्रैः, मृणालैः = मतङ्कजेन विक्षिप्तैः कमलतन्तुभिः (उपलक्षिता) विमथिता = परिमृदिता, सरित् इव = जलाशय इव, दृश्यते इति शेषः। यथा विमधितो जलाशयो मतङ्गजेनेतस्ततो- विक्षिप्तैर्मृणालैरूपलक्षितो भवति तथैवेयमव्युच्छिन्न-नासिकतया दंष्ट्राभिरूपलक्षिता दृश्यते इति भावः।

वसन्ततिलकं वृत्तम् । उपमालङ्कारः ॥ ३९ ॥

मट्टेति ॥ 'भट्टा' अयं शब्दो रामस्य कृते 'नाटके नीचजनैरूत्तमो जनो भट्टा इति अभिधातव्यः' इति नियमात् शूर्पणखया प्रयुक्तः।

अथ रामः शूर्पणखाद्वारा दशमुखम्प्रति सन्दिशति - नयनविषये इति ॥ मम नयनविषये विलोभनम् मायासीताम् च विदर्श्य मम रूपम् धृतवता मिथ्यारूपम् लक्ष्मणम् च विधाय सद्यः त्वरितगतिना त्वया सीता न वञ्चिता (प्रस्युत) तव नियतविधवाचाराः दाराः एव वञ्चिताः इत्यन्वयः। मम नयनविषये = मम लोचन-गोचरे, विलोभनम् = मायामृगम्, मायासीताञ्च = शूर्पणखामाध्यमेन छद्मसीताम् विदर्श्य = प्रदर्श्य, ममरूपम् = रामरूपम्, धृतवता = स्वीकृतवता, मिथ्यारूपम् = असत्यस्वरूपम्, लक्ष्मणञ्च = सूतमाध्यमेन ममानुजञ्च, विधाय = कृत्वा, सद्यः = तत्क्षणमेव, स्वरितगतिना = शीघ्रगामिना, त्वया = रावणेन, सीता = मम भार्या जनकतनया, न वञ्चिता = अपहरणद्वारा न प्रतारिता, तु = प्रत्युस, नियतविधवा'चाराः = नियतः = अवश्यम्भावी, विधवानाम् = विनष्टपतीताम् आचारः = व्यदहारः येषाम् ते, तव = भवतः, दाराः = भार्याः, चिरम् = चिरकालं यावत् वञ्चिताः प्रतारिताः। अस्मद्वचनापूर्वकं कृतामिमां सीतावञ्चनामात्मवञ्चनापूर्वकं कृतां स्वभार्यावञ्चनामेव मन्यस्व इत्थं स्वया स्वभार्या पुत्रमित्रादिभिः सह आत्मापि वञ्चित इति ध्वन्यते । हरिणी वृत्तम् ॥ ४० ॥

अथ सौमित्रिरपि रावणम्प्रति सन्दिशन्नाह - अपि बन्धुषु इति। बन्धुषु अपि अर्थिता न वरम्, किमुत अरातिषु, अहम् ताम् दधामि, रावण ! युधि मे ! मुनये सबान्धवः मुहूर्तम् दर्शनम् देहि इत्यन्वयः। बन्धुषु = दायादेषु अपि, अर्थिता = याचना, न वरम् = नोत्कृष्टम् भवति, किमुत अरातिषु = किमुत शत्रुषु, शत्रुषु क्रियमाणा याचना तु अत्यन्तं निकृष्टा एवेति भावः, किन्तु इदानीम्, अहम् = लक्ष्मणः, ताम् = निकृष्टामप्यर्थिताम्, दधामि = सम्पादयामि, रावण ! = दशमुख !, युधि = संग्रामे, युद्धं निमित्तीकृत्येत्यर्थः, सबान्धवः = सपरिजनः, अर्थात् बन्धुजनसहितो भूत्वा, मे मुनये = मुनिवेषमाचरते लक्ष्मणाय, मुहूर्त्तम् = क्षणं यावत्, दर्शनं देहि = नयनगोचरो भव, मत्समक्षमागच्छेत्यर्थः। सुन्दरी वृत्तम् ॥ ४१ ॥

अथ रामो मायामृगलोभकृतं सीतापरित्याग- मनुस्मृत्य तज्जन्याऽकीर्तेर्दुष्परिहरत्वं मन्यमानो महान्तं सन्तापमुपगम्य सविषादमाह - कनकहरिण इति ॥ निशितधीः अपि रामः, कनकहरिणः क्व, इयम् भूमिः च क्व, इति अविचारयन् रामावचः प्रतिपन्नवान् इति कृतधियाम्, हास्यः आसम् (अहम्) कृतचिन्तयाकृतम्, अनर्थः कुतः प्रभवति, चेत् प्रज्ञा अपथोन्मुखी न (भवेदिति शेषः) इत्यन्वयः। निशितधीः अपि = निशिता = उचिताऽनुचितविचारपटीयसी धीः = बुद्धिः यस्य एतादृशोऽपि रामः, कनकहरिणः = स्वर्णमृगः, क्व= कुत्र, इयम्भूमिश्च = इयं

विपिनस्थली च, क = कुत्र, इति अविचारयन् = विचारमकुर्वन्, रामावचः = रामायाः = प्रियायाः वचः = मायामृगग्रहणाभ्यर्थनापरं वचनम्, प्रतिपन्नवान् = अनुरागचपलो भूत्वाऽङ्गीकृतवान्, इति = अस्माद्धेतोः, कृतधियाम् = कृता = शाखाभ्याससंस्कृता धीर्येषां तेषाम्, हास्यः = उपहासविषयः, आसम् = अभूवम्, अहमिति शेषः, कृतचिन्तया = कृतं कर्म उद्दिश्य अनुतापेन, कृतम् = अलम्, न खल्वत्र सन्तापो विधेयः। अनर्थः = अनिष्टप्राप्तिः, कुतः = कस्मात्, प्रभवति = सम्भवति, चेत् = यदि, प्रज्ञा = बुद्धिः, अपथोन्मुखी = विपथगामिनी न भवेदिति शेषः। बुद्धेर्वैपरीत्यमेव अनर्थकारणं नान्यदित्यर्थः। कनकमयमृगाणां हेमाद्रिकूटादौ दिव्यप्रदेशे एव सम्भवात् मायाविबहुलेऽस्मिन् प्रदेशे कुतः कनकमृग इति विचारयितव्ये मया अन्यथैव विचारितमित्येव विपरीतबुद्धिरिति रामाशयः। हरिणी वृत्तम् । अर्थान्तरन्यासालङ्कारः ॥ ४२ ॥

**इति आश्चर्यचूडामणे 'रमा' टीकायां तृतीयोऽङ्कः ॥**

------------------------------

## चतुर्थोऽङ्कः

(ततः प्रविशति रावणो रथेन सीतया सूतेन च)

**रावणः** - लक्ष्मण ! तूर्णं चोदयाश्वान्।

**त्यजतु भरतो भारं विश्वम्भराविषयं क्षणा-**

**न्मुदितमनसः पश्यन्त्यो नो भवन्तु च मातरः।**

**इयमपि पुरीमासाद्य स्वां निशाचरगोचरे**

**चिरमगवने जातं दुःखं जहातु तपस्विनी ॥ १ ॥**

**सीता** - अजउत्त ! मा मा एव्वं। तपोवणे एव्व रमदे मे बुद्धी। (आर्यपुत्र ! मा मैवम्। तपोवन एव रमते मे बुद्धिः।)

**सूतः** - (आत्मगतम्) शान्तमुदारं चास्याश्चेतः। न वञ्चनामर्हत्येषा |

**सीता –** (आत्मगतम्) किं णु खु एदं पिअं च सुणोमि हिअअं च - सन्तप्पदि। (किन्नु खल्विदं प्रियं च शृणोमि हृदयं च सन्तपति।)

**रावणः**- (कामावेशं निरूप्य) केन खलु विधिना मनुष्यस्त्रियमन्तरेण मन्मथापूर्विकां त्यजामि।

**सूतः**— (रावणं निरीक्ष्य आत्मगतम्) अहो नु खलु कामो निर्मर्यादः। ततः खलु,

**अपि नियमिनो दारान् साधूनधीरमवेक्षते**

**पुलकसुहृदा भूयो बाहुद्वयेन विजृम्भते।**

**श्वसिति मुहुरत्युष्णं दन्तच्छदेन इतत्विषा**

**किमपि किमपि व्याजेनायं ब्रवीति करोति च॥२ ॥**

**सीता** – (आत्मगतम्) किं णु खु अवरो विअ दीसइ आआरेण अज्जउत्तो। (किन्नु खल्वपर इव दृश्यते आकारेण आर्यपुत्रः।)

**रावणः** – (आत्मगतम्) भवत्वनया तावत् स्पर्शसुखमनुभवामि) अहो नु खलु बलवानसंस्तवः। तथा हि,

**अपि वासववारणस्य वक्त्रे**

**मदकल्माषितकर्णचामराग्रे।**

**अनिवारितविक्रमः करो मे**

**दयितां स्प्रष्टुमलं न तापसस्य ॥ ३ ॥**

**सीता** – (आत्मगतम्) किं गु खु रक्खसदसणादो सहस्सगुणो – विअ मे संदावो। (किं नु खलु राक्षसदर्शनात् सहस्रगुण इव मे सन्तापः।)

**रावणः**— (आत्मगतम्) भवत्वेवं तावत् करिष्ये। (प्रकाशम्) देवि !

**नियसाभिषेकजटिलं तपोवने**

**वनवल्लरीकुसुममात्रमण्डनम् ।**

**रचयामि देवि ! रथयानवेगतः**

**श्लथितं शिरोरुहनिबन्धनं तव ॥ ४ ॥**

**सीता** – (सलज्जम्) णं कुमारो आसण्णो। (ननु कुमार आसनः।) (इति स्वहस्तेन रावणहस्तं निवारयति)

**रावणः**– (स्वरूपमेव गृह्णाति)

**सीता** –(विलोक्य) हं, ण खु अज्जउत्तो। (हम्, न खल्वार्यपुत्रः।) (भयं नाटयति)

**रावणः**– देवि ! न भेतव्यं न भेतव्यम्। नन्वहं रामः।

**सीता** –संतोसि। (शान्तोऽसि।)

**रावणः**– लक्ष्मण ! किमिदम्।

**सुतः** – आयुष्मन् ! किं वाङ्मात्रेण।

**तरुणहरिणलक्ष्मह्लेपिदंष्ट्राकरालं**

**हिमगिरितटवर्ष्म स्निग्धजीमूतनीलम्।**

**प्रतिदिशमुपलक्ष्यैराननैर्भीमकान्तं**

**वपुरिह सहसा ते जायते जातिबन्धम् ॥ ५ ॥**

**रावणः**— (आत्मानं विलोक्य) कथमहमित्थं भूतोऽस्मि। देवि! न भेतव्यं न भेतव्यम्।

**नाहं बन्धुरगात्रि ! भीतिविषयस्ते किं मुधा खिद्यसे**

**त्रातुं त्वां ससुरासुरे त्रिभुवने के वा मनः कुर्वते।**

**मय्यस्मिन् परिपन्थिनि प्रकटितक्रोधान्धदिग्वारण-**

**स्थूलव्यायतदन्तकोटिकुलिशव्यालीढवक्षस्थले॥६ ॥**

**सीता** – अज्जउत्त ! परित्ताअहि परित्ताअहि, सोमित्ति ! परित्ताअहि परित्ताअहि मं। (आर्यपुत्र परित्रायस्व परित्रायस्व, सौमित्रे ! परित्रायस्व परित्रायस्व माम्।)

**सूतः** - किमनेन। स्वरूपमेव गृह्णामि। (तथा करोति)

**सीता**- हूं, अअं वि ण कुमारो। (मुक्तकण्ठं रोदिति) हा ! अज्जउत्त ! हा ! कुमार ! हा! मं रक्ख रक्खसहत्थादो। (हम्, अयमपि न कुमारः। हा ! आर्यपुत्र ! हा ! कुमार ! हा! मां रक्ष राक्षसहस्तात्।)

(नेपथ्ये) अयमयमागच्छामि |

**सूतः** - आयुष्मन् ! पश्य पश्य-

**तुण्डेनाङ्कुशसन्निभेन कनकस्तम्भश्रिया ग्रीवया**

**दृष्टया विद्रुमभङ्गपाटलरुचा गृध्रोऽयमाकामति।**

**संसर्गं सहसा व्रजन्ति विटपैरुद्वान्तपुष्पाकुरै-**

**राधूताः पथि यस्य पक्षपवनैरायामिनः पादपाः॥७॥**

**सीता** —हा ! का मे गई। किं मे सरणं। (हा |का मे गतिः। किं मे शरणम्।)

(नेपथ्ये)

**शरणमस्मि जटायुरहं सखा**

**दशरथस्य रथस्तव तिष्ठतु।**

**अविदुषामपराधमहं सहे**

**विसृज रावण |वीरमनुवताम् ॥ ८ ॥**

**रावणः** - (प्रहस्य) सहते किलायं ममापराधं पक्षी। सूत ! प्रतोदप्रहारेण रथमार्गादेनमुत्सारय। न जानात्येष परमार्थतो मां गृध्रः।

(नेपथ्ये) जानामि जानामि।

**कैलाससानुमति खण्डितमानश्रृङ्गं**

**कारागृहे नियमितं चिरमर्जुनेन।**

**त्वां वालिवाललयाङ्किकतबद्धवाहुं**

**जानामि राक्षस ! जगत्त्रयधूमकेतुम् ॥ ९ ॥**

**रावणः**– हहह ! आः अतिवाचालोऽयं विहङ्गः।

**तिष्ठ त्वमत्र मम पश्यतु कर्म सीता**

**शस्त्रेण मे समरमूर्धनि दर्पणेन |**

**अद्रिं महेन्द्र इव पक्षिणमम्बरस्थं**

**पक्षौ विलय सहसा भुवि पातयामि ॥ १० ॥**

(प्रविश्य)

**जटायुः**– भवतु, पश्यामस्तावत्।

**वक्त्राण्येतानि तेऽद्य प्रलयघनरुचः पिङ्गकेशानि रोषात्**

**शृङ्गाणीवाञ्जनाद्रेः दवदहनशिखादीपितानीव रात्रौ।**

**उत्कृत्योत्कृत्य चञ्च्वा झटझटिति गलत्सान्द्र रक्तारुणानि**

**प्रत्यक्षं क्षत्रियाया दश दशसु दशग्रीव ! दिक्षु क्षिपामि ॥११॥**

**सूतः** – अयमयमाधावति।

**रावणः** – आः तिष्ठेदानीम्।

(उभौ युद्धं कुरुतः)

**रावणः**– एष प्रहरामि। (प्रहरति)

**सीता**— हद्धि, हद्धि। ( हा ! धिक्, हा ! धिक् !) (नेत्रे निमीलयति)

**सूतः** – इन्स ! प्रहतोऽयं गृधः। अयमयम्,

**क्षतजजन्मकणोक्षितविग्रहः**

**श्रमनिरुद्धविभुग्नशिरोधरः।**

**दिनविरामपयोधरपाटलः**

**पतति पत्त्ररथो मरुतां पथः ॥ १२ ॥**

**सीता**– अहो ! अकरुणा खु इस्सरा। अघण्णाए मम किदे अअं वि विहंगो सोअणीओ संवृत्तो। (अहो ! अकरुणाः खल्वीश्वराः। अधन्याया मम कृते अयमपि विहङ्गः शोचनीयः संवृत्तः।) (रोदिति)

**रावणः**– सूत ! तूर्णं चोदयाश्वान् !

**सूतः** – यदाज्ञापयत्यायुष्मान् |(विचिन्त्यात्मगतम्) एष खलु,

**अनुकूलमर्थ्यमविरोधि हितं**

**श्रवणीयमागमरहस्ययुतम् !**

**वचनं मदीयमपकर्णयति**

**क्व मनोभवः क्व गुणसंग्रहणम् ॥ १३ ॥**

(निष्कान्ताः सर्वे)

**इति शक्तिभद्रविरचिते चूडामणिनाटके चतुर्थोऽङ्कः।**

**---**

## व्याख्यानम्

विद्या ज्ञानं तपश्चापि यस्मिन् खेलन्ति लीलया।

मम भक्तिनतञ्चेतस्तस्मिन् रामेश्वरे गुरौ ॥

अथ तृतीयाङ्कादवशिष्टं प्रतिनायकेवृत्त- मस्मिन्नोङ्केऽभिधीयते। अत एव विष्कम्भकादि- कमनादृत्य अङ्क एवारभ्यते।

अथ दशमुखः समुद्भूतमदनचापलः सन् सीतासमागमाऽऽकृष्टहृदयतया लङ्काप्रवेशम्प्रति महतीं स्वरामवलम्ब्य सूतं वेगेन तुरगान् प्रेरयितुं नियुङ्क्ते लक्ष्मण ! इति। जानकीविश्वासार्थञ्च स्वरितगमने मिथ्याभूतानि कारणान्तराणि कथयति – त्यजतु इति।। भरतः क्षणात् विश्वम्भराविषयम् भारम् त्यजतु, (अस्म- दर्शनात्) नः पश्यन्त्यः मातरः मुदितमनसः भवन्तु, इयम् अपि तपस्विनी स्वाम् पुरीम् आसाद्य निशाचरगोचरे अगवने चिरम् जातम् दुःखम् जहातु इत्यन्वयः। भरतः = मध्यमाम्बासुतः, क्षणात् = क्षणकालसिद्धेन अस्मत्पुरप्रवेशेन, विश्वम्भरा = विषयम् = विश्वम् = स्थावरजङ्गमात्मकं भाव जातम् विभर्तीति विश्वम्भरा = दुर्वहा पृथ्वी सा एव विषयः = कर्म यस्य स विश्वम्भराविषयः तम्, भारम् = भरणम्, त्यजतु = त्यागं करोतु, वसुधाभरणक्लेशादुन्मुक्तो भवत्वित्यर्थः, नः = अस्मान्, पश्यन्त्यः = अवलोकयन्त्यः, मातरः = कौशल्याप्रभृतिजनन्यः, मुदितमनसः = प्रसन्नहृदयाः, भवन्तु, इयम् = सीता, तपस्विनी = तपोधना, अपि, निशाचरगोचरे = राक्षसास्पदे, अगवने = पर्वतसङ्कुले विपिने, अथवा अगाः च वनानि चेति अगवनम् तस्मिन्, चिरम् = चिरकालवासेन, जातम् = समुत्पन्नम्, दुःखम् = क्लेशम् जहातु = परित्यजतु | स्वर्णपुर्य्यम्मया सह रममाणाया अस्यास्त्रैलोक्यसुन्दर्य्याश्चिरकालनिवासजन्यं काननक्लेशं दूरं यास्यतीति भावः | हरिणी वृत्तम् ॥ १ ॥

शान्तमुदारमिति || अस्याः = सीतायाः, चेतः = अन्तःकरणम्, शान्तम् = सत्यगुणोपेतम्, उदारम् = निरुपाधिकसन्तोषयुतम्, वञ्चनाम् = छलनाम्, इमाम्प्रति मत्स्वामिकृता वञ्चना न परिणामरमणीया इति सूतस्याशयः।

अथ दशग्रीवापहृता रामवियुक्ता सीता आसन्नाम्विपदं सूचयता विधिना समुत्पादितं हृदयसन्तापमालक्ष्य विचिन्तयति - किन्विति| प्रियवचनश्रवणहृदयसन्तापयोः परस्परं विरुद्धत्वात् शङ्कालेशप्रसङ्गो जातः।

कामावेशमिति ॥ कामावेशम् = मदनावेगम्, निरूप्य = अभिनीय, मनुष्यस्त्रियमन्तरेण = मानुषभार्या विषयीकृत्य, मन्मथापूर्विकाम् = मदनस्य अपूर्वा वृत्तिम्, उत्कण्ठामिति यावत्, त्यजामि = उपशमयामि। मानवभार्यामुद्दिश्य समुत्पन्नाम्भदनोत्कण्ठां कथमुपशमया- मीति भावः। अत्र चापलसंज्ञको धीरोद्धतगुण उपन्यस्तः।

अथ सूतो रावणगतस्य कामस्य मर्यादाराहित्यमुपपादयति - अपीति ॥

अयम् नियमिनः साधून दारान् अधीरम् अवेक्षते, पुलकसुहृदा भूयः बाहुद्वयेन विजृम्भते, हतत्विषा दन्तच्छदेन (सहितः) मुहुर्मुहुः अत्युष्णम् श्वसिति, व्याजेन किमपि किमपि ब्रवीति (यकिञ्चित) करोति च इत्यन्वयः॥ अयम् = मदन विह्वलो दशमुखः, नियमिनः = व्रतिनो रामस्य, साधून् दारान् = प्रतिव्रतां स्त्रियम्। अधीरम् = धैर्यरहितम्, यथास्यात्तथा अवेक्षते = निरीक्षते, अवेक्षणकाले पुलकसुहृदा = पुलकश्चासौ सुहृच्चेति पुलकसुहृत्तेन पुलको रोमाञ्चः सीतादर्शनानन्दजनित- रोमाञ्चेनोपलक्षित इत्यर्थः, भूयः बाहुद्वयेन = प्रसारितभुजद्वयेन, विजृम्भते = वर्धते, हतत्विषा = हता = नष्टा त्विट् = कान्तिः यस्य तेन, दन्तच्छदेन = अधरेण सहितः, मुहुः = वारम्बारम्, अत्युष्णम् = अत्युष्णं यथास्यात्तथा, श्वसिति = श्वासं गृह्णाति, व्याजेन = छलेन, किमपि किमपि ब्रवीति = अस्पष्टाक्षरं वक्ति, (यत्किञ्चित्) करोति, अस्य वचने कर्मणि च स्पष्टता नास्तीत्यर्थः । चपलानां कामिजनानामेष एव व्यवहारः परिलक्ष्यते। हरिणी वृत्तम् ॥ २ ॥

अथ रावणः सीतास्पर्शनव्यग्रोऽपि तस्याः पातिव्रत्यप्रभावसञ्जातेन भयेन स्तब्धव्यापारो भूत्वा सनिर्वेदमाह - अहो न इति ॥ असंस्तवः = अपरिचयः। अन्यन्त्र प्रकटितपराक्रमस्यापि करस्य सीतास्पर्शनेऽ- सामर्थ्य दर्शयति - अपि बासःवेति ॥ वासववारणस्य मदकल्माषितकर्णचामराग्रे वक्त्रे अपि अनिवारितविक्रमः मे करः तापसस्य दयिताम् स्प्रष्टुम् न अलम् इत्यन्वयः। वासववारणस्य = देवराजगजस्य ऐरावतस्य, मदकल्माषितकर्णचामराग्रे = मदजलेन कल्माषितम् = शवलीकृतम् कलुषितमित्यर्थः कर्णाग्रम् = श्रवणाग्रम् चामराग्रम् = शुण्डाग्रञ्च यस्मिन् तत् तथोक्ते वक्त्रे = मुखे, अपि, अनिवारितविक्रमः = अप्रतिहतपराक्रमः, मे करः = मम हस्तः, तापसस्य = तापसवेषधारिणो रामस्य, दयिताम् = भार्याम्, स्प्रष्टुम् = स्पर्शं कर्तुम्, न अलम् = न शक्तो भवति। यतोहि सुरेन्द्रगजमुखे प्रदर्शित शक्तिर्मे- हस्तः साधारणमुनिभार्यायाः स्पर्शकर्मणि न समर्थोऽतोऽपरिचयो बलीयानिति भावः। कालभारिणी वृत्तम् ॥ ३ ॥

अथ दशग्रीवः सीतायाः स्पर्शनम्प्रत्यानुकूल्यं सम्पादयितुमाह - नियमामिवेकेति" देवि! तपोवने नियमाभिषेकजटिलम्, वनवल्लरीकुसुममात्रमण्डनम् रथयानवेगतः श्लथितम् तव शिरोरुह निबन्धनम् रचयामि इत्यन्वयः। देवि ! = भगवति ! तपोवने = तपःकानने, नियमाभिषेकजटिलम् = नियमः = श्रुतिस्मृतिविहितं कर्म तदर्थेन अभिषेकेन = स्नानेन, जटिलम् = जटीभूतम् वनवल्लरीकुसुममात्रमण्डनम् = वनवल्लरी = काननलता तस्याः कुसुमानि = पुष्पाणि एव मण्डनम् = आभूषणं यस्य तत्, काननलतापुष्पमात्राभूषणमित्यर्थः, रथयानवेगतः = स्यन्दनगमनवेगात्, श्लथितम् = शिथिलीकृतम् व्यस्तमित्यर्थः, तव = भवस्याः, शिरोरुहनिबन्धनम् = केशकलापम्, रचयामि = अङ्गुलिभिः प्रसार्य संयमयामि। मञ्जुभाषिणी वृत्तम् ॥ ४ ॥

अथ सूतो रावणस्य राक्षसाऽऽकारत्वं सूचयति - तरुणहरिणेति ॥ तरुणहरिण लक्ष्महेपिदंष्ट्राकरालम् हिमगिरितटवर्ष्म स्निग्धजीमूतनीलम् प्रतिदिशम् उपलक्ष्यः आननैः भीमकान्तम् ते वपुः इह सहसा जातिबन्धम् जायते इत्यन्वयः| तरुणहरिणलक्ष्महृरेपिदंष्ट्राकरालम् = तरुणहरिणः = बालमृगः लक्ष्म = चिह्नम् यस्य तं हृरेपयन्तीभिः = लज्जाम् आवहन्तीभिः

दंष्ट्राभिः = दशनैः करालम् = क्रूरदर्शनम्, हिममिरितटवर्ष्म = हिमगिरितटवत् = हिमालयपर्वतभागवत् वर्ष्म = स्थूलता यस्य तत् स्निग्धजीमूतनीलम् = स्निग्धः = मसृणः जीमूतः = मेघः तद्वत् नीलम् = कृष्णवर्णम्, प्रतिदिशम् = दिशं दिशं प्रति प्रतिदिशम, सर्वासु दिक्षु, उपलक्ष्यैः = प्रतीयमानैः, आननैः = मुखैः (सहितम्) भीमकान्तम् = भीमा = भयदा कान्तिः आकृतिः यस्य तत्, अथवा भीमञ्च एतत् कान्तञ्च मनोज्ञञ्च इति भीमकान्तम्, ते = भवतः, वपुः = शरीरम् इह = अत्र, सहसा = हठात् कारणं विनैवेति यावत्, जातिबन्धम् = राक्षसत्वजातिसम्बद्धम् प्रकटितराक्षसाकारं जायते। कपटरामरूपं विहाय तव स्वाभाविकं निशाचररूपं प्रकटीभवतीति भावः। अत्र वपुषो भीमकान्तविशेषणगतः कान्त शब्दो भूतपूर्वरामरूपेण रावणस्य सौम्यदर्शनत्वम्, भीमशब्दश्च रावणरूपेण तस्य क्रूरदर्शनत्वं प्रतिपादयति। मालिनी वृत्तम् ॥ ५ ॥ ॥

इत्थम्भूतोऽस्मि - राक्षसरूपेण परिणतोऽस्मि।

अथ दशग्रीवः सीताम्प्रति स्वभयकारणत्वमपहरति - नाहमिति ॥ बन्धुरगात्रि ! अहम् ते भीतिविषयः न, मुधा किं खिद्यसे, अथवा किं खिद्यसे, यदि खिद्यसे तर्हि मुधा खिद्यसे इति वाक्यद्वयम् योजनीयम्, प्रकटित- क्रोधान्धदिग्वारणस्थूलव्यायतदन्तकोटिकुलिशव्यालीढवक्षः- स्थले मयि परिपन्थिनि (वर्त्तमाने सति) ससुरासुरे अस्मिन् त्रिभुवने त्वाम् त्रातुम् के वा मनः कुर्वते इत्यन्वयः। बन्धुरगात्रि ! = बन्धुरम् = सुन्दरम् गात्रम् = शरीरम् यस्याः तत्सम्बोधने, शोभनशरीरे इत्यर्थः' अहम् = रावणः, ते = तव, भीतिविषयः न = भयदो न, किम् = केन हेतुना, खिद्यसे दुःखमनुभवसि, यदि खिद्यसे तर्हि मुधा = व्यर्थमेव खिद्यसे नास्तिकिमपि तव खेदकारणमित्यर्थः, प्रकटितक्रोधान्धदिग्वारण- स्थूलव्यायतदन्तकोटिकुलिशव्यालीढवक्षःस्थले = प्रकटिनेन = प्रकाशितेन क्रोधेन = रोषेण, अन्धानाम् = दिग्वारणानाम् = दिग्गजानाम् स्थूलैः = पृथुलैः, व्यायतैः = विस्तृतैश्च दन्तकोटिभिः = दशनाग्रैः कुलिशैः इव = वज्रैः इव व्यालीढम् = लक्षीकृतम् वक्षःस्थलम् = उरो यस्य तस्मिन्, मयि = रावणे, परिपन्थिनि = विरोधिनि वर्त्तमाने सति, ससुरा सुरे = देवदैत्यसहिते, त्रिभुवने = त्रैलोक्ये, वा, के, स्वाम् = मद्वशमुपगतां भवतीम्, त्रातुम् = रक्षितुम् मनः = चेतः, कुर्वते = कुर्वन्ति। पराक्रमशालिनि मयिवर्त्तमाने मदङ्कान्न कोऽपि त्वां रक्षितुं समर्थ इति भावः। शार्दूलविक्रीडितं वृत्तम्। लुप्तोपमा काव्यलिङ्गाऽलङ्कारयोः संसृष्टिः ॥ ६ ॥

अथ सूतो लक्ष्मणरूपमपास्य आयान्तं गृध्रराजं दृष्ट्वा रावणाय तदाक्रमणप्रकारं निवेदयति - तुण्डेनेति ॥ अयम् गृध्रः अङ्कुशसन्निभेन तुण्डेन (सहितः) कनकस्तम्भश्रिया ग्रीवया (सहितः) विद्रुमभङ्गपाटलरुचा दृष्ट्या (सहितः) आक्रामति। पथि यस्य पक्षपवनैः आधूताः (अत एव) उद्वान्तपुष्पाङ्कुरैः विटपः (सहिताः) आयामिनः पादपाः सहसा संसर्ग व्रजन्ति इस्यन्वयः। अयं गृध्रः = अस्मदभिमुखमागच्छन् जटायुः, अङ्कुशसन्निभेन = सृणितुल्येन, तुण्डेन = मुखेन चञ्च्वेत्यर्थः (सहितः) कनकस्तम्भश्रिया = कनकस्य = हेम्नः यः स्तम्भः = खग्भः तस्य श्रीरिव श्रीः = शोभा यस्याः तया, ग्रीवया = कन्धरया, (सहितः) विद्रुमभङ्गपाटलरुचा = प्रदालखण्डरक्तशोभया, दृष्टया = नेत्रेण रोषारुणलोचने- नेत्यर्थः (सहितः) आक्रामति = आक्रमणं करोति, पथि = मार्गे, यस्य = गृध्रस्य, पक्षपवनैः = पतत्रवातः, आधूताः = आकम्पिताः (अत एव) उद्वान्त पुष्पाङ्कुरेः= उद्गतकुसुमाङ्कुरैः, विटपैः = शाखाभिः (सहिताः) आयामिनः = लम्बमानाः, पादपाः = वृक्षाः, सहसा = अकस्मात्, संसर्गम् = सम्बन्धम् सान्निध्यमिति यादत्, व्रजन्ति = गच्छन्ति, पादपाः परस्परमेकी भवन्तीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। उपमाऽलङ्कारः ॥ ७ ॥

अथ जटायुः "किम्मेशरण" मिति सीताविलापं श्रुत्वा तां समाश्वासयति शरणमिति। दशरथस्य सखा अहम् जटायुः तव शरणम् अस्मि, रावण ! तव रथः तिष्ठतु, अहम् अविदुषाम् अपराधम्, सहे, वीरम् अनुव्रताम् विसृज इत्यन्वयः | दशरथस्य = अयोध्यानाथस्य, सखा = मित्रम्, अहं जटायुः = जटायुनामा गृधः, रक्षितास्मि, इत्थं जनकतनयां समाश्वास्य दशमुखं निवारयति - स्थ इत्यादिना। रावण ! तव = भवतः, रथः = स्यन्दनः, तिष्ठतु = अग्रे मा गच्छतु, तस्करवृत्तिमाश्रित्य रामस्य धर्मपत्नीम्मानैषीरित्यर्थः, अहम् = जटायुः, अविदुषाम् = त्वादृशा नाम् अज्ञानाम्, अपराधम् = दोषम्, सहे = मर्षयामि, (किन्तु) वीरम् = जगदेकपराक्रमिणं पुरुषोत्तमं रामम्, अनुव्रताम् = सर्वात्मनाऽनुगताम्, सीताम्, विसृज= परित्यज। यतः स्वभावसिद्धा अज्ञानास्वादृशा अतोऽहं युष्माकमेकमपराधं चन्तुं शक्तः त्रिभुवनैकवीरो रामस्तु तवाऽपराधसहने सर्वथाऽसमर्थोऽतस्तदागमनात्प्रागेव जनकसुतां विसृज्य अपयाहीति भावः। द्रुतविलम्बितवृत्तम् ॥८॥

प्रतोदप्रहारेण ॥ प्रतोदः = कशा, तेन कृतः प्रहारः इति प्रतोदप्रहारः तेन कशाभिघातेनेत्यर्थः।

अथ जटायू रावण विषयज्ञानप्रकारान् तदसामर्थ्य प्रदर्शनद्वारेण दर्शयति कैलासेति || राक्षस ! कैलाससानुमति खण्डितमानशृङ्गम्, कारागृहे अर्जुनेन चिरम् नियमितम्, वालिवालवलयाङ्कितबद्धबाहुम् जगवत्त्रयधूमकेतुम् त्वाम् जानामि अहमिति शेषः इत्यन्वयः। राक्षस ! = निशाचर !, कैलाससानुमति = एतन्नामके पर्वते, खण्डितमानश्रृङ्कम् = मानं च शृङ्गम् च इति मानश्रृङ्के, खण्डिते मान यस्य तम् = तिरस्कृत- सम्मानप्रभुत्वम्, अत्र शृङ्गशब्दः प्रभुत्व वाचकः, "क्रीडाम्बुयन्त्रे पर्वताग्रप्रभुत्वयोः" इति वैजयन्ती। तथाविधं त्वां जानामीति सर्वत्र योग्यम्। कारागृहे = बन्धनालये, अर्जुनेन = कार्त्तवीर्येण चिरम् = चिरकालं यावत्, नियमितम् = संयमितम्, निबद्धमित्यर्थः, वालिवाल- वलयाङ्किकबद्धबाहुम् = वालिनः = सुग्रीवाग्रजस्य कपिराजस्य वलयाकारः वालः = केशः तेन कृतम् अतिम् = वलयाकारम् किणरूपं चिह्नम् इति वालि- वालवल्याङ्कितम् तेन बद्धाः = युद्धाः बाहवः = भुजाः यस्य तथाभूतम् जगत्त्रयधूमकेतुम् = जगत्त्रयस्य = त्रिभुवनस्य धूमकेतुः = नाशसूचको दुष्टग्रहः तथाभूतम् त्रिभुवनविनाशसूचकग्रहविशेषमित्यर्थः, त्वाम् = रावणम्, जानामि = विशेषतोऽवगच्छामि। पूर्वोकोदाहरणेन तव पराक्रमो मया सम्यग्विदित इति भावः। वसन्ततिलकं वृत्तम् । रूपकालङ्कारः ॥ ९ ॥

अथ रावणः पक्षिराजोपालम्भवचनमाकर्ण्य पूर्वमाज्ञापितात् कशाभिघातात् सूतं निवारयन्नाह - तिष्ठ त्वमिति। (सूत) स्वम् अत्र तिष्ठ, सीता मे कर्म पश्यतु, अहम् समरमूर्धनि दर्पणेन शस्त्रेण अद्रिम् महेन्द्र इव अम्बरस्थम् पक्षिणम् पक्षौ विलूय सहसा भुवि पातयामि इत्यन्वयः। (सूत !) त्वम्, अत्र = कशाघातकर्मणि, तिष्ठ = विरम, अस्योपरि कशाघातम्मा कुरु इत्यर्थः, सीता = जानकी, मे = रावणस्य, कर्म = पराक्रमम् पश्यतु = साक्षादवलोकयतु, अहम् समरमूर्धनि = संग्रामे, दर्पणेन-गर्वितेन, शस्त्रेण = आयुधेन, अद्रिम् = पर्वतम् महेन्द्र इव = इन्द्र इव, अम्बरस्थम् = आकाशवर्तिनम्, पक्षिणम् = जटायुम्, पक्षौ = पतत्रे, विलय = छित्वा, सहसा = अकस्मात्, भुवि = पृथिव्याम्, पातयामि = अधःकरोमि। यथा देवराजः पक्ष्मवन्तम् आकाशवर्तिनम् गिरिम् स्ववज्रेण पक्षौ छित्वा पृथिव्यामपातयत् तथाऽहमपि नभसि विद्यमानमेनं पक्षिणं समराङ्गणे शस्त्रेण पक्षौ विलय धरायां पातयामीति भावः। वसन्ततिलकं वृत्तम्। पूर्णोपमाऽलङ्कारः ॥१०॥

अथ जटायुरपि वीरधर्ममाश्रित्य स्वपराक्रमं प्रकटयति = वक्त्राणीति ॥ दशग्रीव ! (अहम्) क्षत्रियायाः प्रत्यक्षम् ते पिङ्गकेशानि एतानि प्रलयधनरुचः अञ्जनाद्रेः रात्रौ

दवदहनशिखादीपितानि शृङ्गाणि इव गलरसान्द्ररत्कारुणानि दशवक्त्राणि रोषात् चन्च्वा झटझटिति उत्कृत्योत्कृत्य दशसु दिक्षु क्षिपामि इत्यग्वयः| दशग्रीव ! = दशकन्धर, (अहम्) अद्य = साम्प्रतम्, क्षत्रियायाः = क्षत्रियकुलोत्पन्नायाः सीतायाः, प्रत्यक्षम् = समक्षम्, ते = तव, पिङ्गकेशानि = पिङ्गलवर्णकचानि, एतानि, प्रलयघनरुचः = प्रलयकालिकमेघकान्तेः, अञ्जनाद्रेः = नीलपर्वतस्य, सत्रौ = निशायाम् दवदहनशिखादीपितानि = दवदहनस्य = दावाग्नेः शिखाभिः = ज्वालाभिः, दीपितानि = प्रज्वलितानि प्रकाशितानीति यावत्, शृङ्गाणि = शिखराणि इव, गलत्सान्द्ररक्तारुणानि = गलत् = क्षरत् सान्द्रम् = घनीभूतम्, रक्तम् = शोणितम् तेन अरुणानि = रक्तवर्णानि दशवक्त्राणि = दशसंख्यक मुखानि, चञ्च्वा = मुखाग्रेण, झटझटिति = यथाशीघ्रम्, उत्कृत्योत्कृत्य = मुहुर्मुहुः कर्तयित्वा लोके (र्नोच - र्नोच कर) दशसु = दशसंख्यकासु, दिक्षु = दिशासु, क्षिपामि = इतस्ततः विकीर्य प्रसारयामि। स्रग्धरावृत्तम्। उपमालङ्कारः ॥ ११॥

अथ सूतो रावणचन्द्रहास प्रहतस्याकाशात् पतनप्रकारं वर्णयति – क्षतज जन्मेति ॥ क्षतजजन्म कणोक्षितविग्रहः श्रमनिरुद्ध विभुग्नशिरोधरः दिनविरामपयो धरपाटलः (अयम्) पत्ररथः मरुताम् पथः पतति इत्यन्वयः। क्षतजजन्मकणोक्षित विग्रहः = क्षतजात् = रुधिरात् जन्म = उत्पत्तिः येषाम् तथाभूतैः कणैः उचितः व्याप्तः लिप्तो वा विग्रहः = शरीरं यस्य एतादृशः, श्रमनिरुद्धविभुग्न शिरोधरः = श्रमेण = अतिप्रयासेन, निरुद्धा विभुग्ना = विनम्रा शिशेघरा = ग्रीवा यस्य तथोक्तः, शोणितलिप्तत्वात् दिनविरामपयोधरपाटलः = सायन्तनधनवद्रक्ता एवम्भूतोऽयम् पत्ररथः = पक्षी, मरुताम् पथः = नभोमार्गात् आकाशादिति यावत् पतति = अध आगच्छति। द्रुतविलम्बित वृत्तम्। लुप्तोपमालङ्कारः ॥ १२ ॥

अथ सूतो विहगराजवधसञ्जातानन्दस्यापि स्वामिनः सीताहरणवैफल्यं मन्यमानो राक्षसकुलोच्छेदहेतुत्वं निश्चित्य आत्मन्याह – अनुकूलमिति ॥ (एष रावणः) अनुकूलम्, अर्थ्यम्, अविरोधि, हितम्, श्रवणीयम्, आगमरहस्ययुतम्, मदीयम्, वचनम्, अपकर्णयति, मनोभवः क्व, गुणसंग्रहणम् क्व, : इत्यन्वयः। एष रावणः, अनुकूलम् = ऐहिकफलानुगुणम्, अर्थ्यम् = अर्थात् = अनपेतम् सार्थमिति यावत् अविरोधि = धर्मार्थकामानाम् अनुपधातकम्, हितम् = परलोकाविरुद्धम् (अत एव) श्रवणीयम् = श्रोतुं योग्यम् आगमरहस्ययुतम् = आगमः, अर्थशास्त्रम् तद्रहस्यम् = तत्प्रतिपाद्योऽर्थः तेन युतम् = सहितम्, युतम् मदीयम् मत्सम्बन्धि, वचनम् = वचः, अपकर्णयति = अश्रुतं करोति। नाद्रियते इत्यर्थः, एवम्भूतलाभप्रदवचनस्यानादरे कारणमाह – क्व मनोभव इति। मनोभवः = कामदेवः, क्क = कुत्र, गुणसंग्रहणम् = गुणानाम् = दयादाक्षिण्यादीनाम् संग्रहणम् = सम्यग्ग्रहणम्, क्क = कुत्र, उभयोः सामानाधिकरण्याभावोऽत्र दर्शितः। यतो ह्ययं मदनपरवशो भूत्वा गुणदोषौ न विचारयत्यतोऽत्र किमप्युपदेशवचो व्यर्थमेवेति भावः। प्रमितापरावृत्तम्| विषमालङ्कारः ॥ १३ ॥

अस्मिन् कविना शृङ्गाररसाभासः रौद्ररसश्च रावणगतः, रौद्ररसकार्यो भयानकः सीतागतः दर्शितः। अत्र प्रकरीसंज्ञकमितिवृत्तमुपन्यस्तम्।

**इति आश्चर्यचूडामणे 'रमा' टीकायां चतुर्थोङ्कः ।**

-----------------------------

## पञ्चमोऽङ्कः

(ततः प्रविशति मण्डोदरी चेटी च)

**मण्डोदरी** - किं णु खु एदं वि भविस्सदि। (किं नु खल्वेतदपि भविष्यति।)

**चेटी -** अणुदाबोग्गारं बिअ भट्टिणीए वअणं। (अनुतापोद्गार इव भट्टिन्या वदनम्।)

**मण्डोदरी-** हजे ! णं तुए असोअवणिआ पविट्टपुष्वा। (इज्जे ! ननु त्वया अशोकवनिका प्रविष्टपूर्वा।)

**चेटी—** णं तहिं भट्टिणो वन्दी तापसपदिणी। किं तिस्से। (ननु तत्र भर्तुर्बन्दी तापसपत्नी। किं तस्याः।)

**मण्डोदरी** - तं णिमित्तं णो विणासं पेक्खामि। (तन्निमित्तं नो विनाशं प्रेक्षे।)

चेटी— भट्टणि ! ण कदाइ सद्दूलं मिईणं विस्संभो आसी। जह आअदा तह गमिस्सदि। णं भट्टिणी एव्व लङ्केसरी। (भट्टिनि ! न कदापि शार्दूले मृगीणां विस्रम्भ आसीत् ! यथागता तथा गमिष्यति। ननु भट्टिन्येव लङ्केश्वरी।)

**मण्डोदरी –** उम्मत्तिएव्व तुमं परिइदा वि भावं मे णाबवुज्झसि। मए असोहणं दाणिं सिविणओ दिट्ठो। (उन्मत्तेव त्वं परिचितापि मे भावं नावबुध्यसे। मयाशोभनमिदानीं स्वप्नो दृष्टः।)

**चेटी—** संति होदु, संति होदु। भणादु भट्टिणी। (शान्तिर्भवतु, शान्तिर्भवतु। भणतु भट्टिनी।)

**मण्डोदरी —** हब्जे ! सुणाहि दाव। (हज्जे ! श्रृणु तावत्।)

**चेटी** - अवहिदंम्हि । (अवहितास्मि।)

**मण्डोदरी—** आसामुहविअअविष्फुरिअवीईसहस्सो मरअदगिरिणिअरणीलो उब्भंदतिमितिमिङ्गलमाअङ्गमअरो मअराअरो इदो तदो आप दिदेहिं तिणजादीहिं णिवीदसारो मुहुत्तएण रित्तओ संवुत्तो| **(**आशामुखवि- ततविस्फुरितवीचीसहस्रो मरकतगिरिनिकरनीलः उद्भ्रान्ततिमितिमिङ्गलमातङ्गमकरो मकराकर इतस्तत आपतितैः तृणजातिभिः निपीतसारो मुहूर्तेन रिक्तः संवृत्तः।)

**चेटी-** हद्धि, तदो तदो। (हा ! धिक्, ततस्ततः।)

**मण्डोदरी —** अहं वि दाव पंसुपरुस केस कलापाए विरलदसणविकिद बदणाए विष्फुलिङ्गणअणाए सुण्णकण्णाए कपालवण्णाए अमंगलाए कआ वि इत्थिआए गाढं परिस्सत्तंम्हि। (अहमपि तावत् पांसुरुषकेशकलापया विरलदशनविकृतवदनया विस्फुलिङ्गनयनया शून्यकर्णया कपालवर्णया अमङ्गलया कयापि स्त्रिया गाढं परिध्वक्तास्मि।)

**चेटी-** हद्धि, तदो तदो। (हा ! धिक्, ततस्ततः।)

मण्डोदरी - सा वि सीदा पण्डुरदुऊलपरिघाणा मलअजरसपरिसो हिअपओहरा मल्लिआकुसुमबड्ढिढ अर्धाम्मिल्ला पदिणा दिण्णहत्था फ आलुहंती अ मए दिट्ठा। तदो अपरिइदवेलाएमम णिद्दा वि संबुत्ता। (सापि सीता पाण्डुरदुकूलपरिधाना मलयजरसपरिशोभितपयोधरा मल्लिकाकुसुमवर्धितधम्मिल्ला पत्या दत्तहस्ता पुष्पकमारोहन्ती च मया दृष्टा ! ततः अपरिचितवेलायां मम निद्रापि संवृत्ता।)

**चेटी–** भट्टिणि ! मा मा अणुसएण। सिविणाणं बहूणि कारणाणि बजा उपदिसंति। अहवा कुदो दाणि भअं भअमूलाणं तेलोक्कस्स अम्हा णम्। (भट्टिन | मा मानुशयेन | स्वप्नानां बहूनि कारणानि वैद्या उपदिशन्ति। अथवा कुत इदानीं भयं भयमूलानां त्रैलोक्यस्य अस्माकम्।)

(नेपथ्ये)

**गन्धापार्द्रदलां सृजन्तु परितो वृष्टि घनाः कौसुमी**

**माधूतामरसिन्धुवीचिवलयः स्वर्गानिलो जृम्भताम्।**

**उद्यानश्रियमुद्वहन्तु समयाः सर्वे वसन्तादयः**

**स्वान् पादान् सुखमानमय्य ककुभां पर्येतु चक्रं शशी ॥१॥**

**मण्डोदरी–** हं, धोसणा विअ। (हम्, घोषणेव।)

**चेटी–** भट्टिणि ! आम्। (भट्टिनि ! आम्।)

**मण्डोदरी–** हञ्जे ! इमस्स मूलं दाव जाणीहि। (हञ्जे ! अस्य मूलं तावत् जानीहि।)

**चेटी–** भट्टिणि ! तह |(निष्कान्ता) (भट्टिनि ! तथा।)

**मण्डोदरी** – किं एत्थ विआरिदव्वं तिस्से भूमिगोअरीए चित्तविलो हणणिमित्तो खु महाराअस्स अअं आरंभो। (किमत्र विचारयितव्यं तस्याः भूमिगोचरायाः चित्तविलोभननिमित्तः खलु महाराजस्यायमारम्भः।)

(प्रविश्य)

**चेटी–** जेदु भट्टिणी। (जयतु महिनी।) [कर्णे] एडवं विअ |(एवमिव।)

**मण्डोदरी** – तव आआसमेत्तं किदं। दाणिं किं करोदि महाराओ। (तव आयासमात्रं कृतम्। इदानीं किं करोति महाराजः।)

**चेटी–** तिस्से दंसणणिमित्तं पादोसिअं दाणि वेसं अणुचिट्ठदि भट्टा। (सीतायाः दर्शननिमित्तं प्रादोषिकमिदानीं वेषं अनुतिष्ठति भर्ता।)

**मण्डोदरी** — तेण हि हला ! एहि दाव महाराएण अविण्णादाओ असोअवणिआं पविसिअ, लदावलअन्तरिदाओ भविअ, तस्सि अकाम अमाणाअं सीदाअं महाराअस्स कामुअवत्तिणं पेक्खिअ ओहसिस्सामो (तेन हि हला ! एहि तावत् महाराजेनाविज्ञाते अशोकवनिकां प्रविश्य, लतावलयान्तरिते भूत्वा, तस्मिन्नकामयमानायां सीतायां महाराजस्य कामुकवृत्तिं दृष्ट्वा अपहसिष्यावः।

**चेटी–** जं भट्टिणी आणवेदि। (यद्भहिन्याज्ञापयति।)

(निष्कान्ते)

प्रवेशकः।

(ततः प्रविशति कामयमानावस्थः सपरिवारो रावणः)

**रावणः–** (स्पर्शं निरूप्य) वर्षवर! मया चिरान्निर्वासितस्य दिवाकरस्य लङ्कायां कः प्रसङ्गः| तूर्णमाहूयताममात्यश्चित्रयोधी।

**वर्षवरः–** (आत्मगतम्) अहो नु खलु स्वामिनो महान्मदनोन्मादः

यदेष दोषातनमीक्षणाना-

मानन्दमान्दोलित सागरोर्मिम् ।

न वेद शीतांशुमपि स्पृशन्तं

तुषारनिष्यन्दसुखैर्मयूखैः ॥ २ ॥

**रावणः** - किं विलम्बसे।

**वर्षवरः** - यदाज्ञापयति स्वामी। (आत्मगतम्) न खलु व्याधेरीदृशस्य भिषजो मन्त्रिणः। (निष्कान्तः)

**रावणः** –(विचारयन् निरीक्ष्य) न भानुरेषः। मया दत्ताभयश्चन्द्रमाः। कुतः,

**आतपत्य विदुषाममृतांशु**

**मंशुभन्तमपि रश्मिसहस्रे।**

**रागिणां भवति लक्षणमिन्दो-**

**रिन्द्रनीलशकलच्छविलक्ष्म ॥ ३ ॥**

[विचिन्त्य] स्वयं कृतमिदं व्यसनम् ।

**न रश्मिभिर्ग्लपयति यो दिगन्तरे**

**सरोरुहाण्यपि मम शासनादृते।**

**स चन्द्रमा वितपति सम्मुखेन मा-**

**मवस्थया बलमबलोऽपि नीयते ॥ ४ ॥**

(ततः प्रविशत्यमात्यः)

**अमात्यः** –(सर्वतो विलोक्य) अहो ! चन्द्रपादरसज्ञतां चिरादाप्नोति राक्षसलोकः |कुतः,

**आविर्भवत्यमृतभाजनमङ्गजन्म-**

**सेनापतिः शिशिरदीधितिरेष देवः।**

**क्षीरार्णवप्रलयवारिणि जीवलोकं**

**पश्यामि मग्नमिव यस्य मयूखजालैः ॥ ५ ॥**

रावणः -

हिमकर ! हिमगर्भा रश्मयस्तावकीनाः

मयि मदनविधेये येन वह्निं वमन्ति।

न तव बलमनङ्गस्यापि वा दुःखभाजो

जनकदुहितुरेषा शर्वरीनाथ ! शक्तिः ॥ ६ ॥

अमात्यः-

उन्मर्यादमुपेक्ष्य रावणमहं रामाद् विनश्यामि नु

व्याहृत्याप्रियमाप्नुयान्नु विपदं चण्डादुत स्वामिनः|

पक्षौ द्वावपि मे न पथ्यमनयोः श्रेयानयं रावणात्

नाशो मे पतनावसानमचिरान्नेक्षे यतः स्वामिनः॥७॥

कष्टः स्वामिनो वृत्तान्तः। यदेष बालेन बद्धो मुसलेन हन्यते। यावत् स्वामिनं पश्यामि। (परिक्रम्यावलोक्य) एष स्वामी,

ध्यानैकाग्रमना विजृम्भणपरो निःश्वासतप्ताधरः

स्वामुज्झन्निव कान्तिमुत्पलनिभां वर्षावसाने घनः।

और्वेणेव कृशानुना पतिरपामापीयमानः परैः

दुर्बोधापचयं दधाति दहता कामेन गूढं वपुः ॥ ८ ॥

(उपेत्य) जयतु स्वामी |

रावणः - किमस्त्यपूर्वो वृत्तान्तः।

अमात्यः –(आत्मगतम्) प्रसन्नमाचष्टे देवः। (प्रकाशम्) अस्ति कौलीनम्।

रावणः - तिष्ठ |वालिनं हत्वा सुग्रीवमुपास्ते राम इति।

अमात्यः –तदेव । विशेषोऽप्यस्ति ।

रावणः - तत् कथय ।

अमात्यः - सर्वा दिशः सीतान्वेषणार्थं तदाज्ञया वानरसैन्यं सञ्चरतीति।

रावणः— किं किम् |सर्वा दिशः सीतान्वेषणार्थं तदाज्ञया वानरसै न्यं सचरतीति। पश्य

अहिभवनविधानान्यायुधीकृत्य शैला-

नमरजयिनि सैन्ये रक्षसामान्तकक्ष्ये।

कथमिव रणभूमौ वर्तते वानराणा-

**मुपवनतरुवल्लीपल्लवोन्माथि यूथम् ॥ ९ ॥**

**अमात्यः** – कामं भवन्तु वानराः परिहास्याः। किन्तु,

**रावणः** – कथय किं तत्।

**अमात्यः** – अजय्यं धनुर्धराणामाहुर्दाशरथिम्।

**रावणः** – किं किम् |अजय्यं धनु धराणामाहुर्दाशरथिमिति |पश्य –

स्थातुं यस्य पुरन्दरो न पुरतः शक्नोति संरम्भिणो

यस्य स्थाणुनिवासशालिनि गिरौ व्यापारिता बाहवः।

यस्मात् प्राप्य पराभवं परिभवक्षेत्रीभवन्ति ग्रहाः

शत्रुं तस्य ममाह मानुषमहो ! हास्यस्तपस्वी भवान् ॥१०॥

**अमात्यः** – किं किं रामो मानुष इति। पश्य–

**अधिवसन् गुरुशासनतो वनं**

**रघुपतिर्न च केवलमानुषः।**

**भुवनसंहरणोदयकारणं**

**हरिरयं हरिदश्वकुलोद्भवः ।। ११ ।।**

**रावणः** – किं किं केशव इति। अहो ! भयस्थानमेषः।

**जित्वा ज्यायांसं स्वात्मनो देवराजं**

**स्वर्गे रक्षोभिर्दूषिते मामकीनैः।**

**शच्यां त्रस्तायामप्लरोभिश्च सार्धं**

**विष्णोरेतावान् विक्रमः क्व प्रलीनः ॥ १२ ॥**

**अमात्यः** – किं किं केन जिता देवाः।

**रावणः** – किं न जानासि जेतारं देवानाम्।

**अमात्यः** – न जाने।

**रावणः** – ननु मया । –

**अमात्यः**— मिथ्यैतत्।

**यमवरुणकुबेरवासवादी–**

**नमृतभुजो जितवान् भवानयत्नः।**

**कथमिव शिथिलीकृतः समाधिः**

**कुसुममयैः कुसुमायुधस्य बाणैः ॥ १३ ॥ ॥**

**रावणः** – किं किं कुसुमायुधो मां प्रहरतीति प्रतर्कः।

**अमात्यः –** ननु प्रत्यक्षम् |

**रावणः** – सत्यमिदं प्रत्यक्षविषयः |पश्य–

**पुरां जेतुः कोपाद् वमति नयने वह्निकणिकाः**

**कथीभूतः कामः कथय कथमद्य प्रहरति। शरन्नीहारांशुच्छवि चतुरतारभ्रु वदनं**

**मनोज्ञं जानक्या जनयति विहस्तं जनमिमम्॥१४॥**

**अमात्यः–**

**अधीतवेदविद्योऽसि दायादश्च स्वयंभुवः।**

**परदारास्थया किं त्वं परिवादाय कल्पसे ॥ १५ ॥**

**रावणः** – किमयमपि परिवादः।

**अमात्यः** – नातः परः परीवादः।

**रावणः –** यद्येवम्,

**कृतवान् विधिना शतं ऋतूना–**

**मभिधेयो वचसामकर्तृकाणाम्।**

**मरुतां पतिरप्रजस्त्रिधाम्नो**

**हरिराह्वानमहल्यया किमेति ॥ १६ ॥**

**अमात्यः–** परिवादस्तिष्ठतु। किमस्माभिर्निर्वासित एव सर्वार्थसाधनो धर्मः।

**रावणः** – नयज्ञ ! ननु साध्यापेक्षः साधनपरिग्रहः। पश्य–

**यदि सुरपदकाङ्क्षा वज्रिणो वज्रपाता–**

**दसिरविकृतधारश्चन्द्रहासः सखा मे।**

**तव चिरमतु धर्मः साधनं दुर्बलानां**

**बलवत इव पथ्यं सर्वमस्मद्विधस्य ॥ १७ ॥**

**अमात्यः** – तथाविधैव स्वामिनः शक्तिः। शक्तिमतां भवद्विधानां साध्वाचारः परित्यक्तः। ननु राजर्षिवृत्तपरायणे रामे साधुत्वमुपेक्षणीयम्।

**रावणः** – किं किं रामः साधुरिति। पश्य–

येनानीयत ताटका यमपदं भित्त्वा स्थितिं धन्विनां

छन्नं यः समधत्त वालिनि शरं दत्तेक्षणे भ्रातरि।

स क्षात्रं च धनुर्जटाश्च यमिनां वोढा विरुद्धं मिथो

रामः साधुरसाधवो वयमहो ! बालाः परप्रत्ययाः।।१८ ।।

अमात्यः - देव ! ममैतावानधिकारः।

रावणः - कथय कस्तवाधिकारः।

अमात्यः – त्रिवर्गप्रापणम्।

रावणः - कस्त्रिवर्गः।

अमात्यः – धर्मार्थकामाः।

रावणः - विभज्य कथय।

अमात्यः - धर्मः।

रावणः–

दण्ड्यानां दण्डनोन्निद्रो दण्डैर्मे दण्ड्यते यमः।

स्वर्गैश्वर्यं मदायत्तं धर्मं किं सञ्चिनोम्यहम्॥१९॥

कस्ततोऽन्यः।

अमात्यः— अर्थः।

रावणः - किमर्थेन साध्यम् |

अमात्यः - कोशदण्डयोरभ्युच्छ्रयः |

रावणः -

दण्डो मे रजनिचरा नभश्चरन्तः

कोशो मे भवति गुरुः कुबेर एव।

आयत्तं मयि जगतां त्रयं समग्रं

भूतार्थं कथय करोति किं ममार्थः ॥ २० ॥

कः पश्चिमः।

अमात्यः– कामः।

रावणः - तदर्थिनो वयम्। तेन ममाभिलाषः पूरणीयः।

**अमात्यः** - तत्राप्यतिशये मनः कर्तव्यम्।

**रावणः** –तथैव क्रियते।

**अमात्यः** –यद्येवम्,

**अनया कृतमन्यभुक्तया वसुधागोचरया विरक्तथा।**

**अतिशायि महेन्द्रयोषितां वपुषा किं न तवावरोधनम् ॥ २१ ॥**

**रावणः**- मूढ ! नात्र परः प्रमाणम् |

**परभुक्तरसा पद्मा परं रत्नं धराकरम्।**

**भारती च विरक्तेति त्यज्यते किमयं नयः ॥२२ ॥**

**अमात्यः** –(आत्मगतम्) अतः परमायुधानि गतिः। प्रज्ञासाहचर्यमतिक्रान्तो देवः।

**रावणः** –गच्छ, रामवार्ताविबोधनार्थं साम्प्रतं चारानाज्ञापय।

**अमात्यः** –यदाज्ञापयति देवः।

**न भयेन युधो न पक्षपातात्**

**तव शत्राविदमुक्तमप्रियं ते।**

**असिमर्पयतोऽपि कण्ठदेशे**

**सुजनः शंसति पथ्यमेव भर्तुः ॥ २३ ॥**

(निष्क्रान्तः)

**रावणः**- वर्षवर ! अशोकवनिका मार्गमादेशय।

**वर्षवरः** –यदाज्ञापयति महाराजः इत इतः।

(उभावुद्यानप्रवेशं रूपयतः)

**रावणः** – (सर्वतो विलोक्य) अहो ! परिचयपरवशता चित्तस्य। अत्रासीनापि सीता रामतपोवनमेव चिन्तयति। अत्र हि,

**पते स्वर्गविभूषणं विटपिनो मन्दाकिनीरोधलो**

**धीरं पश्यति देवभर्तरि महीं नेतुं मयोन्मूलिताः।**

**एभ्वाचुम्बति राजहंसमिथुनं हेमाम्बुजान्येकतो**

**दृष्ट्वा पल्लवमेकतः सकलिकं माद्यन्ति पुंस्कोकिलाः ॥ २४॥**

**वर्षवरः**—(आत्मगतम्) चम्पकसौरभ्यमिव षट्पदमाला पश्यति रावणविभवं सीता |

**रावणः** - (कामवेशं निरूप्य)

**जनतामशोकसहकारमञ्जरी**

**शरमात्रया सरभसं भिनत्ति यः।**

**अधुना स किं पुनरयुग्मसायकः**

**सुरलोकवृक्षसुमनः शिलामुखः ॥ २५ ॥**

वर्षवरः! ननु सीता शिंशपाश्रिता |

**वर्षवरः-** देव ! अथ किम् ।

**रावणः** - सीता मयि

**नयति नयने सावज्ञं मां करोति करावृतां**

**श्रुतिमसहना श्रोत्रानन्दं वचो मयि जल्पति।**

**विलपति पुरो रामं बद्धाञ्जलौ मयि तिष्ठति**

**प्रतिदिनमहं जाने नास्याः प्रसादनसाधनम् ॥२६ ॥**

(ततः प्रविशति शिशुपाश्रिता सीता लतावलयान्तरिता मण्डोदरी चेटी च)

**सीता-** अहो ! रक्खसजादीणं णिग्घिणदा। (अहो ! राक्षसजातीनां निघृणता |)

**मण्डोदरी —** हञ्जे ! एसो महाराओ। चिंतिदं दाणिं पेक्खिदव्वं संवृत्तं । (हञ्जे ! एष महाराजः । चिन्तितमिदानीं प्रेक्षितव्यं संवृत्तम् ।)

**रावणः -** (उपेत्य ) ननु देवि !

**सीता –** (आत्मगतम्) किं णु खु पावो भणिस्सदि। ( किं नु खलु पापो भणिष्यति।)

**रावणः** - देवि !

**स्नात्वा गङ्गापयसि विहितोपायना कल्पवृक्षैः**

**कैलासे वा शिखरिणि वने नन्दने वा मनोज्ञे।**

**दुष्प्रापां वः सुतनु ! तपसा निर्विश स्वर्गलक्ष्मीं**

**पातिव्रत्यं परिघ इव ते स्वर्गमार्गं रुणद्धि ॥ २७ ॥**

**सीता** - अघं दे सग्गमग्गं अज्उत्तं अणुध्वदा परथं पहब पविसह कामम्हि। (अघं ते स्वर्गमार्गम् आर्यपुत्रमनुव्रता नरकमेव प्रवेष्टुकामास्मि।)

**रावणः-** देवि ! तव कारणात् सर्वमन्तःपुरं त्यजामि।

**मण्डोदरी** - सुमरदु सुमरदु दार्णि महाराओ। (स्मरतु स्मरतु इदानी महाराजः।)

**सीता–** ण हि ण हि केवलं अन्तेवरं एव्व। मम किदे तुए जीविअं वि परिच्चइदव्वं भविस्सदि। (न हि न हि केवलमन्तःपुरमेव। मम कृते त्वया जीवितमपि परित्यक्तव्यं भविष्यति।)

**मण्डोदरी** – अहो ! परुसवअणा मणुस्सजादी। (अहो ! पुरुषवचना मनुष्यजातिः।)

**रावणः** – सत्यं मे जीवितं हरति कामः।

**सीता** – ण हि ण हि कामादपि सुरूपी अजउती। (न हि न द्वि कामादपि सुरूप आर्यपुत्रः।)

**रावणः–** (प्रहस्य) हहह ! |

**युधि वनचरवृत्तेरायुधं क्षेत्रबन्धो–**

**स्तृणमयमविषह्यं रावणेनेति युक्तम्।**

**किसलयसुकुमारं वक्षसा येन सोढं**

**क्षितिघरपतिपक्षच्छेदि वज्रं मघोनः ॥ २८ ॥**

**मण्डोदरी** – को णु खु महाराअस्स उवक्कमो। केण वि एसा अणुणअं – ण गेह्इ | ( को नु खलु महाराजस्योपक्रमः। केनापि एषा अनुनयं न गृह्णाति।)

**रावणः** –देवि ! अयमञ्जलिः।

**गन्धर्वदैत्यगगनेचरयक्षनाग–**

**कन्यासनाथमवरोधनमस्मदीयम् ।**

**सर्वस्वमेव तव सुन्दरि ! दासकृत्य–**

**मालम्बते यांद तवास्ति मयि प्रसादः ॥ २९ ॥**

**मण्डोदरी –** इदं वि इमाए अहं करिस्सम् । अण्णं जणं ण जाणामि ( इदमप्यस्या अहं करिष्ये । अन्यं जनं न जानामि।)

**चेटी–** पेक्खदु पेक्खदु भट्टिणी | सव्वभाअत्रिणिबद्धेहिं अञ्जलि पुडेहिं विरलरफुल्लविसहरो विअ महासमुद्दो भट्टा । (पश्यतु पश्यतु भट्टिनी। सर्वभागविनिबद्धैः अञ्जलिपुटैः विरलोत्फुल्लबिसधर इव महासमुद्रो भर्ता।)

**मण्डोदरी** – अवि णाम महाराओ अहिलासभंगेण इमस्सि पदिव्य – दाअं कुपिदो ण भवे। (अपि नाम महाराजः अभिलाषभङ्गेण अस्यां पतिव्रतायां कुपितो न भवेत्।)

**वर्षवरः** – (आत्मगतम्) एष पश्यामि।

**चान्द्री कलेव शरपाण्डुरगात्रलेखा**

**तन्वी विभाति मिथिलाधिपतेस्तनूजा।**

**लक्ष्मीमयं च रचिताञ्जलिरातनोति**

**पद्माकरस्य विनिमीलितपङ्कजस्य ॥ ३० ॥**

**रावणः**- देवि ! अयमनुनयसर्वस्वमञ्जलिः। (प्रणमति )

**सीता**- हद्धि। (पादे दूरमाक्षिपति) हा ! धिक।

**मण्डोदरी** - धीरा खु एसा, महाराअस्स सीसं पंकं विअ पावेण परि हरदि। सच्चं दाणि कोलीणं पुहवीसुदा सीता पदुमणाहो रामेत्ति । (धीरा खल्वेषा, महाराजस्य शीर्षं पङ्कमिव पादेन परिहरति। सत्यमिदानीं कौलीनं पृथिवीसुता सीता पद्मनाभो राम इति।)

**वर्षबरः**- राजपुत्रि ! किमुपेक्षसे महाराजस्य प्रणिपातम्।

**विप्रा यजन्ति च नमन्ति च याः शिवाय**

**ता देवता यमकुबेरपुरन्दराद्याः।**

**यस्मै कराणि वितरन्ति विद्वाय मानं**

**सोऽयं मुहुर्नमति सुन्दरि ! मौलिभिस्त्वाम् ॥ ३१ ॥**

**सीता** - ण हि ण हि पणिपादो। विणिपादो खु अअं। ( न हि न हि प्रणिपातः। विनिपातः खल्वयम्।)

**वर्षवरः** - नेयमनुनयक्षमा। (परावृत्य तिष्ठति)

**रावणः** - देवि ! तव पादौ मे शरणम् ।

**सीता** - अज्जउत्तपादाणि सरणं गच्छ। (आर्यपुत्रपदौ शरणं गच्छ।)

**रावणः** - (सरोषं सहसोत्थाय) किं किम्।

**वर्णेभ्यो हृतमुपभुज्य षष्ठमंशं**

**षाड्गुण्यं भुवि नयतां घरापतीनाम्।**

**सामान्या तव जननी समुद्रनेमि-**

**श्चारित्रं तव किमिदं पतिव्रतानाम् ॥ ३२ ॥**

(सर्वे भयं रूपयन्ति )

**सीता**- एदं ण जाणामि । (एतन्न जानामि। )

**रावणः**- क्क चन्द्रहासः |

**सीता** – लाहो खु अअं । मे पाणाणं गई अज्ज उत्तपादमूलं एव्व | ( लाभः खल्वयम्। मे प्राणानां गतिः आर्यपुत्रपादमूलमेव। )

**मण्डोदरी —** हद्धि, तह आसि । पदिव्वदा खु एसा । मम पाहि महाराअस्स अणत्थादो रक्खिस्सम् । ( तूर्णमुपेत्य तयोर्मध्ये तिष्ठति) (हा | धिक्, तथासीत्। पतिव्रता खल्वेषा। मम प्राणैः महाराजस्य अनर्थात् रक्षिष्यामि।)

**मण्डोदरी–** जेदु महाराओ। (जयतु महाराजः।)

**रावणः –** (विलोक्य) अये ! देवी मयसुता मण्डोदरी । (अधोमुखस्तिष्ठति )

**मण्डोदरी–** महाराअ ! तव णित्थिसविसओ से भत्ता रामो विण होइ । किं पुण पसा बंदी | तुए उबक्खिदा सअं एव्व पाणाणि परिच्च्च इस्सदि । (महाराज ! तव निस्त्रिंशविषयोऽस्या भर्ता रामोऽपि न भवति। किं पुनरेषा बन्दी। त्वयोपेक्षिता स्वयमेव प्राणान् परित्यक्ष्यति।)

**वर्षवरः–** (आत्मगतम्)

**वसुधेव महीभुजः प्रियेयं**

**पतिरस्माकम पामिवैष राशिः।**

**अनयोरियमन्तरा भवन्ती**

**मयकन्या क्षितिपालिनीव वेला ॥ ३३ ॥**

ममाप्ययमवसरः । (प्रकाशम्) देव ! किं तव खड्गोपादानम्।

**अवलोक्य सुधाभुजामनर्थं**

**हरिणा किं धृतमग्निमालि चक्रम् |**

**अथवा नमितं धनुः पिनाकं**

**त्वयि मौर्वीकृततक्षकं हरेण ॥ ३४ ॥**

**रावणः –** उपपन्नमिदम्।

(नेपथ्ये)

जयतु स्वामी, जयतु महाराजः, जयतु लङ्केश्वरः, जयतु देवः, जयतु भद्रमुखः, दश नाडिकाः पूर्णाः, अतिक्रामति स्नानवेला। (प्रणदन्ति शङ्खपटहाः) इत इतो महाराजः।

**रावणः–** अद्य यूयमन्तरायः संवृत्तः। भवतु, प्रभाते ज्ञास्यामि।

(निष्क्रान्तो रावणः सपरिवारः)

**सीता –** निरासा खु अज्जउत्तं अन्तरेण | पावं खु एदं रक्ख सह त्थादो मरणं । तं अज्जउत्तं चिंदिअ सअं दाब जीविअं परित्तजिस्सं। (विलोक्य) दिट्ठिआ णु सुत्ता खु रक्खसीओ। होदु। हद्धि, रक्खससी सफरिसपंसुलाणि पादाणि। अणंतराअं पुक्खरिणि पविसिअ परिसुद्धा भविअ अत्ताणं दुक्खादो मोचइस्सं। (निराशा खल्वार्यपुत्रमन्तरेण। पापं खल्विदं राक्षसहस्तान्मरणम्। तदार्यपुत्रं चिन्तयित्वा स्वयं तावज्जीवितं परित्यक्ष्यामि। दिष्ट्या नु सुप्ताः

खलु राक्षस्यः। भवतु। हा | धिक्। राक्षसशीर्ष स्पर्शपांसुलौ पादौ। अनन्तरायं पुष्करिणीं प्रविश्य परिशुद्धा भूत्वा आत्मानं दुःखात् मोचयिष्यामि।)

(निष्क्रान्ता)

**इति शक्तिभद्रविरचिते चूडामणिनाटके पञ्चमोऽङ्कः ।**

## षष्ठोऽङ्कः

ततः प्रविशति हनूमान् अङ्गुलीयकहस्तः)

**हनूमान्–** सम्प्रति हि,

**मैनाकं नागकन्यासुरतसुहृदमुल्लङ्घ्य बन्धुं पयोधे-**

**राकर्षन् वेगवश्यं दिव इव शिथिलं चर्म जीमूतजालम् ।**

**लङ्कां प्राप्तोऽस्मि देवं गुरुमपि मम विस्माययन्नाशुगत्या**

**राज्ञो रामस्य देव्यै प्रहित इव शरो धारयन्नङ्गुलीयम् ॥ १॥**

कस्मिन् खलु प्रदेशे तदुद्यानम्, यत्र देवी शिंशपाश्रिता प्रतिवसतीति गृध्रराजेनोपदिष्टम्। तदहमन्विच्छामि। (परिक्रम्यावलोक्य) अहो नु खलु राक्षसनगरस्य परा लक्ष्मीः। सत्यमेवैतत्।

**यानि यानि मनोज्ञानि वस्तून्यमरवेश्मनि।**

**तानि तानि किलोद्धृत्य लङ्कां नयति रावणः ॥ २ ॥**

(स्पर्श निम्य) अनेनोद्यानेन भवितव्यम्। तथा हि-

**आनेता मदकलभृङ्गकूजिताना-**

**माकर्षन् द्रुमसुमनःपरागभारम्।**

**वीचीनां सरसि विमर्दशीतलोऽय-**

**माचष्टे मम गुरुरेव मातरिश्वा ॥ ३ ॥**

(विलोक्य) इदं तदुद्यानं यावत् प्रविशामि। (प्रविश्य सर्वतो विलोक्य सविस्मयम्)

**एषां पल्लवमंशुकानि कुसुमं मुक्ताः फलं विद्रुमं**

**वैडूर्यं दलमङ्कुरो मरतकं हैमं च शाखाशतम्।**

**एते के जगतीरुहो वनजुषाव्यज्ञातपूर्वा मया**

**प्रायस्सारममी दिवो विटपिनः किं तैर्ममान्यो भरः ॥ ४ ॥**

अत्र देवीं शिंशपाश्रितामभिहितवान् स सम्पातिः। तत् क्व नु खलु शिशपा | (परिक्रम्यावलोक्य) एषा स्खलु शिंशपा। (सहर्षमुपेत्य सर्वतो विलोक्य सविषादम्) नात्र देवीं पश्यामि। (इति मोहमुपागतः। पुनः समाश्वस्य) व्यापादिता नु राक्षसेन। स्वयमेव साहसं गता नु। वृथा मया समुद्रो लङ्घितः। वन्ध्यः सुग्रीवमनोरथः। किमुक्त्वा स्वामिदत्तमिदम–भिज्ञानाङ्गुलीयकं प्रतिप्रयच्छामि। सर्वथा देवीमन्तरेण देवो न जीवति | ततः सुग्रीवो भरतलक्ष्मणौ देव्यश्च। सर्वस्यास्य वन्ध्यपुनर्दर्शनेनाहं कारणं भविष्यामि। मिथ्या स्वामिनोऽपि न वक्तव्यम्। तद्यावदहमपि यथाशक्ति चेष्टितैर्यशोमूर्तिर्भविष्यामि।

(नेपथ्ये ) – भअषं ! मिअलंद्रण ! |(भगवन् ! मृगलान्छन !)

**हनुमान्** – किं नु खल्विदम्। श्रोण्यामस्तावत्।

(पुनर्नैपध्ये) – एसो दे अञ्जली। चिरस्स मे णअणगोअरं पत्तोसि। (एष ते अञ्जलिः | चिरस्य मे नयनगोचरं प्राप्तोऽसि।)

**हनुमान्–** विलापः खल्वेषः। कोटरान्तरितो भूत्वा दृढं वृत्तान्तं ज्ञास्यामि। (तथा करोति) एषा देवी। अस्याः खलु,

**परिवर्तनेन बहुशो महीतले**

**निचितं कपोतगलकर्बुरं रजः।**

**नयनाम्भसा सरसमङ्गरागता–**

**मुपयाति पाण्डुनि पयोधरद्वये ॥ ५ ॥**

अस्या विलापवचनं स्वामिनः श्रोत्रोपायनं क्षणमात्रमात्रर्जयिष्यामि । (तूष्णीमास्ते)

(ततः प्रविशति विलपन्ती सीता)

**सीता–** तुमं दाव चन्द ! उपालम्भइ अअं जणो। सुणीअदि अबन्धुभावो खत्तस्स। सदेसोत्ति तुमं दाव अज्जउत्तेण लोओ वाहरदि। ण हि ण हि उम्मत्ता खु अहं। तुमं खु दिअसे दिअसे पडिमगहतरण अलीअसि। अज्जउत्तो हि दाब रज्जस्सिदि मए मंदभाआए एव्व। अहवा चिट्ठदु दाव एदं। एक्कदो मं दक्खसि एक्कदो अवजउत्तं वि। ण किं चि भणिअ उदासीणो विअ गच्छसि। (त्वां तावत् चन्द्र | उपालभतेऽयं जनः। श्रूयते च बन्धुभावः क्षत्रस्य। सदृश इति त्वां तावदार्यपुत्रेण लोको व्याहरति। न हि न हि उन्मत्ता खल्वहम्, त्वं खलु दिवसे दिवसे परिग्रहान्तरेणालिङ्ग्यसे। आर्यपुत्रो हि तावत् रञ्जयिष्यति मया मन्दभाग्ययेव। अथवा तिष्ठतु तावदिदम्। एकतो मां पश्यसि एकत आर्यपुत्रमपि। न किञ्चिद् भणित्वा उदासीन इव गच्छसि।)

**हनुमान्** —अस्या विलापान्ते रूपं दर्शायष्यामि। (तूष्णीमास्ते)

**सीता** – एदे ए दे इसओ सत्तत्ति सुणीअंति। अअं खु भअवं उब ज्झाओ रघूणं वसिट्ठो। पसा खु पदिव्वदाणं णिदंसणभूदा मअवदी अरुन्धई देवी। भअवदि ! को णाम अअं ववसाओ।

रक्खसगोअरे देसे इमस्स जणस्स पडिआरं कं विण भणासि। सव्वहा तव दसण फलं अण्णहा करिस्सम्। (एते ये ते ऋषयः सप्तेति श्रूयन्ते। अयं खलु भगवान् उपाध्यायो रघूणां वसिष्ठः। एषा खलु पतिव्रतानां निदर्शनमूता भगवती अरुन्धती देवी। भगवति ! को नामायं व्यवसायः। राक्षसगोचरे देशे अस्य जनस्य प्रतीकारं कमपि न भणसि। सर्वथा तव दर्शनफलमन्थया करिष्यामि।)

**हनूमान्** – स्वामिनि ! अहं तावत्प्रतिबध्नामि।

**सीता** – कुदो णु खु अक्कन्दिदं। (अन्यतो विलोक्य) एसा एसा चक्कबाकबहू रआणरक्खसेण विओजिदा अयं विअ जणो सुण्णं रोदिदि। (कुतो नु खल्वाकन्दितम्। एषैषा चक्रवाकवधूः रजनीराक्षसेन वियोजिता अयमिव जनः शून्यं रोदिति।)

**हनूमान्** – स्वामिनि ! न शून्यमिदम् । पूज्यपादो राम एव भर्ता तवेदं वचनं शृणोति।

**सीता** - किं गु खु मए उवालद्धाणं देवदाणं अणुग्गहो। अहवा रक्खसस्स अवरा खु इअं माआ। ( किं नु खलु मयोपालब्धानां देवतानामनुग्रहः। अथवा राक्षसस्यापरा खल्वियं माया।)

**हनूमान्** – स्वामिनि ! मा संशयेन |दूतोऽहम् आर्यमनुवंशप्रदीपस्य रामस्य |

**सीता**– (आत्मगतम्) महुरं खु से वअणं। णहिण हि रक्ख सजादी। कहं बम्मिआदो हारो उप्पज्जइ। ( मधुरं खलु अस्य वचनम् ! न हि न हि राक्षसजातिः। कथं वल्मीकात् हार उत्पद्यते।)

**हनूमान्**– स्वामिनि ! तुभ्यमयमञ्जलिः।

**सीता** — दंसेहि दाव अत्तणो रूपं। अवआहि कोटरादो। (दर्शय तावदात्मनो रूपम्। अपयाहि कोटरतः।)

**हनूमान्** – यदाज्ञापयति स्वामिनी। (अवरुह्य प्रणमति)

**सीता** – (निर्वर्ण्य) हं, वाणरो खु अअं। पाएण एदं रूपं रक्खसो ण गेह्णइ | ( हम्, वानरः खल्वयम्। प्रायेणेदं रूपं राक्षसो न गृह्णाति।)

**हनूमान्** – ( प्रणिपत्य)

**पूतं पुनासि पितरं मिथिलाधिराजं**

**राजर्षिवंशतिलकं दयितं च रामम्।**

**वन्द्या जनस्य सरिदम्बरगोचरेव**

**शैलं तुषारशिशिरं पतिमम्भसां च ॥ ६ ॥**

**सीता** – (आत्मगतम्) को णु खु अश्रं महुरवअणाणं पजावई। होदु, पुच्छिस्सं दाव णं पञ्चाइमस्स परिक्खणे अस्थि पमाणं अथरी अचूडामणी । (प्रकाशम्) वित्थरेण भणेहि, को तुमं कदमेण उवारण अजउत्तेण संसग्गो जादो । (को नु खल्वयं मधुरवचनानां प्रजापतिः। भवतु,

प्रक्ष्यामि तावदेनं पश्चादस्य परीक्षणे अस्ति प्रमाणम् आश्चर्यचूडामणिः | (प्रकाशम्) विस्तरेण भण, कस्त्वं कतमेनोपायेन आर्यपुत्रेण संसर्गो जातः।)

**हनूमान्** - शृणोतु स्वामिनी। अहं तनयः सदागतेः, आज्ञाकरः सुग्रीवस्य, नाम्ना हनूमान्।

**सीता**- तदो तदो। (ततस्ततः।)

**हनूमान्–** तस्य सुग्रीवस्य पूर्वजेन वालिना स्त्रीनिमित्तं राज्यनिमित्तं च प्रवृद्धं वैरमासीत्।

**सीता** – तदो तदो। (ततस्ततः।)

**हनुमान्–** ततस्स खलु वालिभयात् सुग्रीवश्चतुरन्तां पृथिवीं प्रादेशमात्रमिव पर्यचरत्।

**सीता** – तदो तदो । (ततस्ततः।)

**हनूमान्–** ततः सुग्रीवो वालिनिर्भयं मुनिशापबलान्माल्यवन्तं नाम गिरिमध्यास्त।

**सीता–** तदो तदो । (ततस्ततः।)

**हनुमान्** – ततस्तस्मिन् काले सवञ्चनमनेन ताबदल्पायुषा राक्षसेन कष्टमवस्थान्तरं स्वामिनी गमिता।

**सीता** – तदो तदो। (ततस्ततः।)

**हनूमान्** - ततस्स धीरोऽपि देवो रामः सागर इव कारणबलादधीरतां प्राप्तः।

**सीता** - तदो तदो। (ततस्ततः।)

**हनुमान्—** ततः सानुजो हतायुषो जटायुषः प्रामाण्यात् त्वदन्वेषणार्थम् अद्रेरद्रिं वनाद्वनं पादन्यासैरसकृदपुनात्।

**सीता** - तदो तदो। (ततस्ततः।)

**हनुमान्** - ततः कस्मिंश्चिन्महति वनान्तरे वालिचरजनपरीक्षणार्थं सुग्रीवस्य निदेशात् सञ्चरता मया दृष्टो देवः।

**सीता** – ( सहर्षम् ) सच्चं तव णअणेहिं । (सत्यं तव नयनाभ्याम्।)

**हनूमान्–** स्वामिनि ! अथ किम् ।

**सीता** – भणेहि, भणेहि। कीरिसो अज्जउत्तो। (भण, भण। कीदृश - आर्यपुत्र।)

**हनूमान्** – शृणोतु स्वामिनी।

**सीता** – अवहिदम्हि। ( अवहितास्मि।)

**हनूमान्** - पूज्यपादस्य रामस्य,

**नखोदग्रौ पादौ रथचरणशङ्खाङ्किततलौ**

**स्थिरे जङ्घे मध्यं तनु मणिशिलामण्डलनिभम्।**

उरः श्रीवत्साङ्कं युगलमुरगायामि भुजयोः

**पयोजाभं चक्षुः परिणतशशाङ्काकृति मुखम् ॥ ७ ॥**

**सीता–** दाणिं पेकखामि विअ अजउत्तं। तदो तदो। (इदानीं पश्यामीवार्यपुत्रम्। ततस्ततः।)

हनुमान् – ततस्तदानीं देवः,

**कुवलयपलाशाक्षि ! क्व त्वं गतेति लपन् वने**

**स्मरपरवशः स्वामी रामो मया समलक्ष्यत |**

**स्त्रपितमसकृद्बाष्पैराविर्मणिद्युति नूपुरं**

**सपदि कटकस्थाने मौलीपदे च समर्पयन् ॥ ८ ॥**

स्वामिनि ! किं बहुना। तव चरणाभरणं देवस्य सर्वाभरणं संवृत्तम् ।

**सीता–** कहं तुए अवगतं। (कथं त्वया अवगतम्।)

**हनुमान्** –अप्रत्यक्षस्य मे प्रमाणं ननु कुमारो लक्ष्मणः।

**सीता–** जुज्जइ |तदो तदो। (युज्यते। ततस्ततः।)

हनुमान्– ततस्तदानीम्,

**मरतकरुचो माद्यद्भृङ्गा महीरुहराजयो**

**निपतितनदीनिर्धौतान्ता नितम्बभुषो मिरेः।**

**पथिकसुहृदः पम्पावीचीभिश्च समीरणाः**

**क्षणमपि विभुं नालं हर्तुं हरत्सु गुणेषु ते ॥ ९ ॥**

**सीता** - तदो तदो। (ततस्ततः।)

हनुमान् -

**दयितमुपनयन्तं शैवलं चक्रवाकीं**

**मधु मधुकरमम्भोजन्मनामापिबन्तम् ।**

**बिसवलयरसज्ञं राजहंसं च राजा**

**मुहुरभजत तुभ्यं देवि ! सन्देष्टुकामः ॥ १० ॥**

**सीता** –तदो तदो। (ततस्ततः।)

हनूमान् -

**केकया च शिखिनां मृदुधूतकेतकीसुमनसा मरुता च।**

**नीरवाहमलिनासु निशासु प्राणसंशयमगात् स मुहूर्तम् ॥ ११ ॥**

**सीता–** हद्धि, तदो तदो। ( हा ! धिक्, ततस्ततः।)

**हनुमान्–** ततस्तदानीमेब विद्युत्प्रकाशे सति,

**करपल्लवमात्रमुज्जिहीते**

**मदिराक्ष्या मम वारिमग्रगात्र्याः |**

**इति तूर्णमुपेत्य देवि ! देवो**

**मुहुरालम्बत कन्दलीर्विकोशाः ॥ १२ ॥**

**सीता –** तदो तदो । (ततस्ततः।)

**हनूमान्–** ततः अन्यतो गत्वा,

**आपाद्य भङ्गि शयनं तरुणैः प्रवालै–**

**रालूय पुष्पमलकाभरणास्थया ते।**

**पैदेहि ! चण्डि ! मम जीवित ! मानिनि ! त्वम्**

**एहीति सान्त्वयति कामपि पुष्पवल्लीम् ॥ १३ ॥**

**सीता–** होदु एदं एत्तएण पत्रणपुत्त ! पिथं खुइथिक्षणं । मम सु दाब सोअं बीलं अ उप्पादेदि । भोहि भोहि, अघण्णाप सम विदे अज्ज वि तादिसो पञ्च अज्जडत्तो। ( भवत्वेतत्। एतावता पवनपुत्र | प्रियं खलु स्त्रीणाम्। मम खलु तावत्, शोकं व्रीडां चोत्पादयति। भण भण, अधन्याया मम कृते अद्यापि तादृश एवार्यपुत्रः।)

**हनुमान्–** न हि न हि सहायलाभादिदानीं प्रसन्नो देवः।

**सीता—**अज्जउत्तस्स अणत्थमित्तं दाणिं कद्देहि। (आर्यपुत्रस्य अनर्थं मित्रमिदानीं कथय।)

**हनूमान्–** ततस्तस्माद् वनादुपनीय संस्कारेण शरीरशरीरिणोरिव रामसुग्रीवयोः सम्बन्धो मया कारितः।

**सीता –** तदो तदो |( ततस्ततः।)

**हनूमान्–** ततस्तदनुभावादत्यन्तदूरीकृतवालिभयम् ऋक्षवानरैश्वर्यम् अखिलदिङ्मण्डलविषयमप्रतिहतशासनयत्नमेव स्वामी प्रत्यपद्यत।

**सीता–** तदो तदो (ततस्ततः।)

**हनूमान्–** एवं सिद्धार्थः सुग्रीवः पश्चात् त्वदन्वेषणोपक्रमे स्वामिकर्मणि व्यावृतः।

**सीता –** तदो तदो । ( ततस्ततः ।

**हनूमान् –** ततः परिहासमात्रमिव जन्मना देवानामतिशायिनः कर्मणा वानरवीरानृक्षाधिपतींश्च कृतसमयानसृजदाशाचतुष्टयम् |)

**सीता**- तदो तदो । (ततस्ततः।)

**हनूमान्** – अस्यामपि दिशि युवराजनेतृकमृक्षेश्वरपुरोगममस्मदादि विरलमादिशदिदं सैन्यम्।

**सीता** - संकणिज्जा एसा आसा। तदो तदो। (शङ्कनीयैषाशा। ततस्ततः।)

**हनुमान्**– ततः सर्वेषु वानरवीरेषु स्थितेष्वपि पूर्वदर्शन विस्रम्भान्मामुपहरमाहूतवता देवेन दत्तमुक्तं च।

**सीता** –(सहर्षम्) किं किं। (किं किम्।)

**हनूमान्**—(प्रणिपत्याङ्गुलीयकं प्रयच्छति)

सीता – (सहर्ष प्रतिगृह्य निर्वर्ण्य) एदमञ्चरिअं अङ्गुलीअअं। एदं तपोधणेहिं दिण्णं। एदं कुमारेण आणीदं। (अङ्गुलीयमादाय च विलपति एतदाश्चर्यमङ्गुलीयकम्। एतत्तपोधनैर्दत्तम्। एतत् कुमारेणानीतम्।)

हनूमान् —एषा देवी,

**आरोपयत्यलकमानयति स्ववक्त्रं**

**भूयः समाश्रयति बाहुलतोपपीडम्।**

**प्रत्येकमर्पयति चाङ्गुलिपल्लवेषु**

**ध्यानाधिकस्तिमितमार्द्रमवेक्षते च ॥ १४ ॥**

**सीता** - इदं लोआभरणस्स आभरणं, इदं बाणासणगुणपरिखेदिअं, इदं रक्खसमा-आपिसुणं, इदं रअणीसु रअणदीवो, इदं वदणालंकारविकप्पादरिसो। (इदं लोकाभरणस्याभरणम्, इदं बाणासनगुणपरिखिन्नम्, इदं राक्षसमायापिशुनम्, इदं रजनीषु रत्नदीपः, इदं वदनालंकारविकल्पादर्शः।)

**हनूमान्** —अस्याः कृते ततोऽपि शतगुणमुन्मादं कर्तुमर्हति देवः।

**सीता**–अङ्गुलीअअ ! दाणि अज्जउत्तहत्थब्भासविरहिदो तुवं वि। तुवं वि अज्जउत्तेण पाणिणा गहीदोऽसि। तव केण विवण्णत्तणं जादं। तुवं वि अहं विअ रक्खसबन्दीभूदो | (अङ्कुलीयक | इदानीमार्यपुत्रहस्ताभ्यासविरहितस्त्वमपि। त्वमप्यार्यपुत्रेण पाणिना गृहीतोऽसि। तव केन विपन्नत्वं जातम्, त्वमप्यहमिव राक्षसबन्दीभूतः।)

**हनूमान्** -

**रघुवृषभकराङ्गुलीवियोगादधिगतविश्रममेषु वासरेषु।**

**विरहदहनवेदनापरीतं नयति नताङ्गि ! तवाङ्गमङ्गुलीयम् ॥१५॥**

**सीता** - किं णु खु करिस्सं । (किं नु खलु करिष्यामि।)

**हनूमान्** - णु खु हनूमान् –(आत्मगतम्) अस्याः खलु,

**शरपाण्डुरगात्रेषु श्यामां पुलकितामपि।**

**अङ्गुलीयस्य चरतः पश्यामि पदवीमहम् ।। १६ ।।**

**सीता-** वाचइस्सं दाव दाणिं णामस्खर। (उत्तानहस्तावलोकति) (वाचयिष्यामि सावदिदानी नामाक्षरम्।)

**हनूमान् -**

**अरुणे परिशीर्णमञ्जलौ निपतन्तो नयनोदविन्दवः |**

**शकलीकृत मौक्तिकत्विषो हिमलेशा इव पङ्कजोदरे ।। १७ ।।**

**सीता-** भद्द ! तव दंसणमत्तेण अधिमुहं देवं ति मप विण्याई। अघि अ अङगुलीअप्पदाोण आलिंगिदा विअ अजउत्तं। द्वाणि क्षण चलणस्सबगो सहलं मे हिलनं। ण उण अहिण्णाणत्थं अवरं। अज्ञ उत्तस्स अहिण्णाणवअणं मे भगोहि। (भद्र | तव दर्शनमात्रेणाभिमुखं दैवतमिति मया विज्ञातम्। अपि चाङ्गुलीयप्रदानेन आलिङ्गितेवार्यपुत्रम्। इदानीं पुनर्वचनश्रवणे सकुतूहलं मे हृदयम्। न पुनरभिज्ञानार्थमपरम्। आर्यपुत्रस्याभिज्ञानवचनं मे भण।)

हनुमान् - अत्रभवत्या वञ्चनाभूमौ वर्तमानाया अभिज्ञानदृढीकरणार्थमिदमध्याह।

**सीता-** किं गुखु। अवहिदम्हि। (किं नु खलु |अवहितास्मि।)

**हनुमान् –**शृणोतु स्वामिनी ।

**आयातं मामपरिचितया वेलया मन्दिरं ते**

**चोरो दण्ड्यस्त्वमिति मधुरं व्याहरन्त्या भवत्या।**

**मन्दे दीपे मधुलवमुचां मालया मल्लिकानां**

**बद्धं चेतो दृढतरमिदं बाहुबन्धच्छलेन ॥ १८ ॥**

**सीता – (**सहर्षमात्मगतम्) दाणिं आसालदे ! पसषं बंघेहि | तुमं दाव मारुइणा अमिदेण सिनीअसि । हिअअ ! तुवं वि लद्धप्पवे समग्गोसि अज्जउत्तेण |जीविअ ! तुवं वि जमलोअस्स अद्धपहे णिवु तोसि । (प्रकाशम्) पवणतणअ ! तुज्झ किं वि भणिदुकामम्हि । भणि दव्वं पुण ण जाणामि । अत्थि तव गुरुमारुओ लोअस्स पाणो, मम खु दाव तुवं पाणो संवुत्तो। (इदानीमाशालते ! प्रसवं बध्नीहि। त्वं तावत् मारुतिना अमृतेन सिच्यसे। हृदय ! त्वमपि लब्धप्रवेशमार्गमस्यार्यपुत्रेण। जीवित ! त्वमपि यमलोकस्यार्धपथे निवृत्तमसि। पवनतनय ! तव किमपि भणितुकामास्मि। भणितव्यं पुनर्न जानामि। अस्ति तव गुरुर्मारुतो लोकस्य प्राणः। मम खलु ताकृत्वं प्राणः संवृतः।)

**हनुमान्–** दक्षा खलु देवी भृत्यसान्त्वने। (अधोमुखस्तिष्ठति)

**सीता-** पभञ्जणसूणो ! कहि कहेहि |अच्चरिअं खु पदं । केण दाणि उवाएण एत्थ आअदो लंघिदो वा अअं महासमुहो। (प्रभञ्जनसूनो ! कथय कथय। आश्चर्यं खल्वेतत्। केनेदानीमुपायेनात्रागतो लङ्घितो वायं महासमुद्रः।)

**हनुमान्** – ततस्तदाज्ञां देवस्य शेषमिव शिरसा प्रतिगृह्य प्रक्रान्तमिमां दिशं वानरसैन्यमासीत् |

**सीता** – तदो तदो (ततस्ततः।)

**हनूमान्** — ततः खलु,

**मेघावृतासु जगतीधरकन्दरासु**

**रोधोवनेषु सरितां सरसद्रुमेषु ।**

**वेलातटे जलनिधेरपि ते विनिद्र–**

**मन्वेषणाय समयो गमितः कपीन्द्रैः ॥ १९ ॥**

**सीता** – तदो तदो । (ततस्ततः।)

**हनुमान्** – ततोऽतिक्रमणात्समयस्य सर्वे वानरपतयः प्रायोपवेशनमतिं चक्रुः।

**सीता**– हद्धि, तदो तदो। (हा ! धिक, ततस्ततः।)

**हनूमान्** — ततो हतायुषो जटायुषः सहजः सम्पातिर्नाम गृध्रराजः स्वरोपलम्भेन तां प्रायोपवेशनभूमिमभिगतवानासीत्।

**सीता** - तदो तदो। (ततस्ततः।)

**हनुमान्**– ततः स खलु स्वामिनि ! तवेमामवस्थां सहोषित इव व्यक्तमस्मान् न्यवेदयत्।

**सीता** – अहो ! उपआरपक्खा सा जादी। पुव्वं वि तस्स भादा मम – कारणादो उज्झिदवन्तो पाणाणि। तदो तदो। (अहो ! उपकारपक्षा सा जातिः। पूर्वमपि तस्य भ्राता मम कारणादुज्झितवान् प्राणान्। ततस्ततः।)

**हनूमान्** – ततस्तदुपदेशात् लङ्घितो महार्णवः। प्राप्तमिदमुद्यानम्।

**सीता**– मम सोअसाअरो खु तुए लंघिदो ! वसणकण्णधार ! मारुद सूणो! कहेहि इमस्स वसणस्स परिअवसाणकालो कदमो। (मम शोकसागरः खलु त्वया लङ्कितः। व्यसनकर्णधार ! मारुतसूनो ! कथयास्य व्यसनस्य पर्यवसानकालः कतमः।)

**हनुमान्**– तवास्ति भर्तृसन्देशः।

**सीता** – अत्थि मम संदेसो |अणुग्गहिदम्हि। (अस्ति मम सन्देशः। अनुगृहीतास्मि।)

**हनूमान्** – अयं भर्तृसन्देशः ।

**सदसि नमयता धनुर्मया त्वं**

**गुरुजघने ! गुरुमन्दिरादवाप्ता।**

**दशवदननिरोधनादपि त्वां**

**युधि विनमय्य शरासनं हरामि ॥ २० ॥ इति ।**

**सीता** — रक्खसस्स पाणाणि पुडमं गेहिअ पच्चा मं हरिस्सदि खु अज्जउत्तो | जड एव्वं, किं दाणि विलम्बसि । गच्छ सिग्धं । गेड इम चूडामणि इसीणं अणुग्गहं । अज्जउत्तो वि दाब इमं पेक्खिअ अणुपेक्खि दब्बो भवे । (चूडामणिं प्रयच्छति) (राक्षसस्य प्राणान् प्रथमं गृहीत्वा पश्चान्मां हरिष्यति खल्वार्यपुत्रः। यद्येवम्, किमिदानीं विलम्बसे। गच्छ शीघ्रम् । गृहाणेमं चूडामणिभृषीणामनुग्रहम्। आर्यपुत्रोऽपि तावदिमं प्रेक्ष्यानुपेशितव्यो भवेत्।)

**हनुमान्-** (आत्मयतम्) अहो ! प्राप्तज्ञता दाक्षिण्यं च देव्याः। (प्रकाशम्) प्रसीदतु स्वामिनी। (प्रतिगृहूणाति)

**सीता-** अजस्तो जह सोअपरवसो ण होइ तह मे उत्तंते तस्स भणे हि। (आर्यपुत्र यथा शोकपरवशो न भवति तथा मे वृत्तान्तं तस्य भण।)

**हनुमान्-** अनुगृहीतोऽस्मि।

**सीता** - गच्छ दाणि तुवं। अहं वि पुरो बिअ सिंसपासंसिदा भविअ तुम्हाणं वृत्तंतं पडिपालेमि। (गच्छेदानीं त्वम्। अहमपि पुरोवत् शिंशपासंश्रिता भूत्वा युष्माकं वृत्तान्तं प्रतिपातयामि।)

**हनुमान्-** यदाज्ञापयति स्वामिनी।

**रक्षोवधाद्विरतकर्म विसृज्य चापं**

**गोधाङ्गुलित्रपदवीषु धृतव्रणेन।**

**रेखात पत्रकलशाङ्कितलेन रामो**

**वेणीं करेण तव मोक्ष्यति देवि ! देवः ॥ २१ ॥**

**सीता** - अविग्घं ते होदु। ( अविघ्नं ते भवतु।)

(निष्कान्तौ)

**इति शक्तिभद्रविरचिते चूडामणिनाटके षष्ठोऽङ्कः ।**

## <u>सप्तमोऽङ्कः</u>

(ततः प्रविशति विद्याधरः प्रियया सह)

**विद्याधरः—** सौदामिनि ! अद्यापि तावद्विद्यादैवतमाराधयता मया नोपलक्षितो महेन्द्रसेवाकालः। तत् खिन्नापि मामनुगच्छ गमनत्वरया कालं नातिपातयावः।

**सौदामिनी-** अज्ज ! आअदम्हि। (आर्य ! आगतास्मि।)

**विद्याधरः—** सौदामिनि ! एहि।

**साधु संयमय मूर्धजन्मना-**

**मुच्छ्रसत्कुसुमदाम बन्धनम्।**

**कुण्डलांशुरचितेन्द्रकार्मुकं**

**कार्मुकभ्रु ! रचय स्तनांशुकम् ॥ १ ॥**

**सौदामिनी** –अज्ज ! एव्वं दाव करिस्सम् |(आर्य ! एवं तावत् करिष्ये।)

(उभावाकाशयानं निरूपयतः)

**विद्याधरः**- सौदामिनि ! पश्य पश्य-

**द्रुतमञ्जननीलमायोः खं**

**शिखरादुत्पततोः शिलोच्चयस्य |**

**अनुपूर्विकया विकारजातं**

**ग्रसमानेव वसुन्धरा विभाति ॥ २ ॥**

**सौदामिनी**- अज्ज ! कुलपव्वदा दाणिं संसइदा संवृत्ता। (आर्य ! कुलपर्वताः इदानीं संशयिताः संवृताः।)

**विद्याधरः**- अहो नु खलु सुभगमस्माकमध्यगमनम्। एकतः प्रियापयोधरस्पर्शः अन्यतो दिग्वधूपयोघरस्पर्शः।

**विधुतो व्रजामि सुरलोकमारुतै -**

**मरुतां पथा मरतकोपलत्विषा।**

**जलभारसान्द्रमुदरं पयोमुचा-**

**महमालिखन् वलयवज्रकोटिभिः ॥ ३ ॥**

(नेपथ्ये)

**आदत्तमग्निरद्यप्रभृति हुतमसन्दूषितं यातुधानै-**

**राप्लुत्याकाशगङ्गापयसि मुनिवृषाः सप्त सन्ध्यां जपन्तु।**

**मानोर्वाहा भजेरन्नचकितमृजुना वर्त्मना मन्दराद्रिं**

**साध्व्यश्चारित्रभङ्गाज्जहतु भयमपास्तार्गला द्योरपि स्यात् ॥४॥**

**विद्यावरः**- अये ! जगद्धोषणेव। निहतेन रावणेन भवितव्यम्।

**सौदामिनी**—अहं वि तं एव्व तक्केमि। अदिक्कंदे दिअहे पत्ता वत्ता, किदं रामेण रक्खसउलं रावणमत्तावसेसं ति। (अहमपि तदेव तर्कयामि। अतिक्रान्ते दिवसे प्रवृत्ता वार्ता, कृतं रामेण राक्षसकुलं रावणमात्रावशेषमिति।)

**विद्याघरः**—अद्योद्धृतकण्टकं त्रैलोक्यमासीत्।

**सौदामिनी–** अज्ज उच्छसिदाणि पदिव्वदाणं हिअआणि। (अद्य उच्छवसितानि पतिव्रतानां हृदयानि।)

**विद्याधरः**—साम्प्रतम् अभिलषितसिद्धिसम्फुल्लाक्षं सहस्राक्षं सभाजयिध्यावः।

(निष्क्रान्तौ)

मिश्रविष्कम्भः |

(ततः प्रविशति भेरीं प्रहरन् पर्यटन् जाम्बवान्)

**जाम्बवान्** –( उक्तमनुकृत्य)

**वेगादुत्पततो विधूय नमुचिं पादस्य पत्युश्चिता–**

**मग्रे सञ्चरता मया मुहुरभूदू भेरी गभीरं हता।**

**रामेणापि दशाननं हतवता व्यापारितोऽयं जनः**

**तम्मिन् कर्मणि कर्म नूनमुचितं लोकोऽयमालम्बते ॥५॥**

महानयं भारः। साधयामस्तावेत् । (निष्कान्तः)

(ततः प्रविशति रामः सञ्चाहवेषमपास्य लक्ष्मणविभीषण सुप्रीवैः सह)

**रामः** –( विभीषणमवलोक्य) वयस्य ! विभीषण ! –

**नगरीं विश पश्य भर्तृहीनं**

**जनमापादय कर्म चोचितं च।**

**व्यसनेषु महत्सु तत्कुलीनं**

**जनमालोक्य समुच्छ्रसन्ति पौराः ॥ ६ ॥**

**विभीषणः** –प्रसीदतु देवः। नाहं बन्धुस्नेहाद् ब्रवीमि।

**क्क साधवः कृक च रचनीचरा वयं**

**तथापि मां सुखयति हि त्वदाश्रयः।**

**अपायिनीमहमिति पूर्वजन्मनो**

**न कामये नरवर ! गत्वरीं श्रियम् ॥ ७ ॥**

**रामः**— मा मा, नैष राजधर्मः। नोपनता श्रीरवमन्तव्या। अपि च

**सार्धं त्वया गुणपरायण ! निर्गुणेन**

**निर्वासितः सरभसं तव पूर्वजेन।**

**त्वामद्य सत्पथपुरोग पुरो निधाय**

**पौलस्त्यभूमिषु पदं निदधातु धर्मः ॥ ८ ॥**

**विभीषणः** - देव ! अद्यप्रभृति,

बहुमानपदं भवाम्यहं प्रणयोत्फुल्लमवेक्षितस्त्वया।

ध्रियते हरसङ्ग्रहाद् बुधैः शिरसा किं न चिताकरोटिका ॥ ९ ॥

**रामः**- वयस्य ! सुग्रीव ! पर्याकुल इव ते सखा विभीषणः। कृतकरणीयमिमं लङ्कायां प्रकृतिभिस्सह संयोजय |

**सुग्रीवः** – यदाज्ञापयति देवः। एहि लङ्केश्वर ! इत इतः।

(निष्कान्तौ)

**रामः**- अद्याहं सिद्धार्थो विभीषणप्रतिष्ठापनात्। कुतः,

**तस्य लक्ष्मीर्नटस्येव छत्रचामरलक्षणा ।**

**न बध्नाति फलं यस्मिन्नर्थिनां प्रार्थनालता ॥ १० ॥**

(प्रविश्य)

**सुग्रीवः** - जयतु देवः।

**रामः**- सुग्रीव ! किमिदं निर्गमनानन्तरमेवागमनम्।

**सुग्रीवः**—देव ! इदं विभीषणवचनम् | अहं तावन्नगरीं न प्रविशामि यावद् देवी ततो न निष्कामति।

**रामः** – (सबहुमानम्) यद्येवम्, त्वमेव तत्र सखीमानय |

**सुग्रीवः** – यदाज्ञापयति देवः। (निष्क्रान्तः)

**रामः**—(सवितर्कम्)

**हत्वा वालिनमर्णवे गिरिशतैराबध्य सेतुं श्रमा-**

**ल्लङ्कामेत्य सहायबन्धुसहितं कृत्वा इतं रावणम्।**

**यामद्य प्रतिपालयामि वचनप्रामाण्यतो मारुतेः**

**संवासादपि नाम सा नुपसुता न स्यादवर्णास्पदम् ॥ ११॥**

**लक्ष्मणः**- प्रसीदत्वार्यः।

**सुखाभिलाषी स्त्रीभावो दुर्विनीताश्च राक्षसाः।**

**दूरे वयमतो देव्याः परीक्ष्या भावशुद्धता ॥ १२ ॥**

**रामः** – लक्ष्मण ! क्व हनुमान्।

**लक्ष्मणः—**स खल्विदानीं युद्धभूमौ –

क्षिप्तान्यद्रिशतान्यपास्यति भुजेनाधः कपीनां कृते

**ग्रस्तानुद्धरति प्रसह्य वदनादृक्षेश्वरान् रक्षसाम्।**

**गोलांगूलकुलस्य निर्झरजलैर्मुष्णाति युद्धश्रमं**

**ग्राहेभ्यो विभजत्यपां निलयने पौलस्त्यबन्धून् हतान् ॥१३॥**

**रामः—**सदृशमिदमस्य चेष्टितम्।

(नेपथ्ये) – उस्सरह उस्सरह अज्जा ! उस्सरह। (उत्सरत उत्सरत आर्याः ! उत्सरत।)

**रामः** – लक्ष्मण ! किमिदम् ।

**लक्ष्मणः** – आर्य ! इदमागमनमार्यायाः।

**रामः** – किं नु खलु देवीं महाजनो वक्ष्यति। लक्ष्मण ! सुग्रीव माज्ञापय – कृतमुत्सारणकर्मणा, तत्रैव यानादवतार्य प्रकाशं प्रवेश्यतां मैथिलीनि।

**लक्ष्मणः**– यदाज्ञापयत्यार्यः। (निष्क्रान्तः)

**रामः**–

अवधूय दशग्रीवं मामनुव्रतचेतसः।

सर्वे पश्यन्तु जानक्या रूपं चारित्रभूषणम् ॥ १४ ॥

(ततः प्रविशति सीता लक्ष्मणसुग्रीवाभ्याम्)

**उभौ** – (प्रणमतः) इत इतः।

(नेपथ्ये)

**अहो नु खलु लक्ष्मणसुग्रीवयोः साध्वाचारः।**

**अनयोर्नमतोरद्य दूरानतशिरस्कयोः।**

**पतन्ति राजकन्यायाः पादयोरेव दृष्टयः ॥ १५ ॥**

**सीता**– (आत्मगतम्) किं णु खु मं महाजनो मंतेदि। किं शुस्खु मं अज्जउत्तो मन्तेदि ! अविस्ससणीओ खु इत्थिआभावो। अघण्णाए मम किदे अणत्थसाअरे पडिदो अजउत्तो अत्तफेण बाहुणा उत्तण्णो | सच्चं एव्व भणिदं मारुइणा पुढमं वि घणुणा पडिग्गहीदा दाणि वि घणुणा उद्धरिस्सदित्ति। (किन्नु खलु मां महाजनो मन्त्रयते। किन्नु खलु मां आर्यपुत्रो मन्त्रयते। अविश्वसनीयः खलु स्त्रीभावः। अधन्याया मम कृते अनर्थ सागरे पतितः आर्यपुत्रः आत्मीयेन बाहुना उत्तीर्णः। सत्यमेव भणितं मारुतिना प्रथममपि धनुषा परिगृहीता इदानीमपि धनुषा उद्धरिव्यतीति।)

(सर्वे उपसृत्य)

**लक्ष्मणः** – जयत्वार्यः।

**सुग्रीवः** – जयतु जयतु देवः।

**सीता**—जेदु अज्जउत्तो |(जयत्वार्यपुत्रः।)

**रामः**—देवि ! इत. इतः |( इत्यर्धोक्ते मुखं परावर्तयति)

**उभौ** – किं नु खल्विदम्।

**रामः** – लक्ष्मण ! हनूमांस्तावदाहूयताम्।

**लक्ष्मणः**——यदाज्ञापयत्यार्यः। (निष्क्रान्तः)

**रामः**– सुग्रीव ! पूर्वमियं न दृष्टा।

(सुग्रीवो भीतस्तिष्ठति)

**रामः**– सुग्रीव ! पश्येदानीं त्वयादृष्टपूर्वं विरहचारित्रम्।

**हरिचन्दन प्रणयिनौ पयोधरौ**

**कुसुमाचितं सुरभि केशबन्धनम्।**

**अरुणप्रभातिशयचोरमम्बरं**

**विरहवताय वहते पतिव्रता ॥ १६ ॥**

**सुग्रीवः** –देव ! ममात्याचारदोषादियं देवस्य नयनगोचरं प्राप्ता।

**रामः**–युज्यते। लक्ष्मणोऽपि न पश्यत्येव।

**सीता** – (आत्मगतम्) हद्धि, अणसूआए अणुग्गहो वि मे दाणि सावो संवुत्तो। (हा ! धिक्, अनसूयाया अनुग्रहोऽपि मे इदानीं शापः संवृत्तः।)

(ततः प्रविशति लक्ष्मणो हनूमांश्च)

**लक्ष्मणः** –जयत्वार्यः।

**हनूमान्**–जयतु देवः।

**रामः**– लक्ष्मण ! हनूमता सह पश्यैनाम्।

(उभौ सीतां दृष्ट्वा मुखं परावर्तयतः)

**हनूमान्**–देव ! लङ्कायामन्या मया दृष्टा। साम्प्रतमियमन्या।

**सीता**—अउजउत्त ! अहं किं वि वत्तुकामा। (अर्यपुत्र ! अहं किमपि वक्तुकामा।)

**रामः**– ननु ते रूपमेव कथयति ।

**सीता**– कुमार ! तुवं मे वअणं सुणाहि। (कुमार त्वं मे वचन शृणु।)

**लक्ष्मणः**- तव वचनश्रवणस्य फलमेतत्।

**सीता** – सुणाहि पवणपुत्त ! |(शृणु पवनपुत्र ! |)

**हनुमान्** — गतोऽभूत् स कालः।

**रामः**- इदानीमपि मम पुरतस्तिष्ठति।

**रजनीचरगूढसत्रिभिः कृतसङ्केतनया दिने दिने।**

**ऋजुभावजडास्त्वया वयं छलिताः पुंश्चलि ! दण्डके वने ॥ १७ ॥**

**सीता** – (सस्मितम्) अज्जउत्तेण वि परुसवअणं भणीअदि। (आर्यपुत्रेणापि परुषवचनं भण्यते।)

**सुग्रीवः**-

**इदं श्रुत्वा वचो भर्तुर्यदेषा कुरुते स्मितम्।**

**तदियं सर्वनारीणामवरा वा वरा यदि ॥ १८ ॥ ॥**

निर्वास्यतामेषा स्वामिविषयात्। क्षीराहुतिं चिताग्निः कथमर्हति।

**लक्ष्मणः**- नैषा शरीरेण गन्तुमर्हति।

**हनुमान्**–शाधि देव ! यथार्ह दण्डमस्याः।

**सीता** – अणुमदा अज्जउत्तेण अग्निं पविसदुकामम्हि। (अनुमतार्यपुत्रेणाग्निं प्रवेष्टुकामास्मि।)

**रामः** - लक्ष्मण ! अस्याः पतिव्रता याश्छन्दमनुतिष्ठ |

**लक्ष्मणः**– यदाज्ञापयत्यार्यः। (आत्मगतम्) इदानीं प्रीतोऽस्मि। (प्रकाशम्) देवि ! इत इतः।

**सीता** – (आत्मगतम्) हिअअ ! अज्जउत्तपादेसु पणमेहि। (हृदय ! - आर्यपुत्रपादयोः प्रणम।)

(निष्क्रान्तौ)

**रामः**- हरीश्वर ! त्वमपि हनूमत्प्रमुखेन सैन्येन सह हतशेषेभ्यो राक्षसेभ्यः कुमारं रक्ष।

**सुग्रीवः** – यदाज्ञापयति देवः। (निष्कान्तः)

**रामः**- किं नु खलु प्रत्यक्षमप्यप्रमाणं कृत्वा सीतां प्रति सबहुमानं मे मनः। कृतं त्यक्त्वानुशयेन। केवलं लोकहितार्थमेव मे यत्नो भविष्यति।

(ततः प्रविशति कण्टकितसर्वाङ्गो लक्ष्मणः)

**लक्ष्मणः**– आश्चर्यमाश्चर्यम्।

**रामः**- वत्स ! लक्ष्मण ! मेघान्तरचरमपि ते जितवतो मेघनाद ! मिन्द्रजितं न कण्टकिता गात्रयष्टिः। कथय कथय, कुतस्त्योऽयमावेगः।

**लक्ष्मणः** – आर्यपादस्य शासनात् तीरे महार्णवस्य कासारदारुनिकरैः सन्धुक्षितो जातवेदाः।

**रामः**– (सादरम्) ततस्ततः।

**लक्ष्मणः**– ततस्सा तं संवर्तपायकमिव पावकमभिज्वलन्तं त्रिरार्या पर्यणैषीत् ।

**रामः** – ततस्ततः।

**लक्ष्मणः**– ततस्सा खलु देवी त्वामयोध्याजुषं गुरुजनं च प्रणम्य शिरसा मामप्येवं गुरुवचनकरो भवेत्युक्त्वा भरतशत्रुघ्नाभ्यामेवमेव कथयेति चोवाच। अथ तयेदमुक्तं च "भगवन्नग्ने ! तव पुरस्तात् सत्याधिष्ठानं करिष्यामि। प्रस्थानकाले राक्षसभुजसंस्पर्शः संवृत्तः पादस्पर्शश्च लङ्कायाम्" इति निर्विशङ्कंजलमिव जलशत्रुमविशत्।

**रामः**– विस्मयपदमेतत्। ततस्ततः।

**लक्ष्मणः** – तदानीमाकाशे प्रवृत्ताः शङ्खपटहाः।

**रामः** – ततस्ततः

**लक्ष्मणः** – ततस्तदानीम्,

**स्तिमितनयनमारात्पश्यतां नस्समन्ताद्**

**व्यतिकरमिव रूपं विद्यतामादधानः।**

**अवनिभुवमनिन्द्यां ते पुरोधाय देवी–**

**ममरवदनमाविर्देवता वह्निरासीत् ॥ १९ ॥**

**रामः**– ततस्ततः।

**लक्ष्मणः** – ततः खलु,

**वेलावने कुसुमितान् विरहय्य वृक्षान्**

**कल्माषितं खमलिपङ्क्तिभिरुद्यताभिः।**

**आयामवत्यमरपादपपुष्पवृष्टि–**

**रग्रे स्थिता सपदि हव्यभुजस्तिरोऽभूत् ॥ २० ॥**

**रामः** – भवतु, द्रक्ष्यामस्तावत्। (उभौ परिकामतः )

(नेपथ्ये) – (दिव्यगन्धर्वा गायन्ति)

**लोकानां यस्त्रितयमुद्राधारमापद्य योगा–**

**दम्भोराशौ विषधरमयीं धीरमध्यास्त शय्याम् ।**

**होता हव्यं हुतभुगिति यं प्राह शब्दः स्वयंभूः**

**स त्वं विष्णुर्जनकतनया सा च पद्माक्ष ! पद्मा ॥ २१॥**

(अपरे गायन्ति)

**मदाम्भसा वियति महेन्द्रदन्तिनः**
**कलङ्कयन् हिमरुचिकर्णचामरम् ।**
**नभोनदीनलिनपरागधूसरः**
**समीरणो रणरुजमादुनोतु ते ॥ २२ ॥**

**रामः**- अश्रुतपूर्वोऽयं ग्रामरागः।

(उभावाकाशं विलोकयतः)

**रामः**—लक्ष्मण ! पश्य पश्य प्रभानुलेपादपूर्वे इव द्यावापृथिव्यौ।

**श्रृङ्गाणि मेरोरिव सेतुशैला**
**वेलावनं कल्पवनोपमानम्।**
**सैन्यं कपीनां कनकप्रभाणा-**
**माम्रेडितच्छायमभूदिदानीम् ॥ २३ ॥**

(नेपथ्ये) –नारदोऽहमागच्छामि देवशासनेन।

(उभौ सविनयमवलोकयतः)

(प्रविश्य)

**नारदः**- जयतु कारणमानुषो रावणान्तकः ।

**रामः**- लक्ष्मण ! पश्यद्भिरप्यश्रद्धेयमिदमाश्चर्यम्।

**नारदः** - किमतः परमाश्चर्यम्, यातव्याः स्त्रयं रावणस्य लङ्कां यद्भियास्यन्ति देवाः शक्रादयः।

**रामः**- आ अतः खलु प्रभाप्रवाहः। भगवत्प्रसादात् पूतमात्मानमपरमिव पश्यामि।

**नारदः**-

**देवस्त्रिविष्टपजुषां पतिरेष मेषो**
**मेधातिथेरशनिकेतुरपां च वर्षी।**
**शाखासहस्त्रविषयीकृतसर्वतन्त्रो**
**यस्यापदानमृषि रक्षरमूर्तिराह ॥ २४ ॥**

**रामः** -प्रणमामि भगवन्तम्।

**नारदः**- पश्य

**सकल्माषैः कण्ठैरनलकणगर्भैश्च नयनै-**

**रमी रुद्रा बाह्वन्तरतरलहाराहिमणयः।**

**हिमांशोरापाद्य प्रतिमुकुटमेकादश कलाः**

**कलानां शेषाणां भसितमिव चूर्णं दधति ये ||२५||**

**रामः** - नमामि वर्णोत्तमानां देवानाम् ।

**नारदः**— अमी वसवः। इमावश्विनौ ।

**रामः**- नमोऽस्तु लोकहितपरायणेभ्यो देवेभ्यः।

**नारदः**-

**आद्यं मनुं दशरथं चरमं च कृत्वा**

**तिष्ठन्ति भूमिपतयः पितरस्तवैते।**

**ये भूतिमिन्द्रविषयां परिभूय दत्तं**

**पिण्डं त्वया प्रतिदिनं प्रतिपालयन्ति ||२६||**

(उभौ साश्रुजलं प्रणमतः)

**रामः**-

**पश्य लक्ष्मण ! नस्तातं स्वदृष्टिपरिरम्भिणम्।**

**सत्यं संरक्षता येन त्यक्तोऽहमसूभिः समम् ।। २७ ।।**

**लक्ष्मणः**- आर्य |स्वप्न इव मे प्रतिभाति।

**रामः**— भगवन् ! किमागमनकारणं देवानामृषीणां पितॄणां च।

**नारदः** - भवतो देव्यास्सीतायाः पातिव्रत्यानुभावः।

**रामः**- अस्याद्भुतदर्शनमेव नः प्रत्ययकारणमासीत्। तथापि मां सन्देहयति तस्या रूपशोभानिमित्तम्।

**नारदः** - किं न जानीषे तस्या रूपशोभानिमित्तम्।

**रामः**- भगवन् ! न जाने।

**नारदः** - तस्या महर्षिपत्न्यास्तावदनसूयायाः वरप्रदानवशात् खलु।

**रामः**- आः दण्डकेऽपि मम सन्देहपदमिदमासीत् न पृष्टं परमार्थतः।

**नारदः** - तस्याश्शरीरगतं तब दर्शनपथे सर्वं मण्डनरूपं भविष्यति।

तथा हि,

**वसुधारजश्शयनकालसञ्चितं**

**स्तनमण्डले मलयजत्वमागतम्।**

**समपद्यताश्रयमहीरुहच्युतं**

**परिणामि पर्णमलकस्य भूषणम् ॥ २८ ॥**

**रामः–** कृतं देवशासनेन। ननु भवान् सत्यवादी समाधिचक्षुरेव प्रमाणम्।

**लक्ष्मणः–** (आत्मगतम्) अहो नु खलु मन्दैरस्माभिः वचनविस्फुलिङ्गैराहतापि महादेवी नापद्यत विकृतिम्।

**रामः** – भगवन् ! किमाज्ञापयन्ति देवाः महर्षयश्च।

**नारदः** – सह रावणजीवितैस्समाप्तस्ते वनवासकालः | तस्मात् सार्धं देव्या नगर्ययोध्या प्रवेष्ठव्येति।

**रामः**– अनुगृहीतोऽस्मि।

**नारदः** – तेन हि आनयनाथ देव्या लक्ष्मण माज्ञापय |

**रामः** – (जनान्तिकम्) लक्ष्मण ! का नामात्र प्रतिपत्तिः।

**लक्ष्मणः**– आर्य ! किमत्र परीक्षितव्यम्। अस्याश्शुद्धिसाक्षिणो देवाः पितरो महर्षयश्च।

**रामः** –(प्रकाशम्) लक्ष्मण ! अनुतिष्ठ महर्षिशासनम्।

**लक्ष्मशः–**यदाज्ञापयत्यार्यः। (निष्क्रान्तः)

**नारदः**– अहो नु खलु तवानुभावो विस्मयनीयः। पश्य–

**कार्मुकेण शमिते तवाधुना रावणे त्रिभुवनैककण्टके।**

**वासवस्य रघुवीर ! केवलं जातमम्बुधरमण्डनं धनुः ||२९||**

**रामः–** ननु तस्य देवा मुनयश्च कारणम्।

(ततः प्रविशति सीता लक्ष्मणश्च)

**सीता** – हिलिआमि अहं एदेण दुत्तंतेण। णहिण हि तुस्लामि एब्व | तस्स पापस्स पत्थाणसमए केण वि हत्थप्परिसो लंकाअं वि पा दप्परिसो संबुत्तो। तस्स पापस्स सरीरप्परिसपंसुलाणि गत्ताणि अग्गि वज्जिअ कहं पारसुद्धाणि भविस्सन्ति। (परिक्रम्यावलोक्य) जेदु अज्ज उत्तो। ( जिह्नेम्यहमनेन वृत्तान्तेन। न हि न हि तुष्याम्येव। तस्य पापस्य प्रस्थानसमये केनापि हस्तस्पर्शो लङ्कायामपि पादस्पर्शः संवृत्तः। तस्य पापस्य शरीर-स्पर्शपमुलानि गात्राणि अग्निं वर्जयित्वा कथं परिशुद्धानि भविष्यन्ति। जय त्वार्यपुत्रः।)

**रामः**– देवि ! इत इतः।

**शङ्किताসि मया देवि धर्मशीलापि जानकि ! ।**

**विश्वास्यन्ते कथं शेषा योषितः प्रोषिताः प्रियैः ||३०||**

**सीता** – अज्जउत्तो एव्व परमत्थदो जाणादि। (आर्यपुत्र एव परमार्थतो जानाति।)

**रामः** – देवि ! स्निग्धस्यापि विप्रतिपत्तिः फलवती संवृत्ता यया देवा महर्षयश्च प्रत्यक्षीकृताः।

(ततः प्रविशति कृताभिषेको विभीषणः)

**विभोषणः** – जयतु देवः।

**रामः –** विभीषण ! का वार्ता लङ्कायाम्।

**विभीषणः –** देवमाक्रोशति लङ्कावासी महाजनः।

**रामः** – किमिति किमिति । (पर्याकुलस्तिष्ठति)

**विभीषणः**–पयो मद्यम्पर्शं परिशङ्कयने। नामिश्रं हिरण्यं हिरण्यरेतसमर्हत। कथं दीपिकां तमः कलङ्कयतीति।

**रामः** – इदानीमाश्वासितोऽस्मि जनवादश्रवणेन।

**विभीषणः–** देव ! महादेवीं प्रत्यवनतानि शिरांसि नागरिकाणामद्यापि नोत्तिष्ठन्ति।

**रामः**– जाने कियाननुभावो जानक्याः।

**विभीषणः–** पश्य भगवतो वैश्रवणस्य,

पुष्पायुधप्रतिम ! पुष्पकनामधेया

सेयं विमानवसतिर्वसते ! गुणानाम्।

यां स्वीकृतत्रिभुवनामपि सावकाशा–

माशामिवारपरस्य परिग्रहाय ॥ ३१ ॥

**रामः**– प्रेषय भगवते लोकपालाय वैश्रवणाय।

**नारदः**– मा मा राक्षसविरानुभवान्मलीमसमिदं विमान देव्याः तवारोहणेन च पवित्रीकृत्य पश्चात्साकेतात् कैलासमुपनय।

**रामः–** उपपन्नमिदम्। लक्ष्मण ! प्रथमं देवीमारोपय रथम्।

**लक्ष्मणः**– यदाज्ञापयत्यार्थः।

**सीता** – हं। (हम्।)

**रामः**– (स्मितं कृत्वा) देवि !

**अहं सत्यं रामः शशिमुखि ! न मायी दशमुखो**

**रथं भ्राता मे त्वां नयति न सुतो नृपसुते ! ।**

**कृतं वाचा भूयस्सरसिजपलाशच्छविमुषा**

**कराङ्गुल्या धत्से ननु सकिरणं मण्डनमिदम् ॥ ३२ ॥**

**सीता** - एसो अञ्जली अच्चरीअरअणाणं। अण्णहा कहं दाणि अज - उत्तं रक्खसं अ परमत्थदो जाणामि। (एषोऽञ्जलिः आश्चर्यरत्नयोः। अन्यथा कथमिदानीमार्यपुत्रं राक्षसं च परमार्थतो जानामि।)

**लक्ष्मणः - आर्ये ! तव शासनाद्दण्डकेषु प्रस्थिते मयि,**

**संरक्षिता मम समाधिरिषुर्न दैवं**

**साक्षीति यत्कथितमत्र तथैष जातम्।**

**सामान्यदर्शनजडेन मया यदुक्तं**

**त्वं तत्क्षमस्व शरणं चरणौ ममैतौ ॥ ३३॥**

(प्रणमति)

**सीता-** कुमार ! उट्ठेहि उट्ठेहि। को एत्थ दोसो। रक्खससीस परिसपंसुलाणि पादाणि दाणि कुमारेण पक्खालिदाणि विअ परिसुद्धाणि होंति। (कुमार ! उत्तिष्ठ उत्तिष्ठ। कोऽत्र दोषः। राक्षसशीर्षस्पर्शपांसुली पादौ कुमारेण इदानीं प्रक्षालिताविव परिशुद्धौ भवतः।)

(नेपथ्ये)

**देवयोरुभयोर्दृष्टं माहात्म्यमतिमानुषम्।**

**यः स्वधैर्यं निराकार्षीन्निर्विकारा च यानले ॥ ३४ ॥**

**नारदः** - भद्रमुख ! भगवानग्निरेब सवाधुना साक्षित्वं प्रतिपन्नः।

(आकाशे प्रध्वनन्ति शहाङ्खपटहा। सर्वे सविस्मयमवलोकयन्ति)

**नारदः** - भद्रमुख ! स्वनिष्क्रमणेन देवाः तव निष्क्रमणं चोदयन्ति।

**रामः-** एहि देवि ! वैदेहि ! |

**नमस्व देवि ! देवर्षिं देवशासनशंसिनम्।**

**सोपवेदस्य वेदस्य यः प्रतिष्ठा स्वयंभुषः ॥ ३५ ॥**

(हस्तमवलम्ब्य दर्शयति)

**सीता** - दाणि अङ्ग उत्तहत्थप्परिसं उबलम्भिव प्रमाणं होइ अब्भु दङ्गुलीअअं । रक्ख समाआदो मोइदं अत्ताणमवगच्छामि। (इदानीमार्यपुत्रहस्तस्पर्शमुपलभ्य प्रमाणं भवत्यद्भुताङ्गुलीयकम्। राक्षसभायातो मोचितमात्मानमतगच्छामि।)

**रामः-** पूर्व राक्षसीमायाविप्रलब्धस्य मे देव्याः प्रत्ययकारणमासीदाचर्यचूडामणिः।

**नारदः** – भद्रमुख ! देवाननुगामि। किं ते भूयः प्रियमुपहरामि।

**रामः** – सिद्धार्थोऽहं किमतः परमिच्छामि। तथाप्येतावदस्तु भरतवाक्यम्।

**मन्त्रैरावर्ज्यमानं हविरमरपतेरस्तु कल्याणवृष्ट्यै**

**धन्वी सङ्कल्पपजन्मा सरभसमपधे सायकान् संहरेत।**

**राजानो राजधर्मप्रणिहितमसो मौलिभारं वहस्तां**

**प्रज्ञा यातु प्रसादं प्रतिदिनमवधूयान्तराबद्धमौनम्** ॥ ३६॥

(निष्कान्ताः सर्वे)

इति शक्तिभद्रविरचिते चूडामणिनाटके सप्रमोऽङ्कः।

इत्याश्चर्यचूडामणिः समाप्तः।

पर्णशाला शूर्पणखा मायासीता ततः परम्।

जटायुषो वधोऽशोकवनिकाप्यङ्गुलीयकम् ||

सप्तमोऽङ्कस्ततश्चेत्थं चूडामण्यङ्ककीर्तनम् ।

*****